उपोद्घात ।

श्रीजयति । विदितमस्त्येव सारासारविचारचतुराणामशेषविदुषां श्रीमदनन्तनिगमान्तसिद्धान्तपरमतत्त्वार्थानन्तकल्याणगुणगणाकर श्रीमद्गणाधिपादीनां तत्तदिष्टदेवतानां स्वरूपमहिमावबोधे च दर्शन-स्पर्शन-सेवन-पालन सदानादान-रक्षण-पूजन श्रवणादिभिः सकलभगवद्भक्तानां निर्विघ्नसिद्धिसुखावहाघनिर्हरणप्रचण्डभास्कर श्रुति श्रीमत्पूर्वाचार्य प्रणीतोऽप्येतद्भजनानां झगिति धर्मार्थकाममोक्षप्रदत्वेन शुद्धवृत्तालङ्कारादिभिश्चात्यन्तसुन्दरोऽयं बृहत्स्तोत्ररत्नाकरग्रन्थः सर्वोपरि वरीवर्तीति। सोऽयमिह महाम्बापुर्यामस्मदीयमय माहितपुस्तकत एव मुद्रणविदादिपथाप्रसेवनेन स्थानानां वैपरीत्यं न्यूनाधिक्यं च विधायाऽत्यन्तरं च वर्णविपर्ययमुद्रणान्यथाधिकनिभिर्मुद्रितो ऽशुद्धबहुलो बहुशोपलभ्यते । इदानीं स्वस्य प्रेरणया 'भाषासर्वो' इत्युपपदधारिणा संयुक्त प्रदेशमध्यवर्ति 'उन्नाव'मान्तान्त पाति-सुमेरपुर-वासिना श्रीमद्गुरुचरणचरणा मत्पूर्वसेवेन श्रीदेवकीनन्दनाख्यजेन रघुवरशर्मदाक्षिणा महताऽऽयासेन संशोधितो धन्योऽयं वर्णिष्यं स्तोत्रे संवर्धितश्च । स एवायं 'बृहत्स्तोत्ररत्नाकर' संमुद्रितः चतुरन्तर्धरणिमध्यवर्तिनां सनातनधर्मानुयायिनामनुसरतामास्तिकवर्यणां वैदिकसमयाविरोधेन शिष्टाचारानुरोधेन च सर्वविधविम्बादीश्वरविभूत्यन्यतमदेवताविशेषोपासकानां २ १४

क्तादिशिष्टसमदायावलम्बिनां निगिरम्मजनानामान्तरूढा- नामन्यन्तोपकाराय श्रीमद्वेदमार्गप्रतिष्ठापनाचार्य-पुरन्दरीभ्य- श्रीमन्निम्बार्काचार्याज्ञया तच्छिष्येण गौडवरामदीपेन सत्त्मावादनि- वासि भगीरथजनुषा हरिमसादशर्मणा मुद्रापित । अत्रापि प्राचीनार्वाचीनकविप्रणीतानि कानिचिद्द्विणि स्तोत्राणि छन्दो- भङ्गादिदोषयुतानि स्यु । कचिच प्रमादभ्रान्त्यादिपुरुषदोषवशात् पतित स्खलित वा स्यात् 'भ्रान्ते पुरुषधर्मत्वात्'। ततु गुणदोषवि- वेकनिपुणा विद्वांस सादरावलोकनेन समीकुर्वन्त्विति विज्ञापयति सानुनयं—

भगीरथात्मजो हरिप्रसादशर्मा-

कालबादेवीरोड–रामवाडी,

मुम्बई-

श्री ।

बृहत्स्तोत्ररत्नाकरानुक्रमणिका ।

अथ रामचन्द्रस्तोत्राणि १२।

अथ देवीस्तोत्राणि १५ ।

स्तोत्रसंख्या.	स्तोत्रनाम	पृष्ठे

अथ सूर्यस्तोत्राणि ५ ।

अथ गङ्गादिनदीस्तोत्राणि १४ ।

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

अथ सकीर्णस्तोत्राणि ।

मार्गशीर्षमाहात्म्य–भाषाटीकासहित

यह अष्टादशपुराणप्रणेता श्रीमहामुनि वेदव्यासविरचित, एकाशीतिसहस्रात्मक स्कन्दपुराणान्तर्गत है इसमें सप्तदश (१७) अध्यायोंमें उस भगवत्स्वरूप मार्गशीर्ष (अगहन, मगसर) मासका माहात्म्य वर्णित है कि जिसे श्रीमद्भगवद्गीता अ० १० श्लो० ३५ में आनन्दकन्द श्रीकृष्णचन्द्रजीने स्वयं श्रीमुखसे "मासानां मार्गशीर्षोऽहम्" इत्यादिवाक्यसे अपनी प्रधानविभूतियोंमें परिगणित किया है बस, इतनेसेही सुज्ञ महाशय जान सकते हैं, कि इस पुस्तककी कितनी बड़ी आवश्यकता है मूलमात्र छपे हुए इसके होते हुएभी संस्कृतानभिज्ञ महाशय इसके आशयसे वंचितही रहते थे यह देख हमने इसकी सरल हिन्दीभाषाटीका बनवाकर उत्तम प्रकारसे पुस्तकाकार छपाकर प्रकाशित किया है यद्यपि यह सर्वसाधारणको असाधारण उपयोगी है तथापि मूल्य केवल ॥। आ दाम ०=८ रक्खा गया है

आपका,

हरिप्रसाद भगीरथजी

प्राचीन पुस्तक

श्री।

बृहत्स्तोत्ररत्नाकरः।

अथ मङ्गलम्।

श्रीगणेशाय नमः। अविरलमदजलनिवहभ्रमरकुला-
नीकसेवितकपोलम्। अभिमतफलदातारं कामेशं ग-
णपतिं वन्दे ॥ १ ॥ यं ब्रह्म वेदान्तविदो वदन्ति परं
प्रधानं पुरुषं तथान्ये। विश्वोद्गतेः कारणमीश्वरं वा
तस्मै नमो विघ्नविनाशनाय ॥ २ ॥ शुक्लाम्बरधरं
विष्णुं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत्
सर्वविघ्नोपशान्तये ॥ ३ ॥ नारायणं नमस्कृत्य नरं
चैव नरोत्तमम्। देवीं सरस्वतीं चैव ततो जयमु-
दीरयेत् ॥ ४ ॥ व्यासं वसिष्ठनप्तारं शक्तेः पौत्रम-
कल्मषम्। पराशरात्मजं वन्दे शुकतातं तपोनि-
धिम् ॥ ५ ॥ अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः।
अभाललोचनः शम्भुर्भगवान् बादरायणः ॥ ६ ॥



युगभुजं रक्ताङ्गराग विभु तुर्ये तु द्विभुज सिताङ्ग-
रुचिर सर्वार्थद सर्वदा ॥ ३ ॥ विनायक शिखां
पातु परमात्मा परात्पर । अतिसुन्दरकायस्तु म-
स्तकं सुमहोत्कट ॥ ४ ॥ ललाट कश्यप पातु
भ्रूयुगं तु महोदर । नयने भालचन्द्रस्तु गजास्य-
स्त्वोष्ठपल्लवौ ॥५॥ जिह्वा पातु गणक्रोडश्चुबुक गि-
रिजासुत । वाच विनायक पातु दन्तान् रक्षतु दु-
र्मुख ॥६॥ श्रवणौ पाशपाणिस्तु नासिका चिन्तिता-
र्थद । गणेशस्तु मुख कण्ठ पातु देवो गणजय ॥७॥
स्कन्धौ पातु गजस्कन्ध स्तनौ विघ्नविनाशन । हृदय
गणनाथस्तु हेरम्बो जठर महान् ॥८॥ धराधर पातु
पार्श्वौ पृष्ठ विघ्नहर शुभ । लिङ्ग गुह्य सदा पातु व-
क्रतुण्डो महाबल ॥९॥ गणक्रीडो जानुजङ्घे ऊरू मङ्ग-
लमूर्तिमान्। एकदन्तो महाबुद्धि पादौ गुल्फौ सदाऽ-
वतु ॥ १०॥ क्षिप्रप्रसादनो बाहू पाणी आशाप्रपूरक ।
अङ्गुलीश्च नखान्पातु पद्महस्तोऽरिनाशन ॥११॥स-
र्वाङ्गानि मयूरेशो विश्वव्यापी सदाऽवतु । अनुक्तमपि

आम्नायं ... म्नायममायु
नेन ... ...द्वार
गनकर ... ...
...ना ... ...त्रा
याम्रु ... ...
...चन ... ...म्मत
॥ ॥ ... ...
कुल्म ... ...मर्ग
न॥ ॥ ... ...
कपि ... ...
... ...
... ...
... ...
... ...
... ...मप

कर्मणि ॥ २१॥ सप्तवार जपेदेतद्दिनानामेकविंशतिम् ।
तत्तत्फलमवाप्नोति साधको नात्र सशय· ॥ २२ ॥
एकविंशतिवारं च पठेत्तावद्दिनानि य ·। कारागृह-
गत सद्यो राज्ञा वध्य च मोचयेत ॥ २३ ॥ राजदर्श-
नवेलाया पठेदेतत्त्रिवारत । स राजान वश नीत्वा
प्रकृतीश्च सभा जयेत ॥ २४ ॥ इद गणेशकवच
कश्यपेन समीरितम् । मुद्गलाय च तेनाथ माण्डव्याय
महर्षये ॥ २५॥ मह्य स प्राह कृपया कवच सर्वसिद्धि-
द्धिदम् । न देय भक्तिहीनाय देय श्रद्धावते शुभम्
॥ २६ ॥ अनेनास्य कृता रक्षा न बाधाऽस्य भवेत्क-
चित । राक्षसासुरवेतालदैत्यदानसभवा ॥ २७ ॥
इति श्रीगणेशपुराणे उत्तरखण्डे बालक्रीडाया षड-
शीतितमेऽध्याये गणेशकवच सपूर्णम् ॥ १ ॥

२ सकष्टनाशनस्तोत्रम् ।
(नारदपुराणे) ।

श्रीगणेशाय नम । नारद उवाच । प्रणम्य शिर

२ गणेशाष्टकम्। (गणेशपुराणे)।

श्रीगणेशाय नम । सर्वे ऊचु । यतोऽनन्तशक्तेरनन्ताश्च जीवा यतो निर्गुणादप्रमेया गुणास्ते। यतो भाति सर्वं त्रिधा भेदभिन्नं सदा तं गणेशं नमामो भजाम ॥ १ ॥ यतश्चाविरासीज्जगत्सर्वमेतत्तथाब्जासनो विश्वगो विश्वगोप्ता । तथेन्द्रादयो देवसंघा मनुष्या सदा तं गणेशं नमामो भजाम ॥ २ ॥ यतो वह्निभानू भवो भूर्जलं च यत सागराश्चन्द्रमा व्योम वायु । यत स्थावरा जंगमा वृक्षसंघा सदा तं गणेशं नमामो भजाम ॥ ३ ॥ यतो दानवा किन्नरा यक्षसंघा यतश्चारणा वारणा श्वापदाश्च । यत पक्षिकीटा यतो वीरुधश्च सदा तं गणेशं नमामो भजाम ॥ ४ ॥ यतो बुद्धिरज्ञाननाशो मुमुक्षोर्यत संपदो भक्तसंतोषिका स्यु । यतो विघ्ननाशो यत कार्यसिद्धि सदा तं गणेशं नमामो भजाम ॥ ५ ॥ यत पुत्रसंपद्यतो वाञ्छितार्थो यतो भक्तविघ्नास्तथा-

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

प्रभु ॥ १३ ॥ इति श्रीगणेशपुराणे उपासनाखण्डे श्रीगणेशाष्टकं संपूर्णम् ॥ ३ ॥

४ एकदन्तस्तोत्रम्।

श्रीगणेशाय नमः ॥ महासुरं सुशान्तं वै दृष्ट्वा विष्णुमुखाः सुराः । भृग्वादयश्च मुनय एकदन्तं समाययुः ॥ १ ॥ प्रणम्य तं प्रपूज्यादौ पुनस्तं नेमुरादरात् । तुष्टुवुर्हर्षसंयुक्ता एकदन्तं गणेश्वरम् ॥ २ ॥ देवर्षय ऊचुः ॥ सदात्मरूपं सकलादिभूतममायिनं सोऽहमचिन्त्यबोधम् । अनादिमध्यान्तविहीनमेकं तमेकदन्तं शरणं व्रजामः ॥ ३ ॥ अनन्तचिद्रूपमयं गणेशं ह्यभेदभेदादिविहीनमाद्यम् । हृदि प्रकाशस्य धरं स्वधीस्थं तमेकदन्तं शरणं व्रजामः ॥ ४ ॥ विश्वादिभूतं हृदि योगिनां वै प्रत्यक्षरूपेण विभान्तमेकम् । सदा निरालम्बसमाधिगम्यं तमेकदन्तं० ॥ ५ ॥ स्वबिम्बभावेन विलासयुक्तां बिन्दुस्वरूपा रचिता स्वमाया । तस्यां स्ववीर्यं प्रददाति यो वै तमेकदन्तं०

नि [illegible]
क [illegible]
त्रय [illegible]
क [illegible]
गचित [illegible]
तत्र दि [illegible]
अनके [illegible]
प्रतिमन [illegible]
त्मक [illegible]
नपना [illegible]
रूप [illegible]
नया [illegible]
नाग्र [illegible]
विमान [illegible]
भव [illegible]
मातान [illegible]

गणनाथ एकस्तमेक० ॥ १५ ॥ त्वदाज्ञया भान्ति ग्रहाश्च सर्वे नक्षत्ररूपाणि विभान्ति खे वै । आधार-हीनानि त्वया धृतानि तमेक० ॥ १६ ॥ त्वदाज्ञया सृष्टिकरो विधाता त्वदाज्ञया पालक एव विष्णु । त्व-दाज्ञया संहरते हरोऽपि तमेक० ॥ १७ ॥ यदाज्ञया भूर्जलमध्यसस्था यदाज्ञयाऽप प्रवहन्ति नद्य ।सीमा सदा रक्षति वै समुद्रस्तमेक० ॥१८॥ यदाज्ञया देव गणो दिविष्ठो ददाति वै कर्मफलानि नित्यम् । यदा ज्ञया शैलगणोऽचलो वै तमेक० ॥ १९ ॥ यदाज्ञया शेष इलाधरो वै यदाज्ञया मोहकरश्च काम । यदाज्ञया कालधरोऽर्यमा च तमेक०॥२०॥यदाज्ञया वाति वि-भाति वायुर्यदाज्ञयाऽग्निर्जठरादिसस्थ । यदाज्ञया वै सचराचर च तमेक०॥२१॥सर्वान्तरे संस्थितमेकमूढ यदाज्ञया सर्वमिद विभाति । अनन्तरूप हृदि बोधक वै तमेक० ॥ २२ ॥ य योगिनो योगबलेन साध्य कुर्वन्ति तं क स्तवनेन स्तौति । अत प्रणामेन सुसिद्धिदोऽस्तु तमेक० ॥ २३ ॥ गृत्समद उवाच ।

पत्र स्नुषा च प्रमाद ग्या ममुनयश्च वै । वर्णाभाव
श्रावया नन स्वपमगुना ॥ २४ ॥ स चानुवाच श्री
नाभा पाहन्न मनन वै । नगाद नान्महाभागा
मन्वन्तर ॥ २० ॥ पतन्न उवाच ॥
प्रवन्नामिम च नारायण मुग मर्विगणा किल ।
गुणा मा ग्राम्हाामि मनमाम्मितम ॥ २१ ॥
मस्तु मन्त्र भ्रान्ति प्रीतिप्रद मम भविष्यति
दिव्यारयम ॥ २२ ॥ भविष्यति
भावयान्त । पयापातिक सर्व
॥ २३ ॥ गना ाानि मन्यन्त
मा है मा है ॥ग वै
॥ मो ॥ प्ति
मा
ा
ग
॥

जयी भवेत् ॥ ३२ ॥ नित्य य पठते स्तोत्र ब्रह्मभूत'
स वै नर । तस्य दर्शनत सर्वे देवा पूता भवन्ति
वै ॥ ३३ ॥ एव तस्य वच श्रुत्वा प्रहृष्टा देवतर्पय ।
ऊचु करपुटा सर्वे भक्तियुक्ता गजाननम् ॥ ३४ ॥
॥ इत्येकदन्तस्तोत्र सपूर्णम् ॥ ४ ॥

५ गणपतिस्तव ।

श्रीगणेशाय नम । ऋषिरुवाच । अज निर्वि
कल्प निराहारमेक निरानन्दमानन्दमद्वैतपूर्णम् ।
परं निर्गुण निर्विशेप निरीह परब्रह्मरूप गणेश
भजेम ॥ १ ॥ गुणातीतमान चिदानदरूप चिदा-
भासक सर्वगं ज्ञानगम्यम् । मुनिध्येयमाकाशरूप
परेशं परब्रह्मरूप गणेश भजेम ॥ २ ॥ जगत्कारण
कारणज्ञानरूप सुरादि सुखादिं गुणेश गणेशम् ।
जगद्व्यापिन विश्ववन्द्य सुरेश परब्रह्मरूप गणेश
भजेम ॥ ३ ॥ रजोयोगतो ब्रह्मरूप श्रुतिज्ञ सदा का-
र्यसक्त हृदाऽचिन्त्यरूपम् । जगत्कारण सर्वविद्या

घातपीडां लभेत । रसत्सूर्यबिम्बे विशाले स्थितेऽय जनो ध्वान्तपीडां कथं वा लभेत ॥ ११ ॥ वय भ्रामिता सर्वथाऽज्ञानयोगादलब्ध्वा तवाङ्घ्रिं बहून्वर्षपूगान् । इदानीमवाप्तास्तवैव प्रसादात्प्रपन्नान्सदा पाहि विश्वम्भराद्य ॥ १२ ॥ एवं स्तुतो गणेशस्तु संतुष्टोऽभून्महामुने । कृपया परयोपेतोऽभिधातुमुपचक्रमे ॥ १३ ॥ इति श्रीमदर्पिप्रणीतो गणपतिस्तवः संपूर्णः ॥ ५ ॥



ॐनमो भगवते ज्वलज्ज्वालामलिने ॐ नीं नित्यतृप्तिधाम्ने तत्पुरुषात्मने तर्जनीभ्यां नमः । ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ मरु अनादिशक्तिधाम्ने अघोरात्मने मध्यमाभ्यां नमः । ॐनमो भगवतेज्वलज्ज्वालामालिने ॐ शिं स्वतन्त्रशक्तिधाम्ने वामदेवात्मने अनामिकाभ्यां नमः । ॐनमो भगवते ज्वलज्ज्वालामालिने ॐवां अलुप्तशक्तिधाम्ने सद्योजातात्मने कनिष्ठिकाभ्यांनमः। ॐनमो भगवते ज्वलज्ज्वामालिने ॐयं अनादिशक्तिधामे- सर्वात्मने करतलकरपृष्ठाभ्यां नमः । एवं हृदयादि । अथ ध्यानम् । वज्रदंष्ट्रं त्रिनयनं कालकण्ठमरिंदमम् । सहस्रकरमत्युग्रं वन्दे शम्भुमुमापतिम् ॥ १ ॥ अथापरं सर्वपुराणगुह्यं निःशेषपापौघहरं पवित्रम् । जयप्रदं सर्वविपत्प्रमोचनं वक्ष्यामि शैवं कवचं हिताय ते ॥ २ ॥ ऋषभ उवाच । नमस्कृत्य महादेवं विश्वव्यापिनमीश्वरम् । वक्ष्ये शिवमयं वर्म सर्व-

चोत्पादिभीतेरगिलाच तापात् ॥ १० ॥ प्रदीप्तविद्यु-
त्कनकावभासो विद्यावराभीतिकुठारपाणिः । चतु-
र्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां स्थितं रक्षतु माम-
जस्रम् ॥ ११ ॥ कुठारवेदाङ्कुशपाशशूलकपालढक्का-
क्षगुणान्दधानः । चतुर्मुखो नीलरुचिस्त्रिनेत्रः पाया-
दघोरो दिशि दक्षिणस्याम् ॥ १२ ॥ कुन्देन्दुशङ्ख-
स्फटिकावभासो वेदाक्षमालावरदाभयाङ्कः । त्र्यक्ष-
श्चतुर्वक्त्र उरुप्रभावः सद्योऽधिजातोऽस्तु मां प्रती-
च्याम् ॥ १३ ॥ वराक्षमालाभयटङ्कहस्तः सरोज-
किञ्जल्कसमानवर्णः । त्रिलोचनश्चारुचतुर्मुखो मां
पायादुदीच्यां दिशि वामदेवः ॥ १४ ॥ वेदाभये-
ष्टाङ्कुशपाशटङ्ककपालढक्काक्षकशूलपाणिः । सित-
द्युतिः पञ्चमुखोऽवतान्मामीशान ऊर्ध्वं परमप्रकाशः
॥ १५ ॥ मूर्धानमव्यान्मम चन्द्रमौलिर्भालं ममा-
व्यादथ भालनेत्रः । नेत्रे ममाव्याद्भगनेत्रहारी नासां
सदा रक्षतु विश्वनाथः ॥ १६ ॥ पायाच्छ्रुती मे श्रु-
तिगीतकीर्तिः कपोलमव्यात्सततं कपाली । वक्त्रं

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

ष्कारणाय निरातङ्काय निष्प्रपञ्चाय निःसङ्गाय निर्द्वन्द्वाय निराधाराय नीरागाय निष्क्रोधाय निर्मलाय निष्पापाय निर्भयाय निर्विकल्पाय निर्भेदाय निष्क्रियाय निस्तुलाय निःसंशयाय निरञ्जनाय निरुपमविभवाय नित्यशुद्धबुद्धपरिपूर्णसच्चिदानन्दाद्वयाय परमशान्तस्वरूपाय तेजोरूपाय तेजोमयाय जय जय रुद्र महारौद्र भद्रावतार महाभैरव कालभैरव कल्पान्तभैरव कपालमालाधर खट्वाङ्गखड्गचर्मपाशाङ्कुशडमरुशूलचापबाणगदाशक्तिभिन्दिपालतोमरमुसलमुद्गरपाशपरिघभुशुण्डीशतघ्नीचक्राद्यायुधभीषणकर सहस्रमुख दंष्ट्राकरालवदन विकटाट्टहासविस्फारितब्रह्माण्डमण्डल नागेन्द्रकुण्डल नागेन्द्रहार नागेन्द्रवलय नागेन्द्रचर्मधर मृत्युंजय त्र्यम्बक त्रिपुरान्तक विश्वरूप विरूपाक्ष विश्वेश्वर वृषभवाहन विश्वतोमुख सर्वतो रक्ष रक्ष मां ज्वल ज्वल महामृत्युमपमृत्युभयं नाशय नाशय चोरभयमुत्सादयोत्सादय विषसर्पभयं शमय शमय चोरान्मारय मा-

[illegible]

[illegible]

[illegible]

[illegible] मावा

[illegible]

[illegible] ममानत

[illegible] मावा

[illegible] मामा

[illegible]

[illegible]

[illegible]

[illegible] मत

[illegible]

[illegible] मय

[illegible]





कस्यं विषय पदे त्वर्वाचीने पतति न मन' कस्य न वच ॥ २॥ मधुस्फीता वाच परममृत निर्मितवतस्तव ब्रह्मन्किं वागपि सुरगुरोर्विस्मयपदम्। मम त्वेता वाणीं गुणकथनपुण्येन भवत पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता ॥ ३॥ तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्त्रयीवस्तु व्यस्त तिसृषु गुणभिन्नासु तनुषु । अभव्यानामस्मिन्वरद रमणीयामरमणीं विहन्तु व्याक्रोशीं विदधत इहैके जडधिय ॥४॥ किमीह किंकाय स खलु किमुपायस्त्रिभुवन किमाधारो धाता सृजति किमुपादान इति च । अतर्क्यैश्वर्ये त्वय्यनवसरदुस्थो हतधिय' कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगत ॥ ५॥ अजन्मानो लोका किमवयववन्तोऽपि जगतामधिष्ठातारं किं भवविधिरनादृत्य भवति । अनीशो वा कुर्याद्भुवनजनने क परिकरो यतो मन्दास्त्वां प्रत्यमरवर सशेरत इमे ॥ ६॥ त्रयी सारय योग पशुपतिमत वैष्णवमिति प्रभिन्ने प्रस्थाने परमिद-

मद पथ्यमिति च । रुचीनां वैचित्र्यादृजुकुटिल-
नानापथजुषा नृणामेको गम्यस्त्वमसि पयसामर्णव
इव ॥७॥ महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः
कपालं चेतीयत्तव वरद तन्त्रोपकरणम् । सुरास्तां
तामृद्धिं दधति तु भवद्भ्रूप्रणिहितां नहि स्वात्मारामं
विषयमृगतृष्णा भ्रमयति ॥ ८ ॥ ध्रुवं कश्चित्सर्वं
सकलमपरस्त्वध्रुवमिदं परो ध्रौव्याध्रौव्ये जगति
गदति व्यस्तविषये । समस्तेऽप्येतस्मिन्पुरमथन
तैर्विस्मित इव स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा
मुखरता ॥ ९॥ तवैश्वर्यं यत्नाद्यदुपरि विरिञ्चो हरि-
रधः परिच्छेत्तुं यातावनलमनलस्कन्धवपुषः । ततो
भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत् स्वयं तस्थे
ताभ्यां तव किमनुवृत्तिर्न फलति ॥ १० ॥ अयत्ना-
दापाद्य त्रिभुवनमवैरव्यतिकरं दशास्यो यद्बाहू-
नभृत रणकण्डूपरवशान् । शिरःपद्मश्रेणीरचितचर-
णाम्भोरुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जि-
तमिदम् ॥ ११ ॥ अमुष्य त्वत्सेवासमधिगतसारं

भुजवनं बलात्कैलासेऽपि त्वदधिवसतौ विक्रमयत
। अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खल ॥ १२॥
यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे
बाण परिजनविधेयत्रिभुवन । न तच्चित्रं तस्मि
न्वरिवसितरि त्वच्चरणयोर्न कस्याप्युन्नत्यै भवति
शिरसस्त्वय्यवनति ॥ १३ ॥ अकाण्डब्रह्माण्डक्षय-
चकितदेवासुरकृपाविधेयस्याऽऽसीद्यस्त्रिनयन विष
संहृतवत । स कल्माष कण्ठे तव न कुरुते न
श्रियमहो विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्य-
सनिन ॥ १४ ॥ असिद्धार्था नैव क्वचिदपि
सदेवासुरनरे निवर्तन्ते नित्यं जगति जयिनो यस्य
विशिखा । स पश्यन्नीश त्वामितरसुरसाधारण
मभूत् स्मर स्मर्तव्यात्मा न हि वशिषु पथ्य
परिभव ॥ १५ ॥ महीपादाघाताद्व्रजति सहसा
संशयपदं पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहग
णम् । मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडितत

धानव्यसनिनो ध्रुवं कर्तुं श्रद्धाविधुरमभिचाराय हि मखाः ॥ २१॥ प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा । धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः ॥ २२ ॥ स्वलावण्याशंसाधृतधनुषमह्नाय तृणवत्पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि । यदि स्त्रैणं देवी यमनिरतदेहार्धघटनादवैति त्वामद्धा बत वरद मुग्धा युवतयः ॥२३॥ श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचराश्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः ॥ अमङ्गल्यं शीलं तव भवतु नामैवमखिलं तथापि स्मर्तॄणां वरद परमं मङ्गलमसि ॥ २४ ॥ मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः । यदालोक्याह्लादं ह्रद इव निमज्ज्यामृतमये दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान् ॥ २५ ॥ त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा

णानि चेत क्लेशवश्य क चेद क च तव गुणसीमो-
ल्लङ्घिनी शश्वदृद्धिः । इति चकितममन्दीकृत्य मां
भक्तिराधाद्वरद चरणयोस्ते वाक्यपुष्पोपहारम् ॥ ३१ ॥
असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे सुरतरुवर-
शाखा लेखनी पत्रमुर्वी । लिखति यदि गृहीत्वा
शारदा सर्वकालं तदपि तव गुणानामीश पारं न
याति ॥ ३२ ॥ असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौलेर्ग्र-
थितगुणमहिम्नो निर्गुणस्येश्वरस्य । सकलगुणव-
रिष्ठः पुष्पदन्ताभिधानो रुचिरमलघुवृत्तैः स्तोत्रमे-
तच्चकार ॥ ३३ ॥ अहरहरनवद्यं धूर्जटेः स्तोत्रमे-
तत्पठति परमभक्त्या शुद्धचित्तः पुमान्यः । स
भवति शिवलोके रुद्रतुल्यस्तथाऽत्र प्रचुरतरधनायुः-
पुत्रवान्कीर्तिमांश्च ॥ ३४ ॥ महेशान्नापरो देवो
महिम्नो नापरा स्तुतिः । अघोरान्नापरो मन्त्रो नास्ति
तत्त्वं गुरोः परम् ॥ ३५ ॥ दीक्षा दानं तपस्तीर्थं
ज्ञानं यागादिकाः क्रियाः । महिम्नः स्तवपाठस्य
कलां नार्हन्ति षोडशीम् ॥ ३६ ॥ कुसुमदशननामा



प्य च धूपं तथा दीपं देव दयानिधे पशुपते हृत्क-
ल्पितं गृह्यताम् ॥ १ ॥ सौवर्णे मणिखण्डरत्नरचिते
पात्रे घृतं पायसं भक्ष्यं पञ्चविधं पयोदधियुतं रम्भा-
फलं पायसम् । शाकानामयुतं जलं रुचिकरं
कर्पूरखण्डोज्ज्वलं ताम्बूलं मनसा मया विरचितं
भक्त्या प्रभो स्वीकुरु ॥ २ ॥ छत्रं चामरयोर्युगं
व्यजनकं चादर्शकं निर्मलं वीणाभेरिमृदङ्गकाह-
लकलागीतं च नृत्यं तथा । साष्टाङ्गं प्रणतिः
स्तुतिर्बहुविधा ह्येतत्समस्तं मया सङ्कल्पेन सम-
र्पितं तव विभो पूजां गृहाण प्रभो ॥ ३ ॥ आत्मा
त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा
गिरो यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवारा-
धनम् ॥ ४ ॥ स्तवेन हरपूजनं प्रतिदिनं यो वा त्रि-
सन्ध्यं पठेल्लेवाश्लोकचतुष्टयं प्रतिदिनं पूजा हरेर्मा-
नसी । सोऽयं सौख्यमवाप्नुयाच्छ्रुतिधरः साक्षाद्धरे

तत्त्वविद्यामतीतं परं त्वा कथं वेत्ति को वा ॥ ४ ॥
प्रगल्भप्रताद्प्रभाशोणधर्मं मरुत्वन्मणिश्रीमह
श्याममर्धम् । गुणस्यूतमेकं वपुश्चैकमन्तं स्मरामि
स्मरापत्तिसंपत्तिहेतुम् ॥ ५ ॥ स्वसेवासमायातदेवा
सुरेन्द्रा नमन्मौलिमन्दारमालाभिषिक्तम् । नमस्यामि
शम्भो पदाम्भोरुहं ते भवाम्भोधिपोतं भवानीविभाव्य
म् ॥ ६ ॥ जगन्नाथ मन्नाथ गौरीसनाथ प्रपन्नानुक-
म्पिन्विपन्नार्तिहारिन् । महः स्तोममूर्ते समस्तैकब
न्धो नमस्ते नमस्ते पुनस्ते नमोऽस्तु ॥७॥ महादेव
देवेश देवादिदेव स्मरारे पुरारे यमारे हरेति । ब्रुवाण
स्मरिष्यामि भक्त्या भवन्तं ततो मे दयाशील देव
प्रसीद ॥ ८ ॥ विरूपाक्ष विश्वेश विद्यादिकेश त्रयी
मूल शंभो शिव त्र्यम्बक त्वम् । प्रसीद स्मर त्राहि
पश्यावमुक्त्यै क्षमस्वाप्नुहीति क्षमाहि शिवाम ॥
॥ ९ ॥ त्वदन्यः शरण्यः प्रपन्नस्य नेति प्रसीद स्मर-
न्नेव हन्यास्तु दैन्यम् । न चेत्ते भवेद्भक्तवात्सल्यहा
निस्ततो मे दयालो दया सन्निधेहि ॥१०॥ अप

रतोऽपि रागवान् । अपि भैक्ष्यचरो महेश्वरश्च-
रिति चित्रमिद हि ते प्रभो ॥७॥ वितरत्या भिवा-
ञ्छित दृशा परिदृष्ट किल कल्पपादप । हृदये
स्मृत एव धीमते नमतेऽभीष्टफलप्रदो भवान् ॥८॥
सहसैव भुजगपाशवान्विनिगृह्णाति न यावदन्तक ।
अभय कुरु तावदाशु मे गतजीवस्य पुन क्रियौ-
षधे ॥ ९ ॥ सविषैरिव भीमपन्नगैर्विषयैरेभिरल
परिरक्षितम् । अमृतैरिव सभ्रमेण मामभिषिञ्चाशु
दयावलोकनै ॥ १० ॥ मुनयो वहवोऽद्य धन्यता
गमिता स्वाभिमतार्थदर्शिन करुणाकर येन तेन
मामचमन्न ननु पश्य चक्षुषा ॥ ११ ॥ प्रणमाम्यथ
यामि चापर शरण क कृपणाभयप्रदम् । विरहीव
विभो प्रियामय परिपश्यामि भवन्मय जगत्॥१२॥
वहवो भवताऽनुकम्पिता किमितीशान न माऽनु
कम्पसे । दधता किमु मन्दराचल परमाणु कमठेन
दुर्धर ॥ १३ ॥ अशुचिं यदि माऽनुमन्यसे कि-
मिद मूर्ध्नि कपालदाम ते । उत शाठ्यमसाधुम

७ शिवापराधक्षमापणस्तोत्रम् (शं)

श्रीगणेशाय नम । आदौ कर्मप्रसगात् कलयति कलुष मातृकुक्षौ स्थित मां विण्मूत्रामेध्यमध्ये क्वथयति नितरा जाठरो जातवेदा । यद्यद्वै तत्र दु ख व्यथयति नितरा शक्यते केन वक्तु क्षन्तव्यो मेऽपराध शिव शिव शिव भो श्रीमहादेव शभो ॥ १ ॥ बाल्ये दु खातिरेकान्मलल्लुलितवपु स्तन्यपाने पिपासा नो शक्यश्चेन्द्रियेभ्यो भवगुणजनिता जन्तवो मा तुदन्ति । नानारोगादिदु खाद्रुदनपरवश शकर न स्मरामि क्षन्तव्यो मेऽपराध शिव शिव शिव भो श्रीम० ॥ २ ॥ प्रौढोऽहं यौवनस्थो विषयविषधरै पञ्चभिर्मर्मसधौ दष्टो नष्टो विवेक सुतधनयुवतिस्वादुसौख्ये निषण्ण । शैवीचिन्ताविहीन मम हृदयमहो मानगर्वाधिरूढ क्षन्तव्यो मेऽपराध शिव शिव शिव भो श्रीमहादेव० ॥ ३ ॥ वार्धक्ये चेन्द्रियाणा विगतगति-

हव्यं ते लक्षसंख्यैर्हुतवहवदने नार्पितं बीजमन्त्रैः ।
नो तप्तं गाङ्गतीरे व्रतजपनियमैः रुद्रजाप्यैर्न वेदैः
क्षन्तव्यो मेऽपराधः शिव शिव० ॥ ८ ॥ स्थित्वा
स्थाने सरोजे प्रणवमयमरुत्कुण्डले सूक्ष्ममार्गे शान्ते
स्वान्ते प्रलीने प्रकटितविभवे ज्योतिरूपे पराख्ये ।
लिङ्गज्ञे ब्रह्मवाक्ये सकलतनुगतं शङ्करं न स्मरामि
क्षन्तव्यो मेऽपराधः शिव शिव० ॥ ९ ॥ नमो नि-
सर्गशुद्धस्त्रिगुणविरहितोध्वस्तमोहान्धकारो नासाग्रे
न्यस्तदृष्टिर्विदितभवगुणो नैव दृष्टः कदाचित् ।
उन्मन्याऽवस्थया त्वां विगतकलिमलं शङ्करं न
स्मरामि क्षन्तव्यो मेऽपराधः शिव शिव० ॥ १० ॥
चन्द्रोद्भासितशेखरे स्मरहरे गङ्गाधरे शङ्करे सर्पैर्भू-
षितकण्ठकर्णविवरे नेत्रोत्थवैश्वानरे । दन्तित्व[illegible]
न्दराम्बरधरे त्रैलोक्यसारे हरे मोक्षार्थं कुरु चित्तवृ
त्तिमखिलामन्यैस्तु किं कर्मभिः ॥ ११ ॥ किं
वाऽनेन धनेन वाजिकरिभिः प्राप्तेन राज्येन किं
किंवा पुत्रकलत्रमित्रपशुभिर्देहेन गेहेन किम्

न्धुरस्फुरद्दृगन्तसंततिप्रमोदमानमानसे । कृपाकटा-
क्षधोरणीनिरुद्धदुर्धरापदि क्वचिद्दिगम्बरे मनो विनो
दमेतु वस्तुनि ॥ २ ॥ जटाभुजगपिङ्गलस्फुरत्फ-
णामणिप्रभाकदम्बकुङ्कुमद्रवप्रलिप्तदिग्वधूमुखे । म-
दान्धसिन्धुरस्फुरत्त्वगुत्तरीयमेदुरे मनो विनोदमद्भुतं
बिभर्तु भूतभर्तरि ॥ ३ ॥ सहस्रलोचनप्रभृत्यशेषले-
खशेखरप्रसूनधूलिधोरणीविधूसराङ्घ्रिपीठभूः । भुज
गराजमालया निबद्धजाटजूटकः श्रियै चिराय
जायतां चकोरबन्धुशेखरः ॥ ४ ॥ ललाटचत्वरज्वल-
द्धनंजयस्फुलिङ्गभानिपीतपञ्चसायकं नमन्निलिम्प-
नायकम् । सुधामयूखलेखया विराजमानशेखरं
महाकपालि संपदे शिरो जटालमस्तु नः ॥ ५॥ क-
रालभालपट्टिकाधगद्धगद्धगज्ज्वलद्धनंजयाहुतीकृत
प्रचण्डपञ्चसायके । धराधरेन्द्रनन्दिनीकुचाग्रचित्रप
त्रकप्रकल्पनैकशिल्पिनि त्रिलोचने मतिर्मम ॥ ६ ॥
नवीनमेघमण्डलीनिरुद्धदुर्धरस्फुरत्कुहूनिशीथिनीत
मः प्रबन्धबन्धुकंधरः । निलिम्पनिर्झरीधरस्तनोतु कृत्ति-

म्यहम् ॥ १२ ॥ इमं हि नित्यमेव मुक्तमुत्तमो-
त्तमं स्तवं पठन्स्मरन्ब्रुवन्नरो विशुद्धिमेति सततम् ।
हरे गुरौ सुभक्तिमाशु याति नान्यथा गतिं विमो-
हनं हि देहिनां सुशङ्करस्य चिन्तनम् ॥ १३ ॥
पूजावसानसमये दशवक्त्रगीतं यः शम्भुपूजनमिदं
पठति प्रदोषे । तस्य स्थिरां रथगजेन्द्रतुरङ्गयुक्तां
लक्ष्मीं सदैव सुमुखीं प्रददाति शम्भुः ॥ १४ ॥ इति
श्रीरावणविरचितं शिवताण्डवस्तोत्रं संपूर्णम् ॥१३॥

९ शिवस्तुतिः (नारायणकृता) ।

श्रीगणेशाय नमः । स्फुटं स्फटिकसप्रभं स्फुटित-
हारकश्रीजटं शशाङ्कदलशेखरं कपिलफुल्लनेत्र-
त्रयम् । तरक्षुवरकृत्तिमद्भुजगभूषणं भूतिमत्कदा
नु शितिकण्ठ ते वपुरवेक्षते वीक्षणम् ॥ १ ॥ त्रिलो-
चन विलोचने लसति ते ललामायितं स्मरो
नियमघस्मरो नियमिनामभूद्भस्मसात् । स्वभक्ति-
लतया वशीकृतवती सतीयं सती स्वभक्तवशतो



भवानपि वशी प्रसीद प्रभो ॥ २ ॥ महेश महितोऽसि तत्पुरुष पूरुषाग्र्यो भवानघोर रिपुघोर तेऽनघ वामदेवाञ्जलि । नम सपदिजात ते त्वमिति पञ्चरूपोचितप्रपञ्चचयपञ्चभून्मम मनस्तमस्ताडय ॥ ३ ॥ रसाघनरसानलानिलवियद्विवस्वद्विधुप्रयष्टृषु निविष्टमित्यज भजामि मूर्त्यष्टकम्। प्रशान्तमुत भीषण भुवनमोहन चेत्यहो वपूषि गुणभूषितेऽहमहमात्मनोऽहंभिदे ॥ ४ ॥ विभक्तपमाध्वनां तव षडध्वनामास्पदं पद निगमवेदिनो जगति वामदेवादय । कथञ्चिदुपशिक्षिता भगवतैव संविद्रते वय तु विरलान्तर कथमुमेश तन्मन्महे ॥ ५ ॥ कठोरितकुठारया ललितशूलया वाहया रणड्डमरुणा स्फुरद्धरिणया सखट्वाङ्गया । चलाभिरचलाभिरप्यगणिताभिरुन्नृत्यतश्चतुर्दश जगन्ति ते जय जयेत्ययुर्विस्मयम् ॥ ६ ॥ पुरा त्रिपुररन्धन विविधदैत्यविध्वंसन पराक्रमपरंपरा अपि परा न ते विस्मय । अमर्षिबलदर्पितक्षुभितवृत्त

नेत्रोज्ज्वलज्ज्वलज्ज्वलनहेलया शलभित हि लो-
कत्रयम् ॥ ७ ॥ सहस्रनयनो गुह सहस्ररश्मि-
विधुर्बृहस्पतिरुतास्पति ससुरसिद्धविद्याधरा
भवत्पदपरायण श्रियमिमा ययु प्रार्थिता भवान्
सुरतरुर्भृश शिव शिवा शिवावल्लभ ॥ ८ ॥ तव
प्रियतमादतिप्रियतम सदैवान्तर पयस्युपहित घृत
स्वयमिव श्रियो वल्लभम् । विबुध्य लघुबुद्धय
स्वपरपक्षलक्ष्यायित पठन्ति हि लुठन्ति ते शठहृद
शुचा शुण्ठिता ॥ ९ ॥ निवासनिलय चिता तव
शिरस्ततिर्मालिका कपालमपि ते करे त्वमशि-
वोऽस्यनन्तधियाम् । तथापि भवत पद शिवशिवे-
त्यदो जल्पतामकिंचन न किंचन वृजिनमस्ति भ
स्मीभवेत् ॥ १० ॥ त्वमेव किल कामधुक् सकल-
कामनापूरयन् सदा त्रिनयनो गजान्वहति चार्वि-
नेत्रोद्भवम् । विष विषधरान्दधत्पिबति तेन चा-
नन्दवान्विरुद्धचरितोचिता जगदधीश ते भिक्षुता
॥ ११ ॥ नम शिवशिवाशिवाशिवशिवार्थ कृन्ता-

भूषिताङ्गं भवानीकलत्रं भजे पञ्चवक्त्रम् ॥ ३ ॥
शिवाकान्त शम्भो शशाङ्कार्धमौले महेशान शूलिन्
जटाजूटधारिन् । त्वमेको जगद्व्यापको विश्वरूप
प्रसीद प्रसीद प्रभो पूर्णरूप ॥ ४ ॥ परात्मानमेकं
जगद्बीजमाद्यं निरीहं निराकारमोंकारवेद्यम् । यतो
जायते पाल्यते येन विश्वं तमीशं भजे लीयते यत्र
विश्वम् ॥ ५ ॥ न भूमिर्न चापो न वह्निर्न वायुर्न
चाकाशमास्ते न तन्द्रा न निद्रा । न ग्रीष्मो न
शीतं न देशो न वेषो न यस्यास्ति मूर्तिस्त्रिमूर्तिं
तमीडे ॥ ६ ॥ अजं शाश्वतं कारणं कारणानां
शिवं केवलं भासकं भासकानाम् । तुरीयं तमः-
पारमाद्यन्तहीनं प्रपद्ये परं पावनं द्वैतहीनम् ॥ ७ ॥
नमस्ते नमस्ते विभो विश्वमूर्ते नमस्ते नमस्ते
चिदानन्दमूर्ते । नमस्ते नमस्ते तपोयोगगम्य न
मस्ते नमस्ते श्रुतिज्ञानगम्य ॥ ८ ॥ प्रभो शूल
पाणे विभो विश्वनाथ महादेव शम्भो महेश त्रि-
नेत्र । शिवाकान्त शान्त स्मरारे पुरारे त्वदन्यो व-

वाद्यनिलक्षण मधुरपञ्चमनादविशारदम् । प्रमथभूतगणैरपि सेवित भजत रे मनुजा० ॥ ३ ॥ शरणद सुखद शरणान्वित शिव शिवेति शिवेति नतं नृणाम् ॥ अभयद करुणावरुणालय भजत रे मनुजा० ॥ ४॥ नरशिरोरचित मणिकुण्डल भुजगहारमुद वृषभध्वजम् । चितिरजोधवलीकृतविग्रह भजत रे म० ॥ ५ ॥ मखविनाशकर शशिशेखरं सततमध्वरभाजिफलप्रदम् । प्रलयदग्धसुरासुरमानव भजत रे म० ॥ ६ ॥ मदमपास्य चिर हृदि संस्थित मरणजन्मजराभयपीडितम् । जगदुदीक्ष्य समीपभयाकुल भजत रे म० ॥ ७ ॥ हरिविरञ्चिसुराधिपपूजित यमजनेशधनेशनमस्कृतम् । त्रिनयन भुवनत्रितयाधिप भजत रे म० ॥ ८॥ पशुपतेरिदमष्टकमद्भुत विरचित पृथिवीपतिसूरिणा । पठति संशृणुते मनुज सदा शिवपुरीं वसते लभते मुदम् ॥ ९ ॥ इति श्रीपशुपत्यष्टकं संपूर्णम् ॥१६॥

पे ये नार्चित शिवमपि प्रणमन्ति चान्ये । एतत्कथां श्रुतिपुटैर्न पिबन्ति मूढास्ते जन्मजन्मसु भवन्ति नरा दरिद्रा ॥२॥ ये वै प्रदोषसमये परमेश्वरस्य कुर्वन्त्यनन्यमनसोऽङ्घ्रिसरोजपूजाम् । नित्यं प्रवृद्धधनधान्यकलत्रपुत्र—सौभाग्यसम्पदधिकास्त इहैव लोके॥ ३॥ कैलासशैलभवने त्रिजगज्जनित्रीं गौरीं निवेश्य कनकाचितरत्नपीठे । नृत्य विधातुमभिवाञ्छति शूलपाणौ देवा प्रदोषसमये नु भजन्ति सर्वे॥४॥वाग्देवी धृतवल्लकी शतमखो वेणु दधत्पद्मजस्तालोन्निद्रकरो रमा भगवती गेयप्रयोगान्विता । विष्णु सान्द्रमृदङ्गवादनपटुर्देवा समन्तात्स्थिता सेवन्ते तमनु प्रदोषसमये देव मृडानीपतिम् ॥ ५॥ गन्धर्वयक्षपतगोरगसिद्धसाध्याविद्याधरामरवराप्सरसा गणाश्च । येऽन्ये त्रिलोकनिलयासहभूतवर्गा प्राप्ते प्रदोषसमये हरपार्श्वसंस्था ॥ ॥ ६ ॥ अत प्रदोषे शिव एक एव पूज्योऽथ नान्ये हरिपद्मजाद्या । तस्मिन्महेशे विधिनेज्यमाने

तोत्तरीयमनोहर पङ्कजासनपद्मलोचनपूजिताङ्घ्रि सरोरुहम् । देवसिन्धुतरङ्गसीकरसिक्तशुभ्रजटाधर चन्द्रशेखर० ॥४॥ यक्षराजसख भगाक्षहरं भुजङ्गविभूषण शैलराजसुतापरिष्कृतचारुवामकलेवरम् । क्ष्वेडनीलगल परश्वधधारिणं मृगधारिण चन्द्रशेखर० ॥५॥ कुण्डलीकृतकुण्डलेश्वरकुण्डलं वृषवाहन नारदादिमुनीश्वरस्तुतवैभव भुवनेश्वरम् । अन्धकान्धकमाश्रितामरपादप शमनान्तकं चन्द्रशेखर०॥६॥ भेषजं भवरोगिणामखिलापदामपहारिण दक्षयज्ञविनाशनं त्रिगुणात्मकं त्रिविलोचनम् । भुक्तिमुक्तिफलप्रद सकलाघसङ्घनिबर्हण चन्द्रशेखर० ॥७॥ भक्तवत्सलमर्चित निधिमक्षय हरिदम्बर सर्वभूतपतिं परात्परमप्रमेयमनुत्तमम् । सोमवारिनभूहुताशन सोमपानिलखाकृतिं चन्द्रशेखर० ॥ ८ ॥ विश्वसृष्टि विधायिनं पुनरेव पालनतत्परं संहरन्तमपि प्रपञ्चमशेषलोकनिवासिनम् । क्रीडयन्तमहर्निश गणनाथयूथसमन्वित चन्द्रशेखर० ॥ ९ ॥ मृत्युभीतमृक-

स्तुत्वा शिव नत्वा पुरस्तस्थौ मुनीश्वर । दीनव-
त्साश्रुनेत्रश्च पुलकाञ्चितविग्रह ॥ ६ ॥ असितेन
कृत स्तोत्र भक्तियुक्तश्च य पठेत् । वर्षमेक हविष्याशी
शङ्करस्य महात्मन ॥७॥ स लभेद्वैष्णव पुत्रं
ज्ञानिन चिरजीविनम् । भवेद्धनाढ्योऽदु खी च
मूको भवति पण्डित ॥ ८ ॥ अभार्यो लभते भार्यां
सुशीला च पतिव्रताम् । इह लोके सुख भुक्त्वा
यात्यन्ते शिवसन्निधिम् ॥ ९ ॥ इद स्तोत्र पुरा दत्त
ब्रह्मणा च प्रचेतसे । प्रचेतसा स्वपुत्रायासिताय
दत्तमुत्तमम् ॥ १० ॥ इति श्रीब्रह्मवैवर्ते महापु
राणे श्रीकृष्णजन्मखण्डे असितकृत शिवस्तोत्र
सपूर्णम् ॥ २२ ॥

१८ शिवस्तोत्रम् (हिमालयकृतम्)।

श्रीगणेशाय नम । हिमालय उवाच । त्व ब्रह्मा
सृष्टिकर्ता च त्व विष्णु परिपालक । त्व शिव शि-
वदोऽनन्त सर्वसहारकारक ॥ १ ॥ त्वमीश्वरो गुणा

र्भार्यां सुशीलां सुमनोहराम् । चिरकालगतं वस्तु लभते सहसा ध्रुवम् ॥ ११ ॥ राज्यभ्रष्टो लभेद्राज्यं शङ्करस्य प्रसादतः । कारागारे श्मशाने च शत्रुग्रस्तेऽतिसङ्कटे ॥ १२ ॥ गभीरेऽतिजलाकीर्णे भग्नपोते विषादने । रणमध्ये महाभीते हिंस्रजन्तुसमन्विते ॥१३॥ सर्वतो मुच्यते स्तुत्वा शङ्करस्य प्रसादतः ॥ १४ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे हिमालयकृतं शिवस्तोत्रं सम्पूर्णम्॥२३॥

१९ शिवाष्टकप्रारम्भः ।

श्रीगणेशाय नमः । प्रभुं प्राणनाथं विभुं विश्वनाथं जगन्नाथनाथं सदानन्दभाजम् । भवद्भव्यभूतेश्वरं भूतनाथं शिवं शङ्करं शम्भुमीशानमीडे ॥ १ ॥ गले रुण्डमालं तनौ सर्पजालं महाकालकालं गणेशाधिपालम् । जटाजूटगङ्गोत्तरङ्गैर्विशालं शिवं शङ्करं शम्भुमीशानमीडे ॥ २ ॥ मुदामाकरं मण्डनं मण्डयन्तं महामण्डलं भस्मभूषाधरं तम् । अनादिं

रण्य भूतावास वासुकीकण्ठभूषम्। त्र्यक्ष पञ्चा स्यादिदेव पुराण वन्दे सान्द्रानन्दसन्दोहदक्षम् ॥१॥ योगाधीश कामनाश कराल गङ्गासङ्गाक्लिन्नमूर्धानमीशम्। जटाजूटाटोपविक्षिप्तभावं महाकाल चन्द्रभाल नमामि ॥ २॥ श्मशानस्थ भूतवेतालसङ्ग नानाशस्त्रै खड्गशूलादिभिश्च। व्यग्रात्युग्रा बाहवो लोकनाशे यस्य क्रोधाद्भूतलोकोऽस्तमेति ॥ ३ ॥ यो भूतादि पञ्चभूतै सिसृक्षुस्तन्मात्रात्मा कालकर्मस्वभावै। प्रहृत्येद प्राप्य जीवत्वमीशो ब्रह्मानन्दे क्रीडते त नमामि ॥४॥ स्थितौ विष्णु सर्वजिष्णु सुरात्मा लोकान्साधून्धर्मसेतून्बिभर्ति। ब्रह्माद्यंशो योऽभिमानी गुणात्मा शब्दाद्यङ्गैस्त परेश नमामि ॥ ॥ ५ ॥ यस्याज्ञया वायवो वान्ति लोके ज्वलत्यग्नि सविता याति तप्यन्। शीतांशु खे तारकासग्रहश्च प्रवर्तते त परेश प्रपद्ये ॥ ६ ॥ यस्य श्वासात्स र्वधात्री धरित्री देवो वर्षत्यम्बु काल प्रमाता। मेरुर्मध्ये भुवनाना च भर्ता तमीशान विश्वरूप नमामि

रण्य भूतावास वासुकीकण्ठभूषम्। त्र्यक्ष पञ्चा स्यादिदेव पुराण वन्दे सान्द्रानन्दसन्दोहदक्षम् ॥१॥ योगाधीश कामनाश कराल गङ्गासङ्गाक्लिन्नमूर्धानमीशम्। जटाजूटाटोपविक्षिप्तभाव महाकाल चन्द्रभाल नमामि ॥ २॥ श्मशानस्थ भूतवेतालसङ्ग नानाशस्त्रै खड्गशूलादिभिश्च। व्यग्रात्युग्रा बाहवो लोकनाशे यस्य क्रोधोद्भूतलोकोऽस्तमेति ॥ ३ ॥ यो भूतादि पञ्चभूतै सिसृक्षुस्तन्मात्रात्मा कालकर्मस्वभावै। प्रहृत्येद प्राप्य जीवत्वमीशो ब्रह्मानन्दे क्रीडते तं नमामि ॥४॥ स्थितो विष्णु सर्वजिष्णु सुरात्मा लोकान्साधून्धर्मसेतून्बिभर्ति। ब्रह्माद्यशो योऽभिमानी गुणात्मा शब्दाद्यङ्गैस्त परेश नमामि ॥ ॥ ५ ॥ यस्याज्ञया वायवो वान्ति लोके ज्वलत्यग्नि सविता याति तप्यन्। शीतांशु खे तारकासग्रहश्च प्रवर्तन्ते त परे। प्रपद्ये ॥ ६ ॥ यस्य श्वासात्सर्वधात्री धरित्री देवो वर्षत्यम्बु काल प्रमाता। मेरुर्मध्ये भुवनाना च भर्ता तमीशान विश्वरूप

वीरभद्रो गणनाय प्रजापति ॥ ७ ॥ हिरण्यरेता दुर्धर्षो गिरिशो गिरिशोऽनघ । भुजङ्गभूषणो भर्गो गिरिधन्वा गिरिप्रिय ॥ ८ ॥ कृत्तिवासा पुरारातिर्भगवान् प्रमथाधिप । मृत्युञ्जय सूक्ष्मतनुर्जगद्व्यापी जगद्गुरु ॥ ७॥ व्योमकेशो महासेनजनकश्चारविक्रम । रुद्रो भूतपति स्थाणुरहिर्बुध्न्यो दिगम्बर ॥ १० ॥ अष्टमूर्तिरनेकात्मा सात्विक शुद्धविग्रह । शाश्वत खण्डपरशुरज पाशविमोचन ॥ ११ ॥ मृड पशुपतिर्देवो महादेवोऽव्ययो हरि । पूषदन्तभिदव्यग्रो दक्षाध्वरहरो हर ॥ ॥ १२ ॥ भगनेत्रभिदव्यक्त सहस्राक्ष सहस्रपात । अपवर्गप्रदोऽनन्तस्तारक परमेश्वर ॥ १३ ॥ इति श्रीशिवाष्टोत्तरशतनामावलिस्तोत्र सपूर्णम् ॥ २७ ॥

२३ द्वादशज्योतिर्लिङ्गस्तोत्रम् ।

श्रीगणेशाय नम । सौराष्ट्रदेशे विशदेऽतिरम्ये

र्शनात्पातकमाशु नाशं प्रयाति तं त्र्यम्बकमीशमीडे
॥ ८ ॥ सुताम्रपर्णीजलराशियोगे निबध्य सेतुं
विशिखैरसंख्यैः । श्रीरामचन्द्रेण समर्पितं तं रा-
मेश्वराख्यं नियतं नमामि ॥ ९ ॥ यं डाकिनी-
शाकिनिकासमाजे निषेव्यमाणं पिशिताशनैश्च ।
सदैव भीमादिपदप्रसिद्धं तं शङ्करं भक्तहितं नमामि
॥१०॥सानन्दमानन्दवनेवसन्तमानन्दकन्दं हतपाप-
वृन्दम् । वाराणसीनाथमनाथनाथं श्रीविश्वनाथं
शरणं प्रपद्ये ॥ ११ ॥ इलापुरे रम्यविशालकेऽ-
स्मिन्समुल्लसन्तं च जगद्वरेण्यम् । वन्दे महोदारतर-
स्वभावं घृष्णेश्वराख्यं शरणं प्रपद्ये ॥ १२ ॥
ज्योतिर्मयद्वादशलिङ्गकानां शिवात्मना प्रोक्त-
मिदं क्रमेण। स्तोत्रं पठित्वा मनुजोऽतिभक्त्या फलं
तदालोक्य निजं भजेच्च ॥ १३ ॥ इति श्रीद्वादश-
ज्योतिर्लिङ्गस्तोत्रम् ॥ २८ ॥

४२ द्वादशज्योतिर्लिङ्गानि ।

श्रीगणेशाय नमः । सौराष्ट्रे सोमनाथं च



दिकारण श्यामकायमादिदेवमक्षरं निरामयम् ।
भीमविक्रमं प्रभुं विचित्रताण्डवप्रियं काशिकापुरा-
धिनाथका० ॥ ३ ॥ भुक्तिमुक्तिदायकं प्रशस्तचारु-
विग्रहं भक्तवत्सलं स्थितं प्रशस्तलोकविग्रहम् ।
निक्वणन्मनोज्ञहेमकिङ्किणीलसत्कटिं काशिकापु-
राधिनाथका० ॥ ४ ॥ धर्मसेतुपालकं त्वधर्ममार्ग-
नाशकं कर्मपाशमोचकं सुशर्मदायकं विभुम् ।
स्वर्णवर्णशेषपाशशोभिताङ्गमण्डलं काशिकापुरा-
धि० ॥ ५॥ रत्नपादुकाप्रभाभिरामपादयुग्मकं नित्य-
मद्वितीयमिष्टदैवतं निरञ्जनम् । मृत्युदर्पनाशनं क-
रालदंष्ट्रमोक्षणं काशिकापुराधि० ॥ ६ ॥ अट्टहास-
भिन्नपद्मजाण्डकोशसन्ततिं दृष्टिपातनष्टपापजाल-
मुग्रशासनम् । अष्टसिद्धिदायकं कपालमालिकन्धरं
काशिकापुराधिना० ॥ ७ ॥ भूतसङ्घनायकं विशा-
लकीर्तिदायकं काशिवासलोकपुण्यपापशोधकं वि
भुम् । नीतिमार्गकोविदं पुरातनं जगत्पतिं काशि-
कापुर० ॥ ८ ॥ कालभैरवाष्टकं पठन्ति ये मनोहरं-

ज्ञानमुक्तिसाधनं विचित्रपुण्यवर्धनम् । शोकमोह-
दैन्यलोभकोपतापनाशनं ते प्रयान्ति कालभैरवा-
ङ्घ्रिसन्निधिं ध्रुवम् ॥ ९ ॥ इति श्रीमच्छङ्कराचार्यवि-
रचितं कालभैरवाष्टकं समाप्तम् ॥ ३० ॥

अथ विष्णुस्तोत्राणि ।



१ त्रैलोक्यमङ्गलकवचम् ।

(नारदपञ्चरात्रम्)

श्रीगणेशाय नमः । नारद उवाच । भगवन्सर्व-

ह्नि कवचं यत्प्रकाशितम्। त्रैलोक्यमङ्गल नाम कृ-
ाया कथय प्रभो ॥ १ ॥ सनत्कुमार उवाच। शृणु
क्ष्यामि विप्रेन्द्र कवच परमाद्भुतम् । नारायणेन
कथित कृपया ब्रह्मणे पुरा ॥ २ ॥ ब्रह्मणा कथित
ह्य पर स्नेहाद्वदामि ते । अतिगुह्यतर तत्त्व ब्र-
ह्ममन्त्रौघविग्रहम् ॥ ३ ॥ यद्धृत्वा पठनाद्ब्रह्मा सृष्टिं
वेतनुते ध्रुवम्। यद्धृत्वा पठनात्पाति महालक्ष्मी-
र्जगत्त्रयम् ॥ ४ ॥ पठनाद्धारणाच्छम्भु सहर्ता सर्व-
मन्त्रवित्। त्रैलोक्यजननी दुर्गा महिषादिमहासु-
रान् ॥ ५ ॥ वरदृप्तान् जघानेव पठनाद्धारणाद्यत ।
एवमिन्द्रादय सर्वे सर्वैश्वर्यमवाप्नुयु ॥६॥ इद क-
वचमत्यन्त गुप्त कुत्रापि नो वदेत। शिष्याय भ-
क्तियुक्ताय साधकाय प्रकाशयेत् ॥ ७॥ शठाय पर-
शिष्याय दत्त्वा मृत्युमवाप्नुयात् । त्रैलोक्यमङ्गल-
स्यास्य कवचस्य प्रजापति ॥ ८ ॥ ऋषिश्छन्द-
श्च गायत्री देवो नारायण स्वयम् । धर्मार्थका-
ममोक्षेषु विनियोग प्रकीर्तित ॥ ९ ॥ प्रणवो मे

भवेत्तस्य पुरश्चर्याविधानत । स्पर्धामुद्धूय सतत लक्ष्मीर्वाणी वसेत्तत ॥ ३६ ॥ पुष्पाञ्जल्यष्टकं दत्त्वा मूलेनैव पठेत्सकृत ॥ दशवर्षसहस्राणि पूजाया फलमाप्नुयात ॥ ३७॥ भूर्जे विलिख्याङ्गुलिका स्वर्णस्था धारयेद्यदि । कण्ठे वा दक्षिणे बाहौ सोऽपि विष्णुर्न सशय ॥ ३८ ॥ अश्वमेधसहस्राणि वाजपेयशतानि च । महादानानि यान्येव प्राददक्षिण्य भुवस्तथा ॥ ३९ ॥ कला नार्हन्ति तान्येव सकृदुच्चारणात्तत । कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नर ॥ ४० ॥ त्रैलोक्य क्षोभयत्येव त्रैलोक्यविजयी भवेत् । इद कवचमज्ञात्वा यजेद्य पुरुषोत्तमम् ॥ ४१ ॥ शतलक्ष प्रजप्तोऽपि न मन्त्रस्तस्य सिद्ध्यति ॥ ४२ ॥ इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे त्रैलोक्यमङ्गल नाम कवच सपूर्णम् ॥ ३१ ॥

२ नारायणवर्म (भागवते स्कन्धे ६)

श्रीगणेशाय नम । राजोवाच । यया गुप्त सह:

दग्धि दन्दग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हु-
ताश ॥२३॥ गदेऽशनिस्पर्शनविस्फुलिङ्गे निष्पिण्ढि
निष्पिण्ढ्यजितप्रियासि। कूष्माण्डवैनायकयक्षरक्षोभू-
तग्रहांश्चूर्णय चूर्णयारीन् ॥ २४ ॥ त्वं यातुधानप्र-
मथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन्। दरेन्द्र विद्रा-
वय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि कम्पयन्
॥ २५ ॥ त्वं तिग्मधारासिवरारिसैन्यमीशप्रयुक्तो
मम छिन्धि छिन्धि। चक्षूंषि चर्मन् शतचन्द्र छा-
दय द्विषामघोनां हर पापचक्षुषाम् ॥ २६ ॥ य-
न्नो भयं ग्रहेभ्योऽभूत्केतुभ्यो नृभ्य एव च ॥२७॥
सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात्। प्रयान्तु
संक्षयं सद्यो येऽन्ये श्रेयःप्रतीपकाः ॥ २८ ॥ ग-
रुडो भगवान् स्तोत्रस्तोमश्छन्दोमयः प्रभुः। रक्षत्वशे-
षकृच्छ्रेभ्यो विष्वक्सेनस्य वाहनम् ॥ २९ ॥ स-
र्वापद्भ्यो हरेर्नाम रूपयानायुधानि नः। बुद्धी-
न्द्रियमनःप्राणान् पान्तु पार्षदभूषणाः ॥ ३० ॥ यथा

रव स्त्रीभिर्वृतो यत्र द्विजक्षय ॥ ३९ ॥ गगना-
न्यपतत्सद्य सविमानो ह्यवाक्शिरा । स वा-
लखिल्यवचनादस्थीन्यादाय विस्मित ॥ ४० ॥
प्रास्य प्राचीसरस्वत्या स्नात्वा धाम स्वमन्वगा-
त । य इदं शृणुयात्काले यो धारयति चादृत ।
त नमस्यन्ति भूतानि मुच्यते सर्वतो भयात
॥ ४१ ॥ श्रीशुक उवाच । एता विद्यामधिगतो
विश्वरूपाच्छतक्रतु ॥ त्रैलोक्यलक्ष्मीं बुभुजे नि-
निर्जित्य मृधेऽसुरान् ॥ ४२ ॥ इति श्रीमद्भागव-
ते महापुराणेऽष्टादशसाहस्र्या संहितायां वैयासि-
क्या षष्ठस्कन्धे नारायणवर्मकथन नामाष्टमो-
ऽध्याय ॥ ३२ ॥

३ कृष्णाष्टोत्तरशतनामस्तोत्रम् ।

अस्य श्रीकृष्णाष्टोत्तरशतनामस्तोत्रस्य श्रीशेष
ऋषि अनुष्टुप् छन्द श्रीकृष्णो देवता श्रीकृष्ण-
प्रीत्यर्थे श्रीकृष्णाष्टोत्तरशतनामजपे विनियोग ।

न कामजनकः कञ्जलोचनः । मधुहा मथुरानाथो
द्वारकानायको बलि ॥ १० ॥ वृन्दावनान्तसंचारी
तुलसीदामभूषण । स्यमन्तकमणेर्हर्ता नरनाराय-
णात्मकः ॥ ११ ॥ कुब्जाकृष्णाम्बरधरो मायी
परमपूरुष । मुष्टिकासुरचाणूरमहायुद्धविशारद-
॥ १२ ॥ संसारवैरी कंसारिर्मुरारिर्नरकान्तकः ।
अनादिर्ब्रह्मचारी च कृष्णाव्यसनकर्षकः ॥ १३ ॥
शिशुपालशिरश्छेत्ता दुर्योधनकुलान्तकृत् ।
विदुराक्रूरवरदो विश्वरूपप्रदर्शक ॥ १४ ॥
सत्यवाक् सत्यसंकल्प सत्यभामारतो जयी ।
सुभद्रापूर्वजो विष्णुर्भीष्ममुक्तिप्रदायकः ॥ १५ ॥
जगद्गुरुर्जगन्नाथो वेणुवाद्यविशारद । वृषभासुर-
विध्वंसी बाणासुरबलान्तकृत् ॥ १६ ॥ युधिष्ठिरप्र-
तिष्ठाता बर्हिबर्हावतंसक । पार्थसारथिरव्यक्तो
गीतामृतमहोदधि ॥ १७ ॥ कालीयफणिमाणिक्य-
रञ्जितश्रीपदाम्बुज । दामोदरो यज्ञभोक्ता दानवेन्द्र-
विनाशन ॥ १८ ॥ नारायण परं ब्रह्म पन्नगा-

वेदान्तवेदिने ॥ २७ ॥ इम मन्त्र महादेव जपन्नेव दिवानिशम् । सर्वग्रहानुग्रहभाक् सर्वप्रियतमो भवेत ॥ २८ ॥ पुत्रपौत्रे परिवृत सर्वसिद्धिसमृद्धिमान् । निर्विश्य भोगानन्तेऽपि कृष्णसायुज्यमाप्नुयात् ॥ २९ ॥ इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे उमामहेश्वरसवादे धरणीशेषसवादे श्रीकृष्णाष्टोत्तरशतनामस्तोत्र सपूर्णम् ॥ ३३ ॥

४ विष्णुस्तवराज (कल्किपुराणे) ।

श्रीगणेशाय नम । पद्मोवाच । योगेन सिद्धविबुधे परिभाव्यमानं लक्ष्म्यालय तुलसिकाचितभक्तभृङ्गम् । प्रोत्तुङ्गरक्तनखराङ्गुलिपत्रचित्र गङ्गारसं हरिपदाम्बुजमाश्रयेऽहम् ॥ १ ॥ गुञ्जन्मणिप्रचयघट्टितराजहससिञ्जत्सुनूपुरयुत पदपद्मवृत्तम् । पीताम्बराञ्चलविलोलचलत्पताकं स्वर्णत्रिवक्रवलय च हरेः स्मरामि ॥ २ ॥ जङ्घे सुपर्णगलनीलमणिप्रवृद्धे शोभास्पदारुणमणिद्युतिचञ्चुमध्ये । आरक्तपादतल-



९ श्रीकृष्णस्तवराज (नारदपञ्च०)।

श्रीगणेशायनम । श्रीमहादेव उवाच । शृणु देवि प्रवक्ष्यामि स्तोत्रं परमदुर्लभम् । यज्ज्ञात्वा न पुनर्गच्छेन्नरो निरययातनाम् ॥ १ ॥ नारदाय च यत्प्रोक्तं ब्रह्मपुत्रेण धीमता । सनत्कुमारेण पुरा योगीन्द्रगुरुवर्त्मना ॥ २ ॥ श्रीनारद उवाच । प्रसीद भगवन्मह्यमज्ञानात्कुण्ठितात्मने । तवाङ्घ्रिपङ्कजरजोरागिणीं भक्तिमुत्तमाम् ॥ ३ ॥ अज प्रसीद भगवन्नमितद्युतिपञ्जर । अप्रमेय प्रसीदास्मद्दुःखहन् पुरुषोत्तम ॥ ४ ॥ स्वसंवेद्य प्रसीदास्मदानन्दात्मन्ननामय । अचिन्त्यसार विश्वात्मन्प्रसीद परमेश्वर ॥ ५ ॥ प्रसीद तुङ्ग तुङ्गानां प्रसीद शिव शोभन । प्रसीदगुणगम्भीर गम्भीराणां महाद्युते ॥ ६ ॥ प्रसीद व्यक्त विस्तीर्ण विस्तीर्णानामगोचर । प्रसीदार्द्रार्द्रजातीनां प्रसीदान्तान्तदायिनाम् ॥७॥ गुरोर्गरीय सर्वेश प्रसीदानन्त देहि

श कर्म सर्वं मे भवेदाराधनं तव ॥ १७ ॥ इति स्वनजपार्चाभेदतो विष्णुपूजानियतहृदयकर्मा यस्तु मन्त्री चिराय । स खलु सकलकामान् प्राप्य कृष्णान्तरात्मा जननमृतिविमुक्तोऽत्युत्तमां भक्तिमेति ॥ १८ ॥ गोगोपगोपिकावीतं गोपालं गोपु गोप्रदम् । गोपैरीड्यं गोसहस्रैर्नौमि गोकुलनायकम् ॥ १९ ॥ प्रीणयेदनया स्तुत्या जगन्नाथं जगन्मयम् । धर्मार्थकाममोक्षाणामाप्तये पुरुषोत्तमम् ॥ २० ॥ इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे श्रीकृष्णस्तवराजः सम्पूर्णः ॥ ३५ ॥

३६ विष्णुपञ्जरस्तोत्रम् (ब्रह्माण्डपु०)।

श्रीगणेशाय नमः । ॐ अस्य श्रीविष्णुपञ्जरस्तोत्रमन्त्रस्य नारद ऋषिः । अनुष्टुप् छन्दः । श्रीविष्णुः परमात्मा देवता । अहं बीजम् । सोऽहं शक्तिः ॐ ह्रीं कीलकम् । मम सर्वदेहरक्षार्थं जपे विनियोगः । नारदऋषये नमः मुखे । श्रीविष्णु-

मि आत्मरक्षाकर नृणाम् ॥ ३ ॥ पादौ रक्षतु गोविन्दो जङ्घे चैव त्रिविक्रम । ऊरू मे केशव पातु कटिं चैव जनार्दन ॥ ४ ॥ नाभिं चैवाच्युत पातु गुह्यं चैव तु वामन । उदरं पद्मनाभश्च पृष्ठं चैव तु माधव ॥ ५ ॥ वामपार्श्वं तथा विष्णुर्दक्षिणं मधुसूदन । बाहू वै वासुदेवश्च हृदि दामोदरस्तथा ॥ ६ ॥ कण्ठं रक्षतु वाराह कृष्णश्च मुखमण्डलम् । माधव कर्णमूले तु हृषीकेशश्च नासिके ॥ ७ ॥ नेत्रे नारायणो रक्षेल्ललाटं गरुडध्वज । कपोलौ केशवो रक्षेद्वैकुण्ठ सर्वतो दिशम् ॥ ८ ॥ श्रीवत्साङ्कश्च सर्वेषामङ्गानां रक्षको भवेत् । पूर्वस्यां पुण्डरीकाक्ष आग्नेय्यां श्रीधरस्तथा ॥ ९ ॥ दक्षिणे नारसिंहश्च नैऋत्यां माधवोऽवतु । पुरुषोत्तमो मे वारुण्यां वायव्यां च जनार्दन ॥१०॥ गदाधरस्तु कौबेर्यामीशान्यां पातु केशव । आकाशे च गदा पातु पाताले च सुदर्शनम्॥११॥सन्नद्ध सर्वगात्रेषु प्रविष्टो विष्णुपञ्जर । विष्णुपञ्जरविष्टोऽहं विचरामि

प्रणतस्य च ॥ २१ ॥ अश्वमेधसहस्रस्य फल प्राप्नोति मानव । सर्वकाम लभेदस्य पठनान्नात्र सशय ॥ २२ ॥ जले विष्णु स्थले विष्णुर्विष्णु पर्वतमस्तके । ज्वालामालाकुले विष्णु सर्वं विष्णुमय जगत् ॥ २३ ॥ इति श्रीब्रह्माण्डपुराणे इन्द्रनारदसवादे श्रीविष्णुपञ्जरस्तोत्र सपूर्णम् ॥ ३६॥

७ चतु श्लोकीभागवतम्।
(भागवत ३ स्कन्धे)

श्रीगणेशाय नम । श्रीभगवानुवाच । ज्ञान परमगुह्य मे यद्विज्ञानसमन्वितम् । सरहस्य तदङ्ग च गृहाण गदित मया ॥ १ ॥ यावानह यथाभावो यद्रूपगुणकर्मक । तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥ २ ॥ अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् । पश्चादह यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥ ३ ॥ ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि । तद्विद्यादात्मनो माया यथाभासो यथा

नेनन [illegible] नो
नद्दा
गा
[illegible]
॥
र्धा
[illegible]
[illegible]



यामि । ...
निगा ...
गद ...
णाय ...
नाम ...
याच ...

हरेर्नामैव नामैव नामैव मम जीवनम् । कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥ ५३ ॥ वसिष्ठ उवाच । कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्तते । भस्मीभवन्ति तस्याशु महापातककोटय ॥ ५४ ॥ अरुन्धत्युवाच । कृष्णाय वासुदेवाय हरये परमात्मने । प्रणतक्लेशनाशाय गोविन्दाय नमो नमः ॥ ५५ ॥ कश्यप उवाच । कृष्णानुस्मरणादेव पापसङ्घातपञ्जरं । शतधा भेदमाप्नोति गिरिर्वज्रहतो यथा ॥ ५६ ॥ दुर्योधन उवाच । जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्ति । केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि ॥ ५७ ॥ यत्र स्वगुणदोषेण क्षम्यता मधुसूदन । अहमेवमहं हन्तु मम दोषो न विद्यते ॥ ५८ ॥ भृगुरुवाच । नामैव तव गोविन्द कलौ त्वत्त शताधिकम् । ददत्युच्चारणान्मुक्ति विना अष्टाङ्गयोगत ॥ ५९ ॥ लोमहर्षण उवाच । नमामि नारायणपादपङ्कजं करोमि नारायणपूजनं

अत्रिरुवाच । गोविन्देति सदा स्नानं गोविन्देति सदा जपः । गोविन्देति सदा ध्यानं सदा गोविन्दकीर्तनम् ॥ ४७ ॥ अक्षरं हि परं ब्रह्म गोविन्देत्यक्षरत्रयम् । तस्मादुच्चारितं येन ब्रह्मभूयाय कल्पते ॥ ४८ ॥ श्रीशुक उवाच । अच्युतः कल्पवृक्षोऽसावनन्तः कामधेनवः । चिन्तामणिश्च गोविन्दो हरिनाम विचिन्तयेत् ॥ ४९ ॥ हरिरुवाच । जयति जयति देवो देवकीनन्दनोऽयं जयति जयति कृष्णो वृष्णिवंशप्रदीपः । जयति जयति मेघश्यामलः कोमलाङ्गो जयति जयति पृथ्वीभारनाशो मुकुन्दः ॥ ५० ॥ पिप्पलायन उवाच । श्रीमन्नृसिंहविभवे गरुडध्वजाय तापत्रयोपशमनाय भवौषधाय । कृष्णाय वृश्चिकजलाग्निभुजङ्गरोगक्लेशव्ययाय हरये गुरवे नमस्ते ॥ ५१ ॥ आविर्होत्र उवाच । कृष्ण त्वदीयपदपङ्कजपञ्जरान्ते अद्यैव मे विशतु मानसराजहंसः । प्राणप्रयाणसमये कफवातपित्तैः कण्ठावरोधनविधौ स्मरणं कुतस्ते ॥ ५२ ॥ विदुर उवाच ।

हरेर्नामैव नामैव नामैव मम जीवनम् । कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥ ५३ ॥ वसिष्ठ उवाच । कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्तते । भस्मीभवन्ति तस्याशु महापातककोटयः ॥ ५४ ॥ अरुन्धत्युवाच । कृष्णाय वासुदेवाय हरये परमात्मने । प्रणतक्लेशनाशाय गोविन्दाय नमो नमः ॥ ५५ ॥ कश्यप उवाच । कृष्णानुस्मरणादेव पापसङ्घातपञ्जरः । शतधा भेदमाप्नोति गिरिर्वज्रहतो यथा ॥ ५६ ॥ दुर्योधन उवाच । जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः । केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि ॥ ५७ ॥ यन्त्रस्य गुणदोषेण क्षम्यतां मधुसूदन । अहमेवमहं हन्तुं मम दोषो न विद्यते ॥ ५८ ॥ भृगुरुवाच । नामैव तव गोविन्द कलौ त्वत्त शताधिकम् । ददत्युच्चारणान्मुक्तिं विना अष्टाङ्गयोगतः ॥ ५९ ॥ लोमहर्षण उवाच । नमामि नारायणपादपङ्कजं करोमि नारायण-

सदा । वदामि नारायणनाम निर्मलं स्मरामि नारायणतत्त्वमव्ययम् ॥ ६० ॥ शौनक उवाच । स्मृत्वा सकलकल्याणभाजनं यत्र जायते । पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ॥ ६१ ॥ गर्ग उवाच । नारायणेति मन्त्रोऽस्ति वागस्ति वशवर्तिनी । तथापि नरके घोरे पतन्तीत्येतदद्भुतम्॥६२॥ दाल्भ्य उवाच । किं तस्य बहुभिर्मन्त्रैर्भक्तिर्यस्य जनार्दने । नमो नारायणायेति मन्त्रः सर्वार्थसाधकः ॥ ६३ ॥ वैशंपायन उवाच । यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ६४ ॥ अङ्गिरा उवाच । हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः । अनिच्छयाऽपि संस्पृष्टो दहत्येव हि पावकः ॥ ६५ ॥ पराशर उवाच । सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् । बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥ ६६ ॥ पौलस्त्य उवाच । हे जिह्वे रससारज्ञे सर्वदा मधुरप्रिये । नारायणाख्यं पीयूषं पिब जिह्वे निरन्तरम् ॥

॥ ६७ ॥ व्यास उवाच । सत्य सत्यं पुन सत्य
भुजमुत्थाप्य चोच्यते । न वेदात् पर शास्त्रं न
देव केशवात्पर ॥ ६८ ॥ धन्वन्तरिरुवाच । अ-
च्युतानन्त गोविन्द नामोच्चरणभेषजात् । नश्यन्ति
सकला रोगा सत्यं सत्य वदाम्यहम् ॥ ६९ ॥
मार्कण्डेय उवाच । सा हानिस्तन्महच्छिद्र सा
चान्धजडमूढता । यन्मुहूर्तं क्षण वापि वासुदेव न
चिन्तयेत ॥ ७० ॥ अगस्त्य उवाच । निमिष
निमिषार्धं वा प्राणिना विष्णुचिन्तनम् । क्रतुकोटि-
सहस्राणा ध्यानमेक विशिष्यते ॥ ७१ ॥ मनसा
कर्मणा वाचा ये स्मरन्ति जनार्दनम् । तत्र तत्र
कुरुक्षेत्र प्रयागो नैमिषं वनम् ॥ ७२ ॥ श्रीशुक
उवाच । आलोड्य सर्वशास्त्राणि विचार्येव पुन पुन ।
इदमेक सुनिष्पन्न ध्येयो नारायण सदा ॥ ७३ ॥
श्रीमहादेव उवाच । शरीर च नवच्छिद्र व्याधि
ग्रस्त कलेवरम् । औषध जाह्नवीतोयं वैद्यो ना
रायणो हरि ॥ ७४ ॥ शौनक उवाच ।

७० षट्पदीस्तोत्रम् (शंकराचार्य०) ।

श्रीगणेशाय नम । अविनयमपनय विष्णो दमय
न शमय विषयमृगतृष्णाम् । भूतदयां विस्ता-
य तारय ससारसागरत ॥ १ ॥ दिव्यधुनी-
करन्दे परिमलपरिभोगसच्चिदानन्दे श्रीपतिपदार-
विन्दे भवभयखेदच्छिदे वन्दे ॥ २ ॥ सत्यपि भेदा-
गमे नाथ तवाह न मामकीनस्त्वम् । सामुद्रो
हे तरङ्ग क्वचन समुद्रो न तारङ्ग ॥ ३ ॥ उ-
द्धृतनग नगभिदनुज दनुजकुलामित्र मित्रशशिदृष्टे
दृष्टे भवति प्रभवति न भवति किं भवतिरस्कार-
। ४ ॥ मत्स्यादिभिरवतारैरवतारवताऽवता सदा
सुधाम् । परमेश्वर परिपाल्यो भवता भवतापभी-
ऽहम् ॥ ५ ॥ दामोदर गुणमन्दिर सुन्दरवदनारवि-
द गोविन्द । भवजलधिमथनमन्दर परम दरमपनय
त्व मे ॥ ६ ॥ नारायण करुणामय शरण करवाणि
ावकौ चरणौ । इति षट्पदी मदीये वदनसरोजे

सदा वसतु ॥ ७ ॥ इति श्रीमत्परहंसपरिव्रा-
जकाचार्यश्रीमच्छंकराचार्यविरचित षट्पदीस्तोत्रं
सम्पूर्णम् ॥ ४० ॥

११ गर्भस्तुति (ब्र० कृ० जन्म०) ।

श्रीगणेशाय नम । देवा ऊचु । जगद्योनिरयो-
निस्त्वमनन्तोऽव्यय एव च । ज्योति स्वरूपो ह्य-
निश सगुणो निर्गुणो महान् ॥ १ ॥ भक्तानुरोधा-
त्साकारो निराकारो निरङ्कुश । निर्व्यूहो निखि-
लाधारो नि शङ्को निरुपद्रव ॥ २ ॥ निरूपाधिश्च
निर्लिप्तो निरीहो निधनान्तक । स्वात्माराम पूर्ण-
कामो निमिषो नित्य एव च ॥ ३ ॥ स्वेच्छामय
हेतु सर्व सर्वगुणाश्रय । सर्वदो दु खदो दुर्गो
नान्तक एव च ॥ ४ ॥ सुभगो दुर्भगो वाग्मी दु-
यो दुरत्यय । वदहेतुश्च वेदाश्च वेदाङ्गो वेदवि-
॥ ५ ॥ इत्येवमुक्त्वा देवाश्च प्रणेमुश्च मुहु-
हर्षाश्रुलोचना सर्वे ववृषु कुसुमानि च

। ६ ॥ द्विचत्वारिंशन्नामानि प्रातरुत्थाय य प-
ठेत् । दृढां भक्तिं हरेर्दास्य लभते वाञ्छित फलम् ।
। ७ ॥ इत्येव स्तवन कृत्वा देवास्ते स्वालय ययु ।
बभूव जलवृष्टिश्च निश्चेष्टा मथुरा पुरी ॥ ८ ॥ इति
श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखण्डे देवकृ-
ता गर्भस्तुति सपूर्णा ॥ ४१ ॥

१२ कृष्णस्तोत्रं (वसुदेवकृतम्) ।

श्रीगणेशाय नम वसुदेव उवाच । त्वामतीन्द्रि-
यमव्यक्तमक्षर निर्गुण विभुम् । ध्यानासाध्य च
सर्वेषा परमात्मानमीश्वरम् ॥ १ ॥ स्वेच्छामय
सर्वरूप स्वेच्छारूपधर परम् । निर्लिप्त परम ब्रह्म
बीजरूप सनातनम् ॥ २ ॥ स्थूलात्स्थूलतर प्रा-
प्तमतिसूक्ष्ममदर्शनम् । स्थित सर्वशरीरेषु साक्षि
रूपमदृश्यकम् ॥ ३ ॥ शरीरवन्त सगुणमशरीरं
गुणाकरम् । प्रकृतिं प्रकृतीश च प्राकृत प्रकृते
परम् ॥ ४ ॥ सर्वेशं सर्वरूपं च सर्वान्तकरमव्य-






क्षित ब्रह्मन्मर्वापत्स्वेव न कुलम् । तथा रक्षां कुरु पुनर्दावाग्नेर्मधुसूदन ॥ १ ॥ त्वमिष्टदेवताऽस्माकं त्वमेव कुलदेवता । स्रष्टा पाता च संहर्ता जगतां च जगत्पते ॥ २ ॥ वह्निर्वा वरुणो वापि चन्द्रो वा सूर्य एव च । यम कुबेर पवन ईशानाद्याश्च देवता ॥ ३ ॥ ब्रह्मेशशेषधर्मेन्द्रा मुनीन्द्रा मनव स्मृता । मानवाश्च तथा दैत्या यक्षराक्षसकिन्नरा ॥ ४ ॥ ये ये चराचराश्चैव सर्वे तव विभूतय । आविर्भावस्तिरोभाव सर्वेषां च तवेच्छया ॥ ५ ॥ अभय देहि गोविन्द वह्निसंहरणं कुरु। वय त्वा शरण यामो रक्ष न शरणागतान् ॥ ६ ॥ इत्येवमुक्त्वा ते सर्वे तस्थुर्ध्यात्वा पदाम्बुजम् । दूरीभूतस्तु दावाग्नि श्रीकृष्णामृतदृष्टित ॥ ७ ॥ दूरीभूते च दावाग्नौ ननृतुस्ते मुदान्विता । सर्वापद प्रणश्यन्ति हरिस्मरणमात्रत ॥ ८ ॥ इद स्तोत्र महापुण्य प्रातरुत्थाय य पठेत् । वह्नितो न भवेत्तस्य भय जन्मनि जन्मनि ॥ ९ ॥ शत्रुग्रस्ते च

दावाग्नौ विपत्तौ प्राणसंकटे । स्तोत्रमेतत्पठित्वा
तु मुच्यते नात्र संशय ॥ १० ॥ शत्रुसैन्य क्षय
याति सर्वत्र विजयी भवेत । इह लोके हरेर्भक्ति-
मन्ते दास्य लभेद्ध्रुवम् ॥ ११ ॥ इति श्रीब्रह्मवै-
वर्ते महापुराणे श्रीकृष्णजन्मखण्डे बालकृत श्रीकृ-
ष्णस्तोत्रम् ॥ ४३ ॥

१४ अच्युताष्टकम् (शंकराचार्यकृ०) ।

श्रीगणेशाय नम । अच्युताच्युत हरे परमात्मन्
राम कृष्ण पुरुषोत्तम विष्णो । वासुदेव भगवन्
अनिरुद्ध श्रीपते शमय दु खमशेषम् ॥ १ ॥ विश्व
मङ्गल विभो जगदीश नन्दनन्दन नृसिंह नरेन्द्र ।
मुक्तिदायक मुकुन्द मुरारे श्रीपते शमय दु खमशे-
षम् ॥ २ ॥ रामचन्द्र रघुनायक देव दीननाथ
दुरितक्षयकारिन् । यादवेन्द्र यदुभूषण यज्ञ श्रीपते
शमय दु खमशेषम् ॥ ३ ॥ देवकीतनय दु खद
राधिकारमण रम्यसुमूर्ते । दु खमोचन दया



धाना सुरकल्याणनिधाना । नारायण० ॥ ४ ॥
मञ्जुलगुञ्जाभूषा मायामानुषवेषा । नारायण० ॥ ५ ॥
राधाधरमधुरसिका रजनीकरकुलतिलका । नाराय
ण० ॥ ६ ॥ मुरलीगानविनोदा वेदस्तुतभूपादा ।
नारायण० ॥ ७ ॥ बर्हिनिबर्हापीडा नटनाटकफ-
णिक्रीडा । नारायण० ॥ ८ ॥ वारिजभूषाभरणा
राजिवरुक्मिणीरमणा । नारायण० ॥ ९ ॥ जलरु-
हदलनिभनेत्रा जगदारम्भकसूत्रा । नारायण नारा
यण० ॥ १० ॥ पातकरजनीसंहर करुणालय मामु-
द्धर । नारायण० ॥ ११ ॥ अघबकक्षयकंसारे के-
शव कृष्ण मुरारे । नारायण० ॥ १२ ॥ हाटकनि-
भपीताम्बर अभयं कुरु मे मावर । नारायण०
॥ १३ ॥ दशरथराजकुमारा दानवमदसंहारा । ना
रायण० ॥ १४ ॥ गोवर्धनगिरिरमणा गोपीमान
सहरणा । नारायण० ॥ १५ ॥ सरयूतीरविहारा
सज्जनऋषिमन्दारा । नारायण० ॥ १६ ॥ विश्वामि-



नश्यति तत्सर्वं शालग्रामशिलार्चनात् ॥ १३ ॥
नानावर्णमय चैव नानाभोगेन वेष्टितम् ।
तथा वरप्रसादेन लक्ष्मीकान्त वदाम्यहम् ॥ १४ ॥
नारायणोद्भवो देवश्चक्रमध्ये च कर्मणा । तथा
वरप्रसादेन लक्ष्मीकान्त वदाम्यहम् ॥ १५ ॥ कृष्णे
शिलातले यत्र सूक्ष्मं चक्रं सुदृश्यते । सौभाग्य
संततिं धत्ते सर्वसौख्यं ददाति च ॥ १६ ॥ वासु-
देवस्य चिह्नानि दृष्ट्वा पापै प्रमुच्यते । श्रीधर
सुकरे वामे हरिद्वर्णस्तु दृश्यते ॥ १७ ॥ वाराह-
रूपिणं देवं कूर्माङ्गैरपि चिह्नितम् । गोष्पदं तत्र
दृश्येत वाराहं वामनं तथा ॥ १८ ॥ पीतवर्णस्तु
देवाना रक्तवर्णं भयावहम् । नारसिंहो भवेद्देवो
मोक्षदं च प्रकीर्तितम् ॥ १९ ॥ शङ्खचक्रगदाकूर्माः
शङ्खो यत्र प्रदृश्यते । शङ्खवर्णस्य देवाना वामदे-
वस्य लक्षणम् ॥ २० ॥ दामोदरं तथा स्थूलं
मध्ये चक्रं प्रतिष्ठितम् ॥ पूर्णद्वारे च सकीर्णा पीत-
रेखा च दृश्यते ॥ २१ ॥ छत्राकारे भवेद्राज्यं

विष्णुनैवेद्यभक्षणात् ॥ ३१ ॥ विष्णो पा
पीता कोटिजन्माघनाशनम् । तस्मादष्टगुण
भूमौ बिन्दुनिपातनात् ॥ ३२ ॥ इति श्रीभवि
त्तरपुराणे गण्डकीशिलामाहात्म्ये श्रीकृष्णयु
धिष्ठिरसंवादे शालिग्रामस्तोत्रं सम्पूर्णम् ॥ ४७ ॥

१८ कृष्णाष्टकम् (शंकराचार्य०) ।

श्रीगणेशाय नमः । श्रियाश्लिष्टो विष्णुः स्थिरच
रगुरुर्वेदविषयो धिया साक्षी शुद्धो हरिरसुरहन्ताब्जन
नयनः । गदी शङ्खी चक्री विमलवनमाली स्थिररुचि
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ १ ॥
यतः सर्वं जातं वियदनिलमुख्यं जगदिदं स्थितौ
निःशेषं योऽवति निजसुखांशेन मधुहा । लये सर्वं
स्वस्मिन् हरति कलया यस्तु स विभुः शरण्यो
लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ २ ॥

अमूनायम्यादौ यमनियममुख्यैः सुकरणैर्निरुध्येदं चित्तं हृदि विलयमानीय सकलम् । यमीड्यं पश्यन्ति प्रवरमतयो मायिनमसौ शरण्यो लोकेशो मम० ॥ ३ ॥ पृथिव्यां तिष्ठन् यो यमयति महीं वेद न धरा यमित्यादौ वेदो वदति जगतामीशममलम् । नियन्तारं ध्येयं मुनिसुरनृणां मोक्षदमसौ शरण्यो लोकेशो मम० ॥ ४ ॥ महेन्द्रादिर्देवो जयति दितिजान् यस्य बलतो न कस्य स्वातन्त्र्यं क्वचिदपि कृतौ यत्कृतिमृते । कवित्वादेर्गर्वं परिहरति योऽस्मो विजयिनः शरण्यो लोकेशो मम० ॥ ५ ॥ विना यस्य ध्यानं व्रजति पशुतां सूकरमुखां विना यस्य ज्ञानं जनिमृतिभयं याति जनता । विना यस्य स्मृत्या कृमिशतजनिं याति स विभुः शरण्यो लोकेशो मम० ॥ ६ ॥ निगमनद्रोत्तटः शरणशरणो भ्रान्तिहरणो घनश्यामो वामो व्रजशिशुवयस्योऽर्जुनसखः । स्वयंभूर्भूतानां जनक उचिताचारसुखदः शरण्यो लोके-

देहि करावलम्बम् ॥ २ ॥ संसारघोरगहने चरतो मुरारे मारोग्रभीकरमृगप्रवरार्दितस्य । आर्तस्य मत्सरनिदाघनिपीडितस्य लक्ष्मीनृसिंह० ॥ ३ ॥ संसारकूपमतिघोरमगाधमूलं संप्राप्य दुःखशतसर्पसमाकुलस्य । दीनस्य देव कृपणापदमागतस्य लक्ष्मीनृसिंह० ॥ ४ ॥ संसारसागरविशालकरालकालनक्रग्रहग्रसननिग्रहविग्रहस्य । व्यग्रस्य रागरसनोर्मिनिपीडितस्य लक्ष्मीनृसिंह० ॥ ५ ॥ संसारवृक्षमघबीजमनन्तकर्मशाखाशतं करणपत्रमनङ्गपुष्पम् । आरुह्य दुःखफलितं पततो दयालो लक्ष्मीनृसिंह० ॥ ६ ॥ संसारसर्पघनवक्त्रभयोग्रतीव्रदंष्ट्राकरालविषदग्धविनष्टमूर्तेः । नागारिवाहन सुधाब्धिनिवास शौरे लक्ष्मीनृसिंह० ॥ ७ ॥ संसारदावदहनातुरभीकरोरुज्वालावलीभिरतिदग्धतनूरुहस्य । त्वत्पादपद्मसरसीशरणागतस्य लक्ष्मीनृसिंह० ॥८ ॥ संसारजालपतितस्य जगन्निवास सर्वेन्द्रियार्थबडिशार्थझषोपमस्य । प्रोत्खण्डितप्रचुरतालुकमस्तकस्य

लक्ष्मीनृसिंह० ॥ ९ ॥ समारभीकरकरीन्द्रकला-
भिघातनिष्पिष्टमर्मवपुष सकलार्तिनाश । प्राण-
प्रयाणभवभीतिसमाकुलस्य लक्ष्मीनृसिंह० ॥ १० ॥
अन्धस्य मे हृतविवेकमहाधनस्य चौरै प्रभो ब
लिभिरिन्द्रियनामधेयै । मोहान्धकूपकुहरे वि-
निपातितस्य लक्ष्मीनृसिंह० ॥ ११ ॥ लक्ष्मीपते
कमलनाभ सुरेश विष्णो वैकुण्ठ कृष्ण मधुसूदन
पुष्कराक्ष । ब्रह्मण्य केशव जनार्दन वासुदेव देवेश
देहि कृपणस्य करावलम्बम् ॥ १२ ॥ यन्मायपोर्जि-
तवपु प्रचुरप्रवाहमगार्थमत्र निवहोरुकरावलम्बम् ।
लक्ष्मीनृसिंहचरणाब्जमधुव्रतेन स्तोत्र कृत सुख
कर भुवि शकरेण ॥ १३ ॥ इति श्रीमत्परमहस
परिव्राजकाचार्यश्रीमच्छकराचार्यविरचित सकट-
नाशन लक्ष्मीनृसिंहस्तोत्र सपूर्णम् ॥ ४९ ॥

२० ज्वरस्तोत्रं (भागवते) ।

श्रीगणेशाय नम । विद्राविते भूतगणे ज्वरस्तु

त्रिशिरास्त्रिपात् । अभ्यपद्यत दाशार्हं दहन्निव दि-
शो दश । अथ नारायणो देवस्तं दृष्ट्वा व्यसृजज्
ज्ज्वरम् ॥ १ ॥ माहेश्वरो वैष्णवश्च युयुधाते
ज्वरावुभौ । माहेश्वरः समाक्रन्दन्वैष्णवेन बलार्दि-
तः ॥ २ ॥ अलब्ध्वाऽभयमन्यत्र भीतो माहेश्वरो
ज्वरः । शरणार्थी हृषीकेशं तुष्टाव प्रयताञ्जलिः
॥ ३ ॥ ज्वर उवाच । नमामि त्वाऽनन्तशक्तिं परे-
शं सर्वात्मानं केवलं ज्ञप्तिमात्रम् । विश्वोत्पत्ति-
स्थानसंरोधहेतुं यत्तद्ब्रह्म ब्रह्मलिङ्गं प्रशान्तम्
॥ ४ ॥ कालो दैवं कर्म जीवः स्वभावो द्रव्यं क्षेत्रं
प्राण आत्मा विकारः । तत्संघातो बीजरोहप्रवाह-
स्त्वन्मायैषा तन्निषेधं प्रपद्ये ॥ ५ ॥ नानाभावै-
र्लीलयैवोपपन्नैर्देवान्साधून् लोकसेतून्बिभर्षि । हं-
स्युन्मार्गान् हिंसया वर्तमानान् जन्मैतत्ते भारहा-
राय भूमेः ॥ ६ ॥ तप्तोऽहं ते तेजसा दुःसहेन
शान्तोग्रेणात्युल्बणेन ज्वरेण । तावत्तापो देहिनां
तेऽङ्घ्रिमूलं नो सेवेरन्यावदाशानुबद्धाः ॥ ७ ॥ श्री

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

साध्वीं पत्नीं त्रैलोक्यमोहिनीम् ॥ १३ ॥ इति
श्रीमोहिनीकृत कृष्णस्तोत्रं समाप्तम् ॥ ५१ ॥

२२ कृष्णस्तोत्रम् (ब्रह्मदेवकृतम्)।

श्रीगणेशाय नमः । ब्रह्मोवाच । रक्ष रक्ष हरे
मां च निमग्नं कामसागरे । दुष्कीर्तिजलपूर्णे च
दुष्पारे बहुसंकटे ॥ १ ॥ भक्तिविस्मृतिबीजे च
विपत्सोपानदुस्तरे । अतीवनिर्मलज्ञानचक्षुः प्र
च्छन्नकारणे ॥ २ ॥ जन्मोर्मिसंगसहिते योषिन्न-
क्रौघसंकुले । रतिस्रोतः समायुक्ते गम्भीरे घोर एव
च ॥ ३ ॥ प्रथमामृतरूपे च परिणामविषालये ।
यमालयप्रवेशाय मुक्तिद्वारातिविस्मृतौ ॥ ४ ॥
बुद्ध्या तरण्या विज्ञानैरुद्धरास्मानतः स्वयम् । स्वयं
च त्वं कर्णधारः प्रसीद मधुसूदन ॥ ५ ॥ मद्विधाः
कतिचिन्नाथ नियोज्या भवकर्मणि । सन्ति विश्वे
विधयो हे विश्वेश्वर माधव ॥ ६ ॥ न कर्म
क्षेत्रमेवेदं ब्रह्मलोकोऽयमीप्सितः । तथापि

सर्वाधार नमामि तम् ॥ ३ ॥ राधाहृत्पद्ममध्ये च
वसन्त सतत शुभम् । राधासहचर शश्वद्राधाज्ञा-
परिपालकम् ॥ ४ ॥ ध्यायन्ते योगिनो योगान्
सिद्धा सिद्धेश्वराश्च यम् । त ध्यायेत्सतत शुद्ध
भगवन्ते सनातनम् ॥ ५ ॥ सेवन्ते सतत सन्तो ब्रह्मे-
शशेषसज्ञका । सेवन्ते निर्गुण ब्रह्म भगवन्त सनात-
नम् ॥ ६॥ निर्लिप्त च निरीह च परमात्मानमीश्वरम् ।
नित्य सत्य च परम भगवन्त सनातनम् ॥ ७ ॥
य सृष्टेरादिभूत च सर्वबीज परात्परम् । योगिनस्त
प्रपद्यन्ते भगवन्त सनातनम् ॥ ८ ॥ बीज नानावता-
राणा सर्वकारणकारणम् । वेदावेद्य वेदबीज वेद-
कारणकारणम् ॥ ९ ॥ योगिनस्त प्रपद्यन्ते भग-
वन्त सनातनम् । इत्येवमुक्त्वा गन्धर्वः पपात ध-
रणीतले ॥ १० ॥ ननाम दण्डवद्भूमौ देवदेव परा
त्परम् । इति तेन कृत स्तोत्र य पठेत्प्रयत
शुचि ॥ ११ ॥ इहैव जीवन्मुक्तश्च पर याति
परा गतिम् । हरिभक्तिं हरेर्दास्य गोलोके च नि-

ण्यनारायणम् । लक्ष्मणेनान्वितो वानरैः सेवितोऽगस्त्यसंपूजितो राघवः पातु माम् ॥ ५ ॥ धेनुकारिष्टकोऽनिष्टकृद्द्वेषिणां केशिहा कंसहृद्वंशिकावादकः । पूतनाकोपकः सूरजाखेलनो बालगोपालकः पातु मां सर्वदा ॥ ६ ॥ विद्युदुद्द्योतवत्प्रस्फुरद्वाससं प्रावृडम्भोदवत्प्रोल्लसद्विग्रहम् । वन्यया मालया शोभितोरःस्थलं लोहिताङ्घ्रिद्वयं वारिजाक्षं भजे ॥ ७ ॥ कुञ्चितैः कुन्तलैर्भ्राजमानाननं रत्नमौलिं लसत्कुण्डलं गण्डयोः । हारकेयूरकं कङ्कणप्रोज्ज्वलं किङ्किणीमञ्जुलं श्यामलं तं भजे ॥ ८ ॥ अच्युतस्याष्टकं यः पठेदिष्टदं प्रेमतः प्रत्यहं पूरुषः सस्पृहम् । वृत्ततः सुन्दरं कर्तृ विश्वंभरं तस्य वश्यो हरिर्जायते सत्वरम् ॥ ९ ॥ इति श्रीमच्छंकराचार्यविरचितमच्युताष्टकं संपूर्णम् ॥ ५२ ॥

२९ मुकुन्दमाला (कुलशेखरराज०)।

श्रीगणेशाय नमः । वन्दे मुकुन्दमरविन्ददलायत-

न्द ॥ ३ ॥ मुकुन्द मूर्ध्ना प्रणिपत्य याचे भव-
रान्तमियन्तमर्थम् । अविस्मृतिस्त्वच्चरणारवि-
भवे भवे मेऽस्तु तव प्रसादात् ॥ ४ ॥ श्रीगो-
दपदाम्भोजमधुनो महदद्भुतम् । तत्पायिनो न
न्ति मुञ्चन्ति यदपायिन ॥ ५ ॥ नाहं वन्दे तव
ायोर्द्वन्द्वमद्वन्द्वहेतोः कुम्भीपाकं गुरुमपि हरे नारक
नेतुम् । रम्यारामामृदुतनुलतानन्दनेनापि रन्तु
भवे हृदयभवने भावयेयं भवन्तम् ॥ ६ ॥
ा धर्मे न वसुनिचये नैव कामोपभोगे यद्भा-

अदेहि ॥ १८ ॥ पृथ्वीरेणुरणु पयामि कणिम
फल्गु स्फुलिङ्गो लघुस्तेजो नि श्वसन मरुत्तनुत
रन्ध्र सुसूक्ष्म नभ । क्षुद्रा रुद्रपितामहप्रभृतय की
टा समस्ता सुरा दृष्टा यत्र स तारको विजय
श्रीपादधूलीकण ॥ १९॥ आम्नायाभ्यसनान्यरण्य
रुदित कृच्छ्रव्रतान्यन्वह भेदच्छेदपदानि पूर्तविधि
य सर्व हुत भस्मनि । तीर्थानामवगाहनानि च
गजस्नान विना यत्पदद्वन्द्वाम्भोरुहसंस्तुति विजय
देव स नारायण ॥ २० ॥ आनन्द गोविन्द मु
कुन्द राम नारायणानन्त निरामयेति । वक्तु सम
र्थोऽपि न वक्ति कश्चिदहो जनाना व्यसनानि
मोक्षे ॥ २१ ॥ क्षीरसागरतरङ्गसीकरासारतारकि
तचारुमूर्तये । भोगिभोगशयनीयशायिने माध
वाय मधुविद्विषे नम ॥ २२ ॥ इति श्रीकुलशेख
रेण राज्ञा विरचिता मुकुन्दमाला सम्पूर्णा ॥ ५५ ।

२६ कृष्णस्तोत्रं (इन्द्रकृत ब्रह्मवैवर्ते)

श्रीगणेशाय नम । इन्द्र उवाच । अक्षर परम

चर्वितताम्बूल गृह्णन्त कुत्रचिन्मुदा ॥ १० ॥
न्त कुत्रचिद्राधा पश्यन्तीं वक्रचक्षुषा। दत्तवन्तं
धार्ये कृत्वा माला च कुत्रचित ॥ ११ ॥ कु-
द्राधया सार्धं गच्छन्त रासमण्डलम्। राधादत्तां
माला धृतवन्तं च कुत्रचित ॥ १२ ॥ सार्धं गो-
काभिश्च विहरन्त च कुत्रचित। राधा गृहीत्वा
च्छन्त विहाय ता च कुत्रचित ॥ १३ ॥ विप्रपत्नी-
न्न भुक्तवन्त च कुत्रचित। भुक्तवन्त तालफलं
कै सह कुत्रचित ॥ १४ ॥ वस्त्र गोपालिकानां
रन्त कुत्रचिन्मुदा। गवा गण व्याहरन्त कुत्रचि-
र्कै सह ॥१५॥ कालीयमूर्ध्नि पादाब्ज दत्तवन्तं
त्रचित। विनोदमुरलीशब्द कुर्वन्त कुत्रचिन्मुदा
६ ॥ गायन्त रम्यसंगीत कुत्रचिद्बालकै सह ।
श्रा ग्रक स्तवेन्द्रेण प्रणनाम हरिं भिया
७ ॥ पुरा दत्तेन गुरुणा रणे वृत्रासुरेण च ।
ान दत्त कृपया ब्रह्मणे च तपस्यत ॥ १८ ॥
द्शाक्षरो मन्त्र कवच सर्वलक्षणम्। दत्तमेत-

चाखिल विश्वमीश्वर । महाविराण्महाविष्णुस्त्व
तस्य जनको विभो ॥ ४ ॥ तेजस्त्व चापि तेज
स्वी ज्ञान ज्ञानी च तत्पर । वेदेऽनिर्वचनीयस्त्व
कस्त्वा स्तोतुमिहेश्वर ॥ ५ ॥ महदादिसृष्टिसूत्र
पञ्चतन्मात्रमेव च । बीजं त्व सर्वशक्तीना सर्वश
क्तिस्वरूपक ॥ ६ ॥ सर्वशक्तीश्वर सर्व सर्वश
क्त्याश्रय सदा । त्वमनीह स्वयञ्ज्योति सर्वा
नन्द सनातन ॥ ७ ॥ अहो आकारहीनस्त्व स-
र्वविग्रहवानपि । सर्वेन्द्रियाणा विषय जानामि ने-
न्द्रियी भवान् ॥ ८ ॥ सरस्वती जडीभूता यत्स्तोत्रे
यन्निरूपणे । जडीभूतो महेशश्च शेषो धर्मो वि-
धि स्वयम् ॥ ९ ॥ पार्वती कमला राधा सावित्री
वेदसूरपि । वेदश्च जडता याति के वा शक्ता वि
पश्चित ॥ १० ॥ स्वय किं स्तवन कुर्म स्त्रिय
प्राणेश्वरेश्वर । प्रसन्नो भव नो देव दीनबन्धो कृपा
कुरु ॥ ११ ॥ इति पेतुश्च ता विप्रपत्न्यस्तच्च
रणाम्बुजे । अभय प्रददौ ताभ्य प्रसन्नवदनेक्षण

[illegible] मिन
[illegible] नत
[illegible] मिली
[illegible] ॥
[illegible] याना
[illegible] रिका
[illegible] मरा न
[illegible] निकरा
[illegible] गति
[illegible]

कण्ठं विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कम् ॥ १ ॥ चक्र्यग्रतः सहगदो हरिरस्तु पश्चात्तत्पार्श्वयोर्धनुरसी मधुहाऽजनश्च । कोणेषु शङ्ख उरुगाय उपर्युपेन्द्रस्तार्क्ष्यः क्षितौ हलधरः पुरुषः समन्तात् ॥ २ ॥ इन्द्रियाणि हृषीकेशः प्राणान्नारायणोऽवतु । श्वेतद्वीपपतिश्चित्तं मनो योगेश्वरोऽवतु ॥ ३ ॥ पृश्निगर्भश्च ते बुद्धिमात्मानं भगवान्परः । क्रीडन्तं पातु गोविन्दः शयानं पातु माधवः ॥ ४ ॥ व्रजन्तमव्याद्वैकुण्ठ आसीनं त्वां श्रियः पतिः । भुञ्जानं यज्ञभुक्पातु सर्वग्रहभयंकरः ॥ ५ ॥ डाकिन्यो यातुधान्यश्च कूष्माण्डा येऽर्भकग्रहाः । भूतप्रेतपिशाचाश्च यक्षरक्षोविनायकाः ॥ ६ ॥ कोटरा रेवती ज्येष्ठा पूतना मातृकादयः । उन्मादा ये ह्यपस्मारा देहप्राणेन्द्रियद्रुहः ॥ ७ ॥ स्वप्नदृष्टा महोत्पाता वृद्धबालग्रहाश्च ये । सर्वे नश्यन्तु ते विष्णोर्नामग्रहणभीरवः ॥ ८ ॥ इति श्रीमद्भागवते दशमस्कन्धे गोपीकृतबालरक्षा समाप्ता ॥ ५९ ॥ ॥

रुषोत्तमम् ॥ ३ ॥ विश्वरूप वासुदेव
ण हरिम् । दामोदरं श्रीधर च वे-
धजम् ॥ ४ ॥ अनन्त कृष्णगोपाल
त पातकम् । गवां कोटिप्रदानस्य अ-
च ॥ ५ ॥ कन्यादानसहस्राणां फ-
मानव । अमायां वा पौर्णमास्या-
थैव च ॥ ६ ॥ सन्ध्याकाले स्मरेन्नित्यं
थैव च । मध्याह्ने च जपन्नित्यं सर्व-
यते ॥७॥ इति श्रीकृष्णार्जुनसंवादे वि-

वा१८
त्तमम्
सम् ।
॥ ५
श्रीशर्म

ष्णोरष्टाविंशतिनामस्तोत्रं संपूर्णम् ॥ श्रीकृष्णार्पणमस्तु ॥ ६० ॥

३१ विष्णुशतनामस्तोत्रप्रारम्भः ।

श्रीगणेशाय नमः । नारद उवाच ॥ ॐ वासुदेवं हृषीकेशं वामनं जलशायिनम् । जनार्दनं हरिं कृष्णं श्रीवक्षं गरुडध्वजम् ॥ १ ॥ वाराहं पुण्डरीकाक्षं नृसिंहं नरकान्तकम् । अव्यक्तं शाश्वतं विष्णुमनन्तमजमव्ययम् ॥ २ ॥ नारायणं गदाध्यक्षं गोविन्दं कीर्तिभाजनम् । गोवर्धनोद्धरं देवं भूधरं भुवनेश्वरम् ॥ ३ ॥ वेत्तारं यज्ञपुरुषं यज्ञेशं यज्ञवाहकम् । चक्रपाणिं गदापाणिं शङ्खपाणिं नरोत्तमम् ॥ ४ ॥ वैकुण्ठं दुष्टदमनं भूगर्भं पीतवाससम् । त्रिविक्रमं त्रिकालज्ञं त्रिमूर्तिं नन्दिकेश्वरम् ॥ ५ ॥ रामं रामं हयग्रीवं भीमं रौद्रं भवोद्भवम् । श्रीपतिं श्रीधरं श्रीशं मङ्गलं मङ्गलायुधम् ॥ ६ ॥ दामोदरं दमोपेतं केशवं केशिसूदनम् । वरेण्यं

आ सत्यव्रतः सुधी । विरक्त इन्द्रियार्थेभ्यस्त्यक्त्वा पुत्रगृहादिकम् ॥ १ ॥ वृन्दावने स्थितः कृष्णमाराध दिवानिशम् । निःस्वः सत्यव्रतो विप्रो निर्जनेऽव्ययमानम ॥ २ ॥ कार्तिके पूजयामास प्रीत्या दामोदरं नृप । तृतीयेऽह्नि सकृद्भक्त्या पत्र मूलं फलं तथा ॥ ३ ॥ पूजयित्वा हरिं स्तौति प्रीत्या दामोदराभिधम् ॥ ४ ॥ सत्यव्रत उवाच । नमामीश्वरं सच्चिदानन्दरूपं लसत्कुण्डलं गोकुले भ्राजमानम् । यशोदाभियोलूखले धावमानं परामृष्टमत्यन्ततो द्रुत्य गोप्या ॥ ५ ॥ रुदन्तं मुहुर्नेत्रयुग्मं मृजन्तं कराम्भोजयुग्मेन सातङ्कनेत्रम् । मुहुः श्वासकम्पत्रिरेखाङ्ककण्ठ स्थित नौमि दामोदरं भक्तिबद्धम् ॥ ६ ॥ वरं देव मोक्षं न मोक्षावधिं वा न चान्यं वृणेऽहं वरेशादपीह । इदं ते वपुर्नाथ गोपालबालं सदा मे मनस्याविरास्तां किमन्यैः ॥ ७ ॥ इदं ते मुखाम्भोजमत्यन्तनीलैर्वृतं कुन्तलैः स्निग्धरक्तैश्च गोप्या । मुहुश्चुम्बितं बिम्बरक्ताधरं मे मनस्याविरास्तामलं लक्षलाभैः ॥ ८ ॥

नमो देव दामोदरानन्त विष्णो प्रसीद प्रभो दुःख-जालाब्धिमग्नम् । कृपादृष्टिवृष्ट्याऽतिदीनं च रक्ष गृहाणेश मामज्ञमेवाक्षिदृश्यम् ॥ ९ ॥ कुवेरात्मजौ वृक्षमूर्ती च यद्वत्त्वया मोचितौ भक्तिभाजौ कृतौ च । तथा प्रेमभक्तिं स्वकां मे प्रयच्छ न मोक्षे ग्रहो मेऽस्ति दामोदरेह ॥ १० ॥ नमस्ते सुदाम्ने स्फुरद्दीप्तधाम्ने तथोरस्थविश्वस्य धाम्ने नमस्ते । नमो राधिकायै त्वदीयप्रियायै नमोऽनन्तलीलाय देवाय तुभ्यम् ॥ ११ ॥ नारद उवाच । सत्यव्रतद्विजस्तोत्रं श्रुत्वा दामोदरो हरिः । विद्युल्लीलाचमत्कारो हृदये शनकैरभूत् ॥ १२ ॥ इति श्रीसत्यव्रतकृतदामोदरस्तोत्रं सम्पूर्णम् ॥ ६३ ॥

३४ अथ हरिमीडेस्तोत्रप्रारम्भः ।

श्रीगणेशाय नमः । स्तोष्ये भक्त्या विष्णुमनादिं जगदादिं यस्मिन्नेतत्संसृतिचक्रं भ्रमतीत्थम् । यस्मिन् दृष्टे नश्यति तत्संसृतिचक्रं तं समारध्वान्तवि-

नोऽन्य हरिमीडे ॥ १ ॥ यस्यैकांशादित्थमशेषं जग-
देतत् प्रादुर्भूतं येन पिनद्धं पुनरित्थम् । येन व्याप्तं
येन विबुद्धं सुखदुःखैस्तैः ससाऽध्वान्तविनाशं ह-
रिमीडे ॥ २ ॥ सर्वज्ञो यो यश्च हि सर्वः सकलो यो
यश्चानन्दोऽनन्तगुणो यो गुणधामा । यश्चाव्यक्तो
व्यस्तसमस्तः सदसद्यस्तं ससा० ॥ ३ ॥ यस्माद-
न्यन्नास्त्यपि नैवं परमार्थं दृश्यादन्यो निर्विषयज्ञा-
नमयत्वात् । ज्ञातृज्ञानज्ञेयविहीनोऽपि सदा ज्ञस्तं स-
सा० ॥ ४ ॥ आचार्येभ्यो लब्धसुसूक्ष्माच्युततत्त्वा
वैराग्येणाभ्यासबलाच्चैव द्रढिम्ना । भक्त्येकाग्रध्यान-
परा यं विदुरीशं तं ससा० ॥ ५ ॥ प्राणानायम्यो-
मिति चित्तं हृदि रुद्ध्वा नान्यत्स्मृत्वा तत्पुनरत्रैव
विलाप्य । क्षीणे चित्ते भादृशिरस्मीति विदुर्यं तं
ससा० ॥ ६ ॥ यं ब्रह्माख्यं देवमनन्यं परिपू-
र्णं हृत्स्थं भक्तैर्लभ्यमजं सूक्ष्ममतर्क्यम् । ध्या-
त्वात्मस्थं ब्रह्मविदो यं विदुरीशं तं ससा० ॥ ७ ॥
मात्रातीतं स्वात्मविकाशात्मविबोधं ज्ञेयातीतं ज्ञा

न्मय हृद्युपलभ्यम् । भावग्राह्यानन्दमनन्य चै
विदुर्यं तं ससार० ॥ ८ ॥ यद्यद्वेद्य वस्तुसतत्त्व
विषयाख्य तत्तद्ब्रह्मैवेति विदित्वा तदहं च । ध्या
यन्त्येव य सनकाद्या मुनयोऽज त ससार०॥९॥ यद्य
द्वेद्य तत्तदहं नेति विहाय स्वात्मज्योतिर्ज्ञानमयान
न्दमवाप्य । तस्मिन्नस्मीत्यात्मविदो य विदुरीश
त ससार० ॥ १० ॥ हित्वा हित्वा दृश्यमशेष स
विकल्प मत्वा शिष्ट भाद्दशिमात्र गगनाभम् ।
त्यक्त्वा देहं य प्रविशन्त्यच्युतभक्तास्त ससार०
॥ ११ ॥ सर्वत्रास्ते सर्वशरीरी न च सर्व । सर्वं वे
त्त्येवेह न य वेत्ति च सर्व । सर्वत्रान्तर्यामितयेत्थं
यमनन्यस्त स० ॥ १२ ॥ सर्वं दृष्ट्वा स्वात्मनि
युक्त्वा जगदेतद् दृष्ट्वात्मानं चैवमज सर्वजनेषु । स-
र्वात्मैकोऽस्मीति विदुर्यं जनहृत्स्थ त ससार० ॥ १३ ॥
सर्वत्रैव पश्यति जिघ्रत्यथ भुङ्क्ते स्पृष्टा श्रोता बु
द्ध्यति चेत्याहुरिम यम् । साक्षी चास्ते कर्तृषु प
श्यन्निति चान्ये त स० ॥ १४ ॥ पश्यन् शृण्वन्न

न्मयं हृद्युपलभ्यम् । भावग्राह्यानन्दमनन्यं चे
विदुर्यं त समार० ॥ ८ ॥ यद्यद्वेद्यं वस्तुसतत्त्वं
विषयाख्यं तत्तद्ब्रह्मैवेति विदित्वा तदहं च । ध्या-
यन्त्येवं य मनसा धीरा मुनयोऽज त मसार०॥९॥ यद्य-
द्वेद्यं तत्तदहं नेति विहाय स्वात्मज्योतिर्ज्ञानमयान-
न्दमवाप्य । तस्मिन्नस्मीत्यात्मविदो य विदुरीश
त ससार० ॥ १० ॥ हित्वा हित्वा दृश्यमशेषं स-
विकल्पं मत्वा शिष्ट भादृग्मात्र गगनाभम् ।
त्यक्त्वा देहं य प्रविशन्त्यच्युतभक्तास्त ससार०
॥ ११ ॥ सर्वत्रास्ते सर्वशरीरी न च सर्वं । सर्वं वे
त्त्येवेह न य वेत्ति च सर्वं । सर्वत्रान्तर्यामिनयेत्थ
यमनन्यस्त म० ॥ १२ ॥ सर्वं दृष्ट्वा स्वात्मनि
युक्त्या जगदेतद् दृष्ट्वात्मानं चैवमज सर्वजनेषु । स
र्वात्मैकोऽस्मीति विदुर्यं जनहृत्स्थं त समार० ॥ १३ ॥
सर्वत्रैक पश्यति जिघ्रत्यथ भुङ्क्ते स्प्रष्टा श्रोता बु
ध्यति चेत्याहुरिम यम् । साक्षी चास्ते कर्तृषु प-
श्यन्निति चान्य त म० ॥ १४ ॥ पश्यन् शृण्वन्नत्र

च्छक्त्यधिरूढस्त स० ॥ २१ ॥ सृष्ट्वा सर्वं स्वात्मतयैवेत्थमतर्क्यं व्याप्याथान्त कृत्स्नमिदं सृष्टमशेषम् । सच्च त्यच्चाभूत्परमात्मा स य एकस्त स० ॥ २२ ॥ वेदान्तैश्चाध्यात्मिकशास्त्रैश्च पुराणैः शास्त्रैश्चान्यैः सात्वततन्त्रैश्च यमीशम् । दृष्ट्वाऽथान्तश्चेतसि बुद्ध्या विविशुर्यं त स० ॥ २३ ॥ श्रद्धाभक्तिध्यानशमाद्यैर्यतमानैर्ज्ञातुं शक्यो देव इहैवाशु य ईशः । दुर्विज्ञेयो जन्मशतैश्चापि विना तैस्त स० ॥ २४ ॥ यस्यातर्क्यं स्वात्मविभूतेः परमार्थं सर्वं खल्वित्यत्र निरुक्तं श्रुतिविद्भिः । तज्जातित्वादब्धितरङ्गाभमभिन्नं त स० ॥ २५ ॥ दृष्ट्वा गीतास्वक्षरतत्त्वं विधिनाजं भक्त्या गुर्व्या लभ्यहृदिस्थं दृशिमात्रम् । ध्यात्वा तस्मिन्नस्म्यहमित्यत्र विदुर्यं त ममार० ॥ २६ ॥ क्षेत्रज्ञत्वं प्राप्य विभुः पञ्चमुखैर्यो भुङ्क्तेऽजस्रं भोग्यपदार्थान् प्रकृतिस्थः । क्षेत्रे क्षेत्रेऽप्स्विन्दुवदेको बहुधाऽऽस्ते त स० ॥ २७ ॥ युक्त्यालोड्य व्यासवचांस्यत्र हि लभ्यः क्षेत्रे क्षे-



३६ गोपालस्तोत्रम् (नारदपञ्चरात्रे)।

श्रीगणेशाय नम । श्रीनारद उवाच । नवीननीरदश्यामं नीलेन्दीवरलोचनम्। वल्लवीनन्दनं वन्दे कृष्णं गोपालरूपिणम् ॥ १ ॥ स्फुरद्बर्हदलोद्बद्धनीलकुञ्चितमूर्धजम् । कदम्बकुसुमोद्बद्धवनमालाविभूषितम्॥२॥गण्डमण्डलसंसर्गिचलत्काञ्चितकुन्तलम्। स्थूलमुक्ताफलोदारहारद्योतितवक्षसम् ॥ ३ ॥ हेमाङ्गदतुलाकोटिकिरीटोज्ज्वलविग्रहम् । मन्दमारुतसंक्षोभचलिताम्बरसचयम् ॥ ४ ॥ रुचिरोष्ठपुटन्यस्तवंशीमधुरनिस्वनै । लसद्गोपालिकाचेतो मोहयन्तं पुन पुन ॥ ५ ॥ वल्लवीवदनाम्भोजमधुपानमधुव्रतम् । क्षोभयन्तं मनस्तासां सस्मेरापाङ्गवीक्षणै ॥ ६ ॥ यौवनोद्भिन्नदेहाभि संसक्ताभि परस्परम् । विचित्राम्बरभूषाभिर्गोपनारीभिरावृतम् ॥ ७ ॥ प्रभिन्नाञ्जनकालिन्दीजलकेलिकलोत्सुकम् । योधयन्तं क्वचिद्गोपान् व्याहरन्तं गवां गणम् ॥ ८ ॥ का-

जायते ध्रुवम् ॥ १७ ॥ इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे गोपालस्तोत्रं समाप्तम् ॥ ६६ ॥

३७ गोपालविंशतिः ।

श्रीगणेशाय नमः । श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी । वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥ १ ॥ वन्दे वृन्दावनचरं वल्लवीजनवल्लभम् । जयन्तीसम्भवं धाम वैजयन्तीविभूषणम् ॥ २ ॥ वाचं निजाङ्करसिकां प्रसमीक्षमाणो वक्त्रारविन्दविनिवेशितपाञ्चजन्यः । वर्णत्रिकोणरुचिरे वरपुण्डरीके बद्धासनो जयति वल्लवचक्रवर्ती ॥ ३ ॥ आम्नायगन्धरुचिरस्फुरिताधरोष्ठमास्राविलेक्षणमनुक्षणमन्दहासम् । गोपालडिम्भवपुषं कुहनाजनन्याः प्राणस्तनन्धयमवैमि परं पुमांसम् ॥ ४ ॥ आविर्भवत्वनिभृताभरणं पुरस्तादाकुञ्चितैकचरणं निहितान्यपादम् । दध्ना निबद्धमुखरेण निबद्धतालं नाथस्य नन्दभवने नवनीतनाट्यम् ॥ ५ ॥ कुन्दप्रसून

विरस्तु चित्ते । कलहायितकुन्तलं कलापैः करुणोन्मादकविभ्रमं महो मे ॥ १२ ॥ अनुयायिमनोज्ञवंशनालैरवतु स्पर्शितवल्लवीविमोहैः । अनवसितशीतलैरमो मामनुकम्पासरिदम्बुजेरपाङ्गैः ॥ १३ ॥ अधराहितचारुवंशनालः मुकुटालम्बिमयूरपिञ्छमालः । हरिनीलशिलाविभङ्गलीलः प्रतिभास्वन्तु ममान्तिमप्रयाणे ॥ १४ ॥ अखिलानवलोकयामि कालान्महिलाधीनभुजान्तरस्य यूनः । अभिलाषपदं व्रजाङ्गनानामभिलापक्रमदूरमाभिरूप्यम् ॥ १५ ॥ महसे महिताय मौलिना विनतेनाञ्जलिमञ्जनत्विषे । कलयामि विदग्धवल्लवीवलयाभाषितमञ्जुवेणवे ॥ १६ ॥ जयतु ललितनृत्यं शिक्षको वल्लवीनां शिथिलवलयशिञ्जाशीतलैर्हस्तनालैः । अखिलभुवनरक्षागोपवेषस्य विष्णोरधरमणिसुधाया वंशवान्वंशनालः ॥ १७ ॥ चित्राकल्पश्रवसि कलयन् लाङ्गलीकर्णपूरं बर्होत्तंसस्फुरितचिकुरो बन्धुजीवं दधानः । गुञ्जाबद्धामुरसि ललितां धारयन् हार-

यष्टिं गोपस्त्रीणां जयति कितव कोऽपि कौमारहारी ॥ १८ ॥ लीलायष्टिं करकिसलये दक्षिणे न्यस्य धन्यामंसे देव्या पदकनिविडे सन्निविष्टान्यबाहुः । मेघश्यामो जयति ललितो मेखलादत्तवेणुर्गुञ्जापीडस्फुरितचिकुरो गोपकन्याभुजङ्गः ॥ १९ ॥ प्रत्यालीढस्थितिमधिगता प्राप्तगाढाङ्गपाली पश्चादीषन्मिलितनयना प्रेयसीं प्रेक्षमाणः । भस्त्रायन्त्रप्रणिहितकरो भक्तजीवातुरव्याद्वारिक्रीडानिबिडवसनो बल्लवीवल्लभो नः ॥ २० ॥ वासो हृत्वा दिनकरसुतासन्निधौ बल्लवीनां लीलास्मेरो जयति ललितामास्थितः कुन्दशाखाम् । सव्रीडाभिस्तदनु वसनं ताभिरभ्यर्थ्यमानः कामी कश्चित्करकमलयोरञ्जलिं याचमानः ॥ २१ ॥ इत्यनन्यमनसा विनिर्मितां वेङ्कटेशकविना स्तुतिं पठन् । दिव्यवेणुरसिकं समीक्षते दैवतं किमपि यौवतप्रियम् ॥ २२ ॥ इति गोपालविंशतिः संपूर्णा ॥ ६७ ॥

३८ वेङ्कटेश्वरमङ्गलस्तोत्रम् ।

श्रीवेङ्कटेश्वराय नमः । श्रियः कान्ताय देवाय क-
ल्याणनिधयेऽर्थिनाम् । श्रीवेङ्कटनिवासाय श्रीनि-
वासाय मङ्गलम् ॥ १ ॥ लक्ष्मीसविभ्रमालोकसुभ्रू
विभ्रमचक्षुषे । चक्षुषे सर्वलोकानां वेङ्कटेशाय मङ्ग-
लम् ॥ २ ॥ श्रीवेङ्कटाद्रिशृङ्गाय मङ्गलाभरणाङ्घ्रये ।
मङ्गलानां निवासाय श्रीनिवासाय मङ्गलम् ॥ ३ ॥
सर्वावयवसौन्दर्यसंपदा सर्वचेतसाम् । सदा संमोह-
नायास्तु वेङ्कटेशाय मङ्गलम् ॥ ४ ॥ नित्याय नि-
रवद्याय सत्यानन्तचिदात्मने । सर्वान्तरात्मने श्रीम-
द्वेङ्कटेशाय मङ्गलम् ॥ ५ ॥ स्वतस्सर्वविदे सर्वश-
क्तये सर्वशेषिणे । सुलभाय सुशीलाय वेङ्कटेशाय
मङ्गलम् ॥ ६ ॥ परस्मै ब्रह्मणे पूर्णकामाय परमा-
त्मने । प्रपन्नपरतत्त्वाय वेङ्कटेशाय मङ्गलम् ॥ ७ ॥
अकालतत्त्वविश्रान्तावात्मानमनुपश्यताम् । अतृ-
प्त्यमृतरूपाय वेङ्कटेशाय मङ्गलम् ॥८॥ प्रायस्स्व-

चरणौ पुंसा शरणत्वेन पाणिना । कृपया दृश्यते श्रीमद्वेङ्कटेशाय मङ्गलम् ॥९॥ दयामृततरङ्गिण्यास्तरङ्गैरपि शीतलैः । अपाङ्गैस्सिञ्चते विश्व वेङ्कटेशाय मङ्गलम् ॥ १० ॥ स्रग्भूषाम्बरहेतीनां सुषमावहमूर्तये । सर्वार्तिशमनायास्तु वेङ्कटेशाय मङ्गलम् ॥ ११ ॥ श्रीवैकुण्ठविरक्ताय स्वामिपुष्करिणीतटे । रमया रममाणाय वेङ्कटेशाय मङ्गलम् ॥ १२ ॥ श्रीमत्सुन्दरजामातृमुनिमानसवासिने । सर्वलोकनिवासाय श्रीनिवासाय मङ्गलम् ॥ १३ ॥ नमः श्रीवेङ्कटेशाय शुद्धज्ञानस्वरूपिणे । वासुदेवाय शान्ताय श्रीनिवासाय मङ्गलम् ॥ १४ ॥ मङ्गलाशासनपरैर्मदाचार्यपुरोगमैः । सर्वैश्च पूर्वैराचार्यैस्सत्कृतायास्तु मङ्गलम् ॥ १५॥ इति श्रीवेङ्कटेशमङ्गलस्तोत्रं सम्पूर्णम् ॥ ६८ ॥ श्रीवेङ्कटेश्वरार्पणमस्तु ॥

३९ श्रीहरिस्तोत्रम् ।

श्रीगणेशाय नमः ॥ जगज्जालपालं कचत्कण्ठमालं शरच्चन्द्रभालं महादैत्यकालम् । नभोनीलकायं दु-

रावारमाय सुपर्णासहायं भजेऽहं भजेऽहम् ॥ १ ॥ सदाम्भोधिवास गलत्पुष्पहास जगत्संनिरासं श-तादित्यभासम् । गदाचक्रशस्त्र लसत्पीतवस्त्रं हरं चारुवक्त्रं भजे० ॥ २ ॥ रमाकण्ठहार श्रुतिव्रातसारं जलान्तर्विहार धराभारहारम् । चिदानन्दरूपं मनो ज्ञस्वरूपं धृतानेकरूपं भजे० ॥ ३ ॥ जराजन्म हीन परानन्दपीन समाधानलीन सदैवानवीनम् । जगज्जन्महेतु सुरानीककेतु त्रिलोकैकसेतुं भजे० ॥ ४ ॥ कृताम्नायगान खगाधीशयान विमुक्ते र्निदान हरारातिमानम् । स्वभक्तानुकूल जगद्वृक्ष-मूल निरस्तार्तशूल भजे० ॥ ५ ॥ समस्तामरेश द्विरेफाभकेशं जगद्बिम्बलेश हृदाकाशदेशम् । सदा दिव्यदेह विमुक्ताखिलेह सुवैकुण्ठगेह भजे० ॥ ६ ॥ सुरालीबलिष्ठ त्रिलोकीवरिष्ठ गुरूणां गरिष्ठ स्वरू-पैकनिष्ठम् । सदायुद्धधीर महावीरवीर भवाम्भो धितीरं भजे० ॥ ७ ॥ रमावामभाग तलानग्ननाग कृताधीनयाग गतारागरागम् । मुनीन्द्रैः

सुगीतं सुरैः सम्परीतं गुणौघैरतीतं भजे० ॥ ८ ॥
इदं यस्तु नित्यं समाधाय चित्तं पठेदष्टकं कष्टहारं मुरारेः । स विष्णोर्विशोकं ध्रुवं याति लोकं जराजन्मशोकं पुनर्विन्दते नो॥९॥इति श्रीपरमहंसस्वामिब्रह्मानन्दविरचितं श्रीहरिस्तोत्रं संपूर्णम् ॥६९ ॥

४० श्रीहरिनामाष्टकम् ।

श्रीगणेशाय नमः ॥ श्रीकेशवाच्युत मुकुन्द रथाङ्गपाणे गोविन्द माधव जनार्दन दानवारे । नारायणामरपते त्रिजगन्निवास जिह्वे जपेति सततं मधुराक्षराणि ॥ १ ॥ श्रीदेवदेव मधुसूदन शार्ङ्गपाणे दामोदरार्णवनिकेतन कैटभारे । विश्वम्भराभरण भूषितभूमिपाल जिह्वे० ॥ २ ॥ श्रीपद्मलोचन गदाधर पद्मनाभ पद्मेश पद्मपद पावन पद्मपाणे । पीताम्बराम्बररुचे रुचिरावतार जिह्वे० ॥ ३ ॥ श्रीकान्त कौस्तुभधरार्तिहराब्जपाणे विष्णो त्रिविक्रम महीधर धर्मसेतो । वैकुण्ठवास वसुधाधिप वासुदेव जिह्वे० ॥ ४ ॥ श्रीनारसिंह न-

रकान्तक कान्तमूर्ते लक्ष्मीपते गरुडवाहन शेषशायिन् । केशिप्रणाशन सुकेश किरीटमौले जिह्वे० ॥ ५ ॥ श्रीवत्सलाञ्छन सुरर्षभ शङ्खपाणे कल्पान्तवारिधिविहार हरे मुरारे । यज्ञेश यज्ञमय यज्ञभुगादिदेव जिह्वे० ॥ ६ ॥ श्रीराम रावणरिपो रघुवंशकेतो सीतापते दशरथात्मज राजसिंह । सुग्रीवमित्र मृगवेधन चापपाणे जिह्वे० ॥ ७ ॥ श्रीकृष्ण वृष्णिवर यादव राधिकेश गोवर्धनोद्धरण कंसविनाश शौरे । गोपाल वेणुधर पाण्डुसुतैककबन्धो जिह्वे० ॥ ८ ॥ इत्यष्टकं भगवतः सततं नरो यो नामाङ्कितं पठति नित्यमनन्यचेताः । विष्णोः परं पदमुपैति पुनर्न जातु मातुः पयोधररसं पिबतीह सत्यम् ॥ ९ ॥ इति श्रीपरमहंसस्वामिब्रह्मानन्दविरचितं श्रीहरिनामाष्टकं सम्पूर्णम् ॥ ७० ॥

७४ श्रीहरिशरणाष्टकम् ।

श्रीगणेशाय नमः ॥ ध्येयं वदन्ति शिवमेव हि

केचिदन्ये शक्तिं गणेशमपरे तु दिवाकरं वै । रू-
पैस्तु तैरपि विभासि यतस्त्वमेव तस्मात्त्वमेव श-
रणं मम शङ्खपाणे ॥ १ ॥ नो सोदरो न जनको
जननी न जाया नैवात्मजो न च कुलं विपुलं
बलं वा । सदृश्यते न किल कोऽपि सहायको मे
तस्मा० ॥ २ ॥ नोपासिता मदमपास्य मया म-
हान्तस्तीर्थानि चास्तिकधिया नहि सेवितानि ।
देवार्चनं च विधिवन्न कृतं कदापि तस्मा० ॥ ३ ॥
दुर्वासना मम सदा परिकर्षयन्ति चित्तं शरीरमपि
रोगगणा दहन्ति । सञ्जीवनं च परहस्तगतं सदैव
तस्मा० ॥ ४ ॥ पूर्वं कृतानि दुरितानि मया तु
यानि स्मृत्वाऽखिलानि हृदयं परिकम्पते मे ।
ख्याता च ते पतितपावनता तु यस्मात्तस्मा०
॥ ५ ॥ दुःखं जगज्जननजं विविधाश्च रोगा का-
कश्वसूकरजनिर्निरये च पातः । ते विस्मृतेः फल-
मिदं विततं हि लोके तस्मा० ॥ ६ ॥ नीचोऽपि
पापवलितोऽपि विनिन्दितोऽपि ब्रूयात्तवाहमिति

यस्तु किल्किवारम । तं यच्छमीश निजलोकमिति
व्रतं ते तस्मा० ॥७॥ वेदेषु धर्मवचनेषु तथाऽऽगमेषु
रामायणेऽपि च पुराणकदम्बके वा । सर्वत्र सर्ववि-
धिना गदितस्त्वमेव तस्मा० ॥ ८ ॥ इतिश्रीपरमहंस-
स्वामिब्रह्मानन्दवि० श्रीहरिशरणाष्टकमपूर्णम्॥७१॥

४२ श्रीदीनबन्ध्वष्टकम् ।

श्रीगणेशाय नमः ॥ यस्मादिदं जगदुदेति चतु-
र्मुखाद्य यस्मिन्नवस्थितमशेषमशेषमूले । यत्रोप-
याति विलयं च समस्तमन्ते दृग्गोचरो भवतु मे-
ऽद्य स दीनबन्धुः ॥ १ ॥ चक्रं सहस्रकरचारुक-
रारविन्दे गुर्वी गदा दरवरश्च विभाति यस्य । प-
क्षीन्द्रपृष्ठपरिरोपितपादपद्मो दृग्गोचरो० ॥ २ ॥
येनोद्धृता वसुमती सलिले निमग्ना नग्ना च पाण्ड-
ववधूः स्थगिता दुकूलैः । संमोचितो जलचरस्य
मुखाद्गजेन्द्रो दृग्गो० ॥ ३ ॥ यस्यार्द्रदृष्टिवशतस्तु
सुराः समृद्धिं कोपेक्षणेन दनुजा विलयं व्रजन्ति ।

भीतोश्चरन्ति च यतोऽर्कयमानिलाद्या दृग्गो०॥४॥
गायन्ति सामकुशला यमजं मखेषु ध्यायन्ति धी
रमतयो यतयो विविक्ते । पश्यन्ति योगिपुरुषा
पुरुषं शरीरे दृग्गो० ॥ ५ ॥ आकाररूपगुणयो-
गविवर्जितोऽपि भक्तानुकम्पननिमित्तगृहीतमूर्तिः ।
यः सर्वगोऽपि कृतशेषशरीरशय्यो दृग्गो० ॥ ६ ॥
यस्याङ्घ्रिपङ्कजमनिद्रमुनीन्द्रवृन्दैराराध्यते भवदवान
लदाहशान्त्यै । सर्वापराधमविचिन्त्य ममाखिला-
त्मा दृग्गो० ॥ ७ ॥ यन्नामकीर्तनपरः श्वपचो-
ऽपि नूनं हित्वाऽखिलं कलिमलं भुवनं पुनाति ।
दग्ध्वा ममाघमखिलं करुणेक्षणेन दृग्गो० ॥ ८ ॥
दीनबन्ध्वष्टकं पुण्यं ब्रह्मानन्देन भाषितम् । यः
पठेत्प्रयतो नित्यं तस्य विष्णुः प्रसीदति ॥ ९ ॥
इति श्रीपरमहंसस्वामिब्रह्मानन्दविरचितं श्रीदीन-
बन्ध्वष्टकं सम्पूर्णम् ॥ ७२ ॥

७३ श्रीगोविन्दाष्टकम् ।

श्रीगणेशाय नमः ॥ चिदानन्दाकारं श्रुतिसरससार

समरसं निराधाराधारं भवजलधिपारं परगुणम् । रमाग्रीवाहारं व्रजवनविहारं हरनुतं सदा तं गोविन्दं परमसुखकन्दं भजत रे ॥ १ ॥ महाम्भोधिस्थानं स्थिरचरनिदानं दिविजपं सुधाधारापानं विहगपतियानं यमरतम् । मनोज्ञं सुज्ञानं मुनिजननिधानं ध्रुवपदं सदा० ॥ २ ॥ धिया धीरैर्ध्येयं श्रवणपुटपेयं यतिवरैर्महावाक्यैर्ज्ञेयं त्रिभुवनविधेयं विधिपरम् । मनोमानामेयं सपदि हृदि नेयं नवतनुं सदा० ॥ ३ ॥ महामायाजालं विमलवनमालं मलहरं सुभालं गोपालं निहतशिशुपालं शशिमुखम् । कलातीतं कालं गतिहतमरालं मुररिपुं सदा० ॥ ४ ॥ नभोविम्बस्फीतं निगमगणगीतं समगतिं सुरौघे सम्प्रीतं दितिजविपरीतं पुरिशयम् । गिरां पन्थातीतं स्वदितनवनीतं नयकरं सदा० ॥ ५ ॥ परेशं पद्मेशं शिवकमलजेशं शिवकरं द्विजेशं देवेशं तनुकुटिलकेशं कलिहरम् । खगेशं नागेशं निखिलभुवनेशं नगधरं सदा०

॥ ६ ॥ रमाकान्तं कान्तं भवभवभयान्तं भवसख दुराशान्तं शान्तं निखिलहृदि भान्तं भुवनपम् । विवादान्तं दान्तं दनुजनिचयान्तं सुचरितं सदा०॥ ७ ॥ जगज्ज्येष्ठं श्रेष्ठं सुरपतिकनिष्ठं क्रतुपतिं बलिष्ठं भूयिष्ठं त्रिभुवनवरिष्ठं वरवहम् । स्वनिष्ठं धर्मिष्ठं गुरुगुणगरिष्ठं गुरुवरं सदा० ॥ ८ ॥ गदापाणेरेतद्दुरितदलनं दुःखशमनं विशुद्धात्मा स्तोत्रं पठति मनुजो यस्तु सततम् । स भुक्त्वा भोगौघं चिरमिह ततोऽपास्तवृजिनो वरं विष्णोः स्थानं व्रजति खलु वैकुण्ठभुवनम् ॥ ९ ॥ इति श्रीपरमहंसस्वामिब्रह्मानन्दविरचितं श्रीगोविन्दाष्टकं संपूर्णम् ॥ ७२ ॥

४४ रमापत्यष्टकम् ।

श्रीगणेशाय नमः ॥ जगदादिमनादिमजं पुरुजं शरदम्बरतुल्यतनुं वितनुम् । धृतकञ्जरथाङ्गगदं विगदं प्रणमामि रमाधिपतिं तमहम् ॥ १ ॥ कमलाननकञ्जरतं विरतं हृदि योगिजनैः कलितं ल-

लितम् । कुजने सुजनैरलभ सुलभ प्रण० ॥ २ ॥
मुनिवृन्दहृदिस्थपद सुपद निखिलाध्वरभागभुजं
सुभुजम् । हृतवासवमुख्यमद विमद प्रण० ॥ ३ ॥
हृतदानवदृप्तबल सुबल स्वजनास्तसमस्तमलं
विमलम् । समपास्तगजेन्द्रदर सुदर प्रण० ॥ ४ ॥
परिकल्पितसर्वकल विकल सकलागमगीतगुण
विगुणम् । भवपाशनिराकरण शरण प्रण० ॥ ५ ॥
स्मृतिजन्मजराशमन कमन शरणागतभीतिहर द-
हरम् । परितुष्टरमाहृदय सुदयं प्रण० ॥ ६ ॥
सकलावनिबिम्बधर स्वधर परिपूरितसर्वदिशं सुद-
शम् । गतशोकमशोककर सुकर प्रण० ॥ ७ ॥
मथितार्णवराजरसं सरस ग्रथिताखिललोकहृद सु-
हृदम् । प्रथिताद्भुतशक्तिगण सुगुण प्रण० ॥ ८ ॥
सुखराशिकरं भवबन्धहरं परमाष्टकमेतदनन्यमति ।
पठनीह तु योऽनिशमेव नरो लभते खलु विष्णु-
पद स परम् ॥ ९ ॥ इति श्रीपरमहंसस्वामिब्र-
ह्मानन्दविरचितं श्रीरमापत्यष्टकं सम्पूर्णम् ॥ ७४ ॥


४९ कमलापत्यष्टकम् ।

श्रीगणेशाय नमः ॥ भुजगतल्पगतं घनसुन्दरं गरुडवाहनमम्बुजलोचनम् । नलिनचक्रगदाकरमव्ययं भजत रे मनुजाः कमलापतिम् ॥ १ ॥ अलिकुलासितकोमलकुन्तलं विमलपीतदुकूलमनोहरम् । जलधिजाश्रितवामकलेवरं भजत० ॥ २ ॥ किमु जपैश्च तपोभिरुताध्वरैरपि किमुत्तमतीर्थनिषेवणैः । किमुत शास्त्रकदम्बविलोकनैर्भजत० ॥ ३ ॥ मनुजदेहमिमं भुवि दुर्लभं समधिगम्य सुरैरपि वाञ्छितम् । विषयलम्पटतामपहाय वै भजत० ॥ ४ ॥ न वनिता न सुतो न सहोदरो नहि पिता जननी न च बान्धवः । व्रजति साकमनेन जनेन वै भजत० ॥ ५ ॥ सकलमेव चलं सचराचरं जगदिदं सुतरां धनयौवनम् । समवलोक्य विवेकदृशा द्रुतं भजत० ॥ ६ ॥ विविधरोगयुतं क्षणभङ्गुरं परवशं नवमार्गमलाकुलम् । परिनिरीक्ष्य

शरीरमिदं स्वकं भजत०॥ ७ ॥ मुनिवरैरनिश हृदि भावित शिवविरिञ्चिमहेन्द्रनुत सदा। मरण-जन्मजराभयमोचन भजत० ॥ ८ ॥ हरिपदाष्टक-मेतदनुत्तमं परमहंसजनेन समीरितम्। पठति यस्तु समाहितचेतसा व्रजति विष्णुपदं स नरो ध्रुवम् ॥ ९ ॥ इति श्रीमत्परमहंसस्वामिब्रह्मानन्द-विरचितं कमलापत्यष्टकं समाप्तम् ॥ ७५ ॥

४६ संकष्टनाशनविष्णुस्तोत्रम्।

श्रीगणेशाय नमः। नारद उवाच। पुनर्दैत्यं स-मायान्तं दृष्ट्वा देवाः सवासवाः। भयप्रकम्पिताः सर्वे विष्णुं स्तोतुं प्रचक्रमुः ॥ १ ॥ देवा ऊचुः। नमो मत्स्यकूर्मादिनानास्वरूपैः सदा भक्तकार्योद्यतायार्तिहन्त्रे। विधात्रादिसर्गस्थितिध्वंसकर्त्रे गदाशङ्खपद्मारिहस्ताय तेऽस्तु ॥ २ ॥ रमावल्लभायासुराणां निहन्त्रे भुजङ्गारियानाय पीताम्बराय। मखादिक्रियापाककर्त्रे विकर्त्रे शरण्याय तस्मै नताः स्मो





यच्छ्रुतिराह सादर न्यास प्रशस्ताखिलकर्मणा स्फु-
टम् । एतावदित्याह च वाजिना श्रुतिर्ज्ञान वि-
मोक्षाय न कर्म साधनम् ॥ २१ ॥ विद्यासमत्वेन
तु दर्शितस्त्वया क्रतुर्न दृष्टान्त उदाहृत सम ।
फले पृथक्त्वाद्बहुकारकै क्रतु संसाध्यते ज्ञानम-
तो विपर्ययम् ॥ २२ ॥ सप्रत्यवायो ह्यहमित्यना-
त्मधीरज्ञप्रसिद्धा न तु तत्त्वदर्शिन । तस्माद्बुधै-
स्त्याज्यमपि क्रियात्मभिर्विधानत कर्म विधिप्रका-
शितम् ॥ २३ ॥ श्रद्धान्वितस्तत्त्वमसीति वाक्यतो
गुरो प्रसादादपि शुद्धमानस । विज्ञाय चैकात्म्यम-
थात्मजीवयो सुखी भवेन्मेरुरिवाप्रकम्पन ॥ २४ ॥
आदौ पदार्थावगतिर्हि कारण वाक्यार्थविज्ञानवि-
धौ विधानत । तत्त्वम्पदार्थौ परमात्मजीवकावसीति
चैकात्म्यमथानयोर्भवेत् ॥ २५ ॥ प्रत्यक्परोक्षादि-
विरोधमात्मनोर्विहाय संगृह्य तयोश्चिदात्मताम् ।
संशोधिता लक्षणया च लक्षिता ज्ञात्वा स्वमात्मा-
नमथाद्वयो भवेत् ॥ २६ ॥ एकात्मकत्वाज्जहती न

सम्भवेत्तथाजहल्लक्षणता विरोधतः । सोऽयं पदार्थाविव भागलक्षणा युज्येत तत्त्वंपदयोरदोषतः ॥ २७ ॥ रसादिपञ्चीकृतभूतसम्भवं भोगालयं दुःखसुखादिकर्मणाम् । शरीरमाद्यन्तवदादिकर्मजं मायामयं स्थूलमुपाधिमात्मनः ॥ २८ ॥ सूक्ष्मं मनोबुद्धिदशेन्द्रियैर्युतं प्राणैरपञ्चीकृतभूतसम्भवम् ॥ भोक्तुः सुखादेरनुसाधनं भवेच्छरीरमन्यद्विदुरात्मनो बुधा ॥ २९ ॥ अनाद्यनिर्वाच्यमपीह कारणं मायाप्रधानं तु परं शरीरकम् । उपाधिभेदात्तु यतः पृथक् स्थितं स्वात्मानमात्मन्यवधारयेत्क्रमात् ॥ ३० ॥ कोशेषु पञ्चस्वपि तत्तदाकृतिर्विभाति सङ्गात्स्फटिकोपलो यथा । असङ्गरूपोऽयमजो यतोऽद्वयो विज्ञायतेऽस्मिन्परितो विचारिते ॥ ३१ ॥ बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादिभेदेन गुणत्रयात्मनः । अन्योन्यतोऽस्मिन्व्यभिचारतो मृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥ देहेन्द्रियप्राणमनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः । वृत्ति-



व्यते हि न ॥३९॥ अनाद्यविद्योद्भवबुद्धिबिम्बितो जीव प्रकाशोऽयमितीर्यते चित । आत्मा धिय साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपर स एव हि ॥ ४०॥ चिद्बिम्बमाक्ष्यात्मधिया प्रसगतस्त्वेकत्र वातादनलाक्तलोहवत । अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्व च चिदात्मचेतसो ॥४१॥ गुरो सकाशादपि वेदवाक्यत सजातविद्यानुभवो निरीक्ष्य तम् । स्वात्मानमात्मस्थमुपाधिवर्जित त्यजेदशेष जडमात्मगोचरम् ॥ ४२ ॥ प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीव निर्मल । विशुद्धविज्ञानघनो निरामय संपूर्ण आनन्दमयोऽहमक्रिय ॥ ४३ ॥ सदैव मुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मक । अनन्तपारोऽहमहर्निश बुधैर्विभावितोऽह हृदि वेदवादिभि ॥४४॥ एवं सदात्मानमखण्डितात्मना विचारमाणस्य विशुद्धभावना । हन्यादविद्यामचिरेण कारकैरसाधन यद्वदुपासितं रुज ॥ ४५॥ विविक्त आसीन उपारते-

न्द्रियो विनिर्जितात्मा विमलान्तरागय। विभावयेदे-
कमनन्यसाधनो विज्ञानदृषेवल आत्मसस्थित
॥ ४६ ॥ विश्व यदेतत्परमात्मदर्शन विलापयेदात्म
नि सर्वकारणे। पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद
बाह्य न च किं चिदान्तरम् ॥४७॥ पूर्वं समाधेरखिल
विचिन्तयेदोङ्कारमात्र सचराचर जगत। तदेव वाच्य
प्रणवो हि वाचको विभाव्यतेऽज्ञानवशान्न बोधत
॥ ४८ ॥ अकारसज्ञ पुरुषो हि विश्वको ह्युकारक-
स्तैजस ईर्यते क्रमात। प्राज्ञो मकार परिपठ्यते-
ऽखिले समाधिपूर्वं न तु तत्त्वतो भवेत् ॥ ४९ ॥
विश्व त्वकार पुरुष विलापयेदुकारमध्ये बहुधा
व्यवस्थितम्। ततो मकारे प्रविलाप्य तैजस द्वि-
तीयवर्णं प्रणवस्य चान्तिमम् ॥ ५० ॥ मकारम-
प्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कार-
णम्। सोऽह पर ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्-
मुक्त उपाधितोऽमल ॥ ५१ ॥ एव सदा जातप
रात्मभावन स्वानन्दतुष्ट परिविस्मृताखिल ।



यस्तस्य दृश्योऽहमहर्निशं हृदि ॥ ५८ ॥ रहस्य
मेतच्छ्रुतिसारसंग्रहं मया विनिश्चित्य तवोदितं प्रि
य । यस्त्वेतदालोचयतीह बुद्धिमान्स मुच्यते पा
तकराशिभिः क्षणात् ॥ ५९ ॥ भ्रातर्यदीदं परि
दृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा । मद्भाव
नाभावितशुद्धमानसः सुखी भवानन्दमयो निरामय
॥ ६० ॥ यः सेवते मामगुणं गुणात्परं हृदा कद
वा यदि वा गुणात्मकम् । सोऽहं स्वपादाञ्चितरे
णुभिः स्पृशन्पुनाति लोकत्रितयं यथा हरि
॥ ६१ ॥ विज्ञानमेतदखिलं श्रुतिसारमेकं वेदान्त
वेद्यचरणेन मयैव गीतम् । यः श्रद्धया परिपठे
द्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषु भक्ति
॥ ६२ ॥ इति श्रीमदध्यात्मरामायणे उमामहे
श्वरसंवादे उत्तरकाण्डे रामगीता समाप्ता ॥ ७७ ॥

२ रामरक्षास्तोत्रम् (बुधकौशिक)।

श्रीगणेशाय नमः । अस्य श्रीरामरक्षास्तोत्रम

पातु मखत्राता मुखं सौमित्रिवत्सलः ॥ ५ ॥ जि-
ह्वां विद्यानिधिः पातु कण्ठं भरतवन्दितः । स्कन्धौ
दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः ॥ ६ ॥ करौ
सीतापतिः पातु हृदयं जामदग्न्यजित् । मध्यं पातु
खरध्वंसी नाभिं जाम्बवदाश्रयः ॥ ७ ॥ सुग्रीवेशः
कटी पातु सक्थिनी हनुमत्प्रभुः । ऊरू रघूत्तमः
पातु रक्षःकुलविनाशकृत् ॥ ८ ॥ जानुनी सेतुकृ-
त्पातु जङ्घे दशमुखान्तकः । पादौ बिभीषणश्रीदः
पातु रामोऽखिलं वपुः ॥ ९ ॥ एतां रामबलोपेतां
रक्षां यः सुकृती पठेत् । स चिरायुः सुखी पुत्री
विजयी विनयी भवेत् ॥ १० ॥ पातालभूतलव्योम-
चारिणश्छद्मचारिणः । न द्रष्टुमपि शक्तास्ते रक्षितं
रामनामभिः ॥ ११ ॥ रामेति रामभद्रेति रामच-
न्द्रेति वा स्मरन् । नरो न लिप्यते पापैर्भुक्तिं मुक्तिं
च विन्दति ॥१२॥ जगज्जैत्रैकमन्त्रेण रामनाम्नाऽभि-
रक्षितम् । यः कण्ठे धारयेत्तस्य करस्थाः सर्वसि-
द्धयः ॥ १३ ॥ वज्रपञ्जरनामेदं यो रामकवचं



शमेणाभिहता निशाचरचमू रामाय तस्मै नम ।
रामान्नास्ति परायण परतर रामस्य दासोऽस्म्यहं
रामे चित्तलय सदा भवतु मे भो राम मामुद्धर
॥ ३७ ॥ राम रामेति रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्य रामनाम वरानने ॥ ३८ ॥
इति श्रीबुधकौशिकविरचित श्रीरामरक्षास्तोत्र
सपूर्णम् ॥ ७८ ॥

३ रामस्तवराजः (सनत्कुमारम०)।

श्रीगणेशाय नम । अस्य श्रीरामचन्द्रस्तवराजस्तो
त्रमन्त्रस्य सनत्कुमार ऋषि । श्रीरामो देवता ।
अनुष्टुप् छन्द । सीता बीजम् । हनुमान् शक्ति ।
श्रीरामप्रीत्यर्थे जपे विनियोग । सूत उवाच । सर्व-
शास्त्रार्थतत्त्वज्ञं व्यासं सत्यवतीसुतम् । धर्मपुत्र
प्रहृष्टात्मा प्रत्युवाच मुनीश्वरम् ॥ १ ॥ युधिष्ठिर
उवाच । भगवन्योगिना श्रेष्ठ सर्वशास्त्रविशारद ।
किं तत्त्वं किं पर जाप्य किं ध्यान मुक्तिसाधनम्

॥ २ ॥ श्रोतुमिच्छामि तत्सर्वं ब्रूहि मे मुनिसत्तम ।
वेदव्यास उवाच । धर्मराज महाभाग शृणु वक्ष्या-
मि तत्त्वत ॥ ३ ॥ यत्पर यद्गुणातीतं यज्ज्योतिर-
मल शिवम् । तदेव परम तत्त्व कैवल्यपदकारणम्
॥ ४ ॥ श्रीरामेति पर जाप्य तारक ब्रह्मसञ्ज्ञकम् ।
ब्रह्महत्यादिपापघ्नमिति वेदविदो विदु ॥ ५॥ श्री-
राम रामेति जना ये जपन्ति च सर्वदा। तेषा भुक्ति
श्च मुक्तिश्च भविष्यति न सशय ॥ ६ ॥ स्तवराज
पुरा प्रोक्त नारदेन च धीमता । तत्सर्वं सम्प्रवक्ष्यामि
हरिध्यानपुर सरम् ॥ ७ ॥ तापत्रयाग्निशमन सर्वा
घौघनिकृन्तनम् । दारिद्र्यदु खशमन सर्वसम्पत्कर शि
वम् ॥८॥ विज्ञानफलद दिव्य मोक्षैकफलसाधनम् ।
नमस्कृत्य प्रवक्ष्यामि राम कृष्ण जगन्मयम्
॥ ९ ॥ अयोध्यानगरे रम्ये रत्नमण्डपमध्यगे ।
स्मरेत्कल्पतरोर्मूले रत्नसिंहासन शुभम् ॥ १० ॥
तन्मध्येऽष्टदल पद्म नानारत्नैश्च वेष्टितम् । स्मरे
न्मध्ये दाशरथिं सहस्रादित्यतेजसम् ॥ ११ ॥ पि

तुरङ्गगतं राममिन्द्रनीलमणिप्रभम्। कोमलाङ्गं वि-
शालाक्षं विद्युद्वर्णाम्बरावृतम् ॥ १२ ॥ भानुकोटि
प्रतीकाशं किरीटेन विराजितम्। रत्नग्रैवेयकेयूररत्न
कुण्डलमण्डितम् ॥ १३ ॥ रत्नकङ्कणमञ्जीरकटिसू
त्रैरलङ्कृतम्। श्रीवत्सकौस्तुभोरस्कं मुक्ताहारोपशो-
भितम् ॥ १४ ॥ दिव्यरत्नसमायुक्तमुद्रिकाभिरलं
कृतम्। राघवं द्विभुजं बालं राममीषत्स्मिताननम्
॥ १५ ॥ तुलसीकुन्दमन्दारपुष्पमाल्यैरलङ्कृतम्। क
र्पूरागरुकस्तूरीदिव्यगन्धानुलेपनम् ॥ १६ ॥ योगशा
स्त्रेष्वभिरतं योगेशं योगदायकम्। सदा भरतसौ-
मित्रिशत्रुघ्नैरुपशोभितम् ॥ १७ ॥ विद्याधरसुर
धीशसिद्धगन्धर्वकिन्नरैः। योगीन्द्रैर्नारदाद्यैश्च स्तू
यमानमहर्निशम् ॥ १८ ॥ विश्वामित्रवसिष्ठादिमु
निभिः परिसेवितम्। सनकादिमुनिश्रेष्ठैर्योगिवृन्दै
श्च सेवितम् ॥ १९ ॥ रामं रघुवरं वीरं धनुर्वेद
विशारदम्। मङ्गलायतनं देवं रामं राजीवलोच
नम् ॥ २० ॥ सर्वशास्त्रार्थतत्त्वज्ञमानन्दकरसुन्दरम्।

कौशल्यानन्दनं रामं धनुर्बाणधरं हरिम् ॥ २१ ॥
एवं संचिन्तयन्विष्णुं यज्ज्योतिरमलं विभुम् । प्र-
हृष्टमानसो भूत्वा मुनिवर्यः स नारदः ॥ २२ ॥
सर्वलोकहितार्थाय तुष्टाव रघुनन्दनम् । कृताञ्जलि-
पुटो भूत्वा चिन्तयन्नद्भुतं हरिम् ॥ २३ ॥ यदेकं य-
त्परं नित्यं यदनन्तं चिदात्मकम् । यदेकं व्यापकं
लोके तद्रूपं चिन्तयाम्यहम् ॥ २४ ॥ विज्ञानहेतुं
विमलायताक्षं प्रज्ञानरूपं स्वसुखैकहेतुम् । श्रीरा-
मचन्द्रं हरिमादिदेवं परात्परं राममहं भजामि ॥ २५ ॥
कविं पुराणं पुरुषं पुरस्तात्सनातनं योगिनमीशि-
तारम् । अणोरणीयांसमनन्तवीर्यं प्राणेश्वरं राममसौ
ददर्श ॥ २६ ॥ नारद उवाच । नारायणं जगन्ना-
थमभिरामं जगत्पतिम् । कविं पुराणं वागीशं रामं
दशरथात्मजम् ॥ २७ ॥ राजराजं रघुवरं कौशल्यान-
न्दवर्धनम् । भर्गं वरेण्यं विश्वेशं रघुवरं जगद्गुरुम्
॥ २८ ॥ सत्यं सत्यप्रियं श्रेष्ठं जानकीवल्लभं वि-
भुम् । सौमित्रिपूर्वजं शान्तं कामदं कमलेक्षणम् ॥

॥ २९ ॥ आदित्य रविमीशान घृणिं सूर्यमनाम
यम्। आनन्दरूपिण सौम्य राघव करुणामयम्
॥ ३० ॥ जामदग्न्य तपोमूर्ति रामं परशुधारिणम्।
वाक्पतिं वरद वाच्य श्रीपतिं पक्षिवाहनम् ॥ ३१ ॥
श्रीशार्ङ्गधारिणं राम चिन्मयानन्दविग्रहम् । हल-
भृग्विष्णुमीशान बलराम कृपानिधिम् ॥ ३२ ॥
श्रीवल्लभ कृपानाथ जगन्मोहनमच्युतम् । मत्स्य-
कूर्मवराहादिरूपधारिणमव्ययम् ॥ ३३ ॥ वासु-
देव जगद्योनिमनादिनिधन हरिम्। गोविन्द गोपतिं
विष्णु गोपीजनमनोहरम् ॥३४॥ गोगोपालपरीवार
गोपकन्यासमावृतम् । विद्युत्पुञ्जप्रतीकाश राम कृष्ण
जगन्मयम् ॥ ३५ ॥ गोगोपिकासमाकीर्णं वेणुवा-
दनतत्परम् । कामरूप कलावन्त कामिनीकामद वि
भुम् ॥ ३६ ॥ मन्मथ मथुरानाथ माधव मकरध्व-
जम्। श्रीधर श्रीकर श्रीश श्रीनिवास परात्परम् ।
॥ ३७ ॥ भूतेश भूपतिं भद्र विभूतिं भूतिभूषणम्
सर्वदुःखहर वीर दुष्टदानववैरिणम् ॥ ३८ ॥

त्यानन्द चिदात्मकम् । मनसा शिरसा नित्य प्रणमामि रघूत्तमम् ॥ ४८ ॥ सूर्यमण्डलमध्यस्थ रामं सीतासमन्वितम् । नमामि पुण्डरीकाक्षममेय गुरुतत्परम् ॥ ४९ ॥ नमोऽस्तु वासुदेवाय ज्योतिषां पतये नम । नमोऽस्तु रामदेवाय जगदानन्दरूपिणे ॥ ५० ॥ नमो वेदान्तनिष्ठाय योगिने ब्रह्मवादिने । मायामयनिरस्ताय प्रपन्नजनसेविने ॥५१॥ वन्दामहे महेशानचण्डकोदण्डखण्डनम्।जानकीहृदयानन्दवर्धन रघुनन्दनम्॥ ५२॥ उत्फुल्लामलकोमलोत्पलदलश्यामाय रामाय ते कामाय प्रमदामनोहरगुणग्रामाय रामात्मने । योगारूढमुनीन्द्रमानससरोहसाय समारविध्वसाय स्फुरदोजसे रघुकुलोत्तमाय पुंसे नम ॥ ५३ ॥ भवोद्भव वेदविदा वरिष्ठमादित्यचन्द्रानलसुप्रभावम् । सर्वात्मक सर्वगतस्वरूप नमामि राम तमस परस्तात् ॥ ५४ ॥ निरञ्जन निष्प्रतिम निरीह निराश्रय निष्कलमप्रपञ्चम् । नित्यध्रुव निर्विषयस्वरूप निरन्तर

न्वेश्वर राममहं भजामि ॥ ६२ ॥ लोकाभिरामं
रघुवंशनाथं हरिं चिदानन्दमयं मुकुन्दम्। अशेषवि-
द्याधिपतिं कवीन्द्रं नमामि रामं तमसः परस्तात्
॥ ६३ ॥ योगीन्द्रसङ्घैश्च सुसेव्यमानं नारायणं नि-
र्मलमादिदेवम्। नतोऽस्मि नित्यं जगदेकनाथमादि-
त्यवर्णं तमसः परस्तात् ॥ ६४ ॥ विभूतिदं विश्वसृजं
विरामं राजेन्द्रमीशं रघुवंशनाथम्। अचिन्त्यम-
व्यक्तमनन्तमूर्तिं ज्योतिर्मयं राममहं भजामि
॥ ६५ ॥ अशेषसंसारविहारहीनमादित्यगं पूर्णसु-
खाभिरामम्। समस्तसाक्षिं तमसः परस्तान्नारायणं
विष्णुमहं भजामि ॥ ६६ ॥ मुनीन्द्रगुह्यं परिपूर्ण-
कामं कलानिधिं कल्मषनाशहेतुम्। परात्परं य-
त्परमं पवित्रं नमामि रामं महतो महान्तम् ॥ ६७ ॥
ब्रह्मा विष्णुश्च रुद्रश्च देवेन्द्रो देवतास्तथा। आदि-
त्यादिग्रहाश्चैव त्वमेव रघुनन्दन ॥ ६८ ॥ तापसा
ऋषयः सिद्धाः साध्याश्च मरुतस्तथा। विप्रा
वेदास्तथा यज्ञाः पुराणं धर्मसंहिताः ॥ ६९ ॥

त्वन्मूर्तिदर्शनेनैव कृतार्थोऽहं च सर्वदा ॥ ७८ ॥
धन्योऽहं कृतकृत्योऽहं पुण्योऽहं पुरुषोत्तम । अद्य मे सफलं जन्म जीवितं सफलं च मे ॥ ७९ ॥ अद्य मे सफलं ज्ञानमद्य मे सफलं तपः । अद्य मे सफलं कर्म त्वत्पदाम्भोजदर्शनात् । अद्य मे सफलं सर्वं त्वन्नामस्मरणं तथा ॥ ८० ॥ त्वत्पदाम्भोरुहद्वन्द्वसद्भक्तिं देहि राघव । ततः परमसप्रीतः स रामः प्राह नारदम् ॥ ८१ ॥ श्रीराम उवाच । मुनिवर्य महाभाग मुने त्विष्टं ददामि ते । यत्त्वया चेप्सितं सर्वं मनसा तद्भविष्यति ॥ ८२ ॥ नारद उवाच । वरं न याचे रघुनाथ युष्मत्पादाब्जभक्तिः सततं ममास्तु । इदं प्रियं नाथ वरं ययाचे पुनः पुनस्त्वामिदमेव याचे ॥ ८३ ॥ व्यास उवाच । इत्येवमीडितो रामः प्रादात्तस्मै वरान्तरम् । वीरो रामो महातेजाः सच्चिदानन्दविग्रहः ॥ ८४ ॥ अद्वैतममलं ज्ञानं स्वनामस्मरणं तथा । अन्तर्दधे जगन्नाथः पुरतस्तस्य राघवः ॥ ८५ ॥ इति श्रीरा-

मध्ये पुष्पकमासने मणिमये वीरासने सस्थितम् ।
अग्रे वाचयति प्रभञ्जनसुते तत्त्व मुनीन्द्रै पर व्या-
ख्यात भरतादिभि परिवृत राम भजे श्यामलम्
॥ ९४ ॥ राम रत्नकिरीटकुण्डलयुत केयूरहारान्वि-
तं सीतालङ्कृतवामभागममल सिंहासनस्थं विभुम् ।
सुग्रीवादिहरीश्वरै सुरगणै ससेव्यमानं सदा वि-
श्वामित्रपराशरादिमुनिभि सस्तूयमान प्रभुम्॥९५॥
सकलगुणनिधान योगिभि स्तूयमान भुजविजि-
तसमान राक्षसेन्द्रादिमानम् । महितनृपभयानं सी-
तया शोभमान स्मर हृदय विमान ब्रह्म रामाभि-
धानम् ॥ ९६ ॥ रघुवर तव मूर्तिर्मामके मानसा-
ब्जे नरकगतिहर ते नामधेय मुखे मे । अनिश-
मतुलभक्त्या मस्तक त्वत्पदाब्जे भवजलनिधिनिमग्न
रक्ष मामार्तबन्धो ॥ ९७ ॥ राम रत्नमहं वन्दे चि-
त्रकूटपति हरिम् । कौशल्याभक्तिसभूत जानकी-
कण्ठभूषणम् ॥ ९८ ॥ इति श्रीसनत्कुमारसहिताया
नारदोक्त श्रीरामचन्द्रस्तवराजस्तोत्र सम्पूर्णम् ॥

[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

॥ १६ ॥ स च सर्वगुणोपेत कौसल्यानन्दव-
र्धन । समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव
॥ १७ ॥ विष्णुना सदृशो वीर्ये सोमवत्प्रियदर्शन ।
कालाग्निसदृश क्रोधे क्षमया पृथिवीसम ॥ १८ ॥
धनदेन समस्त्यागे सत्यधर्म इवापर । तमेवं गुण-
सपन्न राम सत्यपराक्रमम् ॥ १९ ॥ ज्येष्ठं श्रेष्ठगुणैर्यु-
क्त प्रिय दशरथात्मजम् । प्रकृतीना हितैर्युक्त प्र-
कृतिप्रियकाम्यया ॥ २० ॥ यौवराज्येन सयोक्तुमै-
च्छत्प्रीत्या महीपति । तस्याभिषेकसंभारान्दृष्ट्वा
भार्याऽथ कैकयी ॥ २१ ॥ पूर्वं दत्तवरा देवी व-
रमेनमयाचत । विवासन च रामस्य भरतस्याभि
षेचनम् ॥ २२ ॥ स सत्यवचनाद्राजा धर्मपाशेन
संयुत । विवासयामास सुतं रामं दशरथ प्रियम्
॥ २३ ॥ स जगाम वन वीर प्रतिज्ञामनुपालयन् ।
पितुर्वचननिर्देशात्कैकेय्या प्रियकारणात् ॥ २४ ॥
तं व्रजन्त प्रियो भ्राता लक्ष्मणोऽनुजगाम ह । स्ने-
हाद्विनयसंपन्न सुमित्रानन्दवर्धन ॥२५॥ भ्रातरं द-

यितो भ्रातु सौभ्रात्रमनुदर्शयन् । रामस्य दयितो भ्रातु सुमित्रानन्दवर्धन ॥२६॥ जनकस्य कुले जाता देवमायेव निर्मिता । सर्वलक्षणसपन्ना नारीणामुत्तमा वधू ॥ २७ ॥ सीताप्यनुगता राम शशिन रोहिणी यथा । पौरैरनुगतो दूर पित्रा दशरथेन च ॥ २८ ॥ शृङ्गवेरपुरे सूतं गङ्गाकूले व्यसर्जयत । गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियम् ॥ २९ ॥ गुहेन सहितो रामो लक्ष्मणेन च सीतया । ते व नेन वन गत्वा नदीस्तीर्त्वा बहूदका ॥ ३० ॥ चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात् । रम्यमावसथ कृत्वा रममाणा वने त्रय ॥ ३१ ॥ देवगन्धर्वसकाशास्तत्र ते न्यवसन्सुखम् । चित्रकूट गते रामे पुत्रशोकातुरस्तदा ॥ ३२ ॥ राजा दशरथ स्वर्गं जगाम विलपन्सुतम् । मृते तु तस्मिन् भरतो वसिष्ठप्रमुखैर्द्विजै ॥ ३३ ॥ नियुज्यमानो राज्याय नैच्छद्राज्य महाबल । स जगाम वन, वीरो, रामपादप्रसादकः ॥ ३४ ॥ गत्वा तु [illegible]

रामं सत्यपराक्रमम् । अयाचद्भ्रातरं रामभार्यं भावपुरस्कृतम् ॥ ३५ ॥ त्वमेव राजा धर्मज्ञ इति रामं वचोऽब्रवीत् । रामोऽपि परमोदारः सुमुखः सुमहायशाः ॥ ३६ ॥ न चेच्छतिपितुरादेशाद्राज्यं रामो महानलः । पादुके चास्य राज्याय न्यासं दत्त्वा पुनः पुनः ॥ ३७ ॥ निवर्तयामास ततो भरतं भरताग्रजः । स काममनवाप्यैव रामपादावुपस्पृशन् ॥ ३८ ॥ नन्दिग्रामेऽकरोद्राज्यं रामागमनकाङ्क्षया । गते तु भरते श्रीमान्सत्यसंधो जितेन्द्रियः ॥ ३९ ॥ रामस्तु पुनरालक्ष्य नागरस्य जनस्य च । तत्रागमनमेकाग्रो दण्डकान्प्रविवेश ह ॥ ४० ॥ प्रविश्य तु महारण्यं रामो राजीवलोचनः । विराधं राक्षसं हत्वा शरभङ्गं ददर्श ह ॥ ४१ ॥ सुतीक्ष्णं चाप्यगस्त्यं च अगस्त्यभ्रातरं तथा । अगस्त्यवचनाच्चैव जग्राहैन्द्रं शरासनम् ॥ ४२ ॥ खड्गं च परमप्रीतस्तूणी चाक्षय्यसायकौ । वसतस्तस्य रामस्य वने वनचरैः सह ॥ ४३ ॥ ऋषयो-

ऽभ्यागमन्सर्वे वधायासुरक्षसाम् । स तेषां प्रति-
शुश्राव राक्षसानां तदा वने ॥ ४४ ॥ प्रतिज्ञात-
श्च रामेण वधः संयति रक्षसाम् । ऋषीणामग्नि-
कल्पानां दण्डकारण्यवासिनाम् ॥ ४५ ॥ तेन तत्रै-
व वसता जनस्थाननिवासिनी । विरूपिता शूर्प-
णखा राक्षसी कामरूपिणी ॥ ४६ ॥ ततः शूर्पणखा-
वाक्यादुद्युक्तान्सर्वराक्षसान् । खरं त्रिशिरसं चैव
दूषणं चैव राक्षसम् ॥४७॥ निजघान रणे रामस्तेषां
चैव पदानुगान् । वने तस्मिन्निवसता जनस्थान-
निवासिनाम् ॥ ४८ ॥ रक्षांसि निहतान्यासन्सह-
स्राणि चतुर्दश । ततो ज्ञातिवधं श्रुत्वा रावणः
क्रोधमूर्छितः ॥ ४९ ॥ सहायं वरयामास मारीचं
नाम राक्षसम् । वार्यमाणः सुबहुशो मारीचेन स
रावणः ॥ ५० ॥ न विरोधो बलवता क्षमो रावण
तेन ते । अनादृत्य तु तद्वाक्यं रावणः कालचो-
दितः ॥ ५१ ॥ जगाम सहमारीचस्तस्याश्रमपदं
तदा । तेन मायाविना दूरमपवाह्य नृपात्मजौ

॥ ५२ ॥ जहार भार्यां रामस्य गृध्रं हत्वा जटायु-
षम् । गृध्रं च निहतं दृष्ट्वा हृतां श्रुत्वा च मैथिली-
म् ॥ ५३ ॥ राघवः शोकसंतप्तो विललापाकुले-
न्द्रियः । ततस्तेनैव शोकेन गृध्रं दग्ध्वा जटायुष-
म् ॥ ५४ ॥ मार्गमाणो वने सीतां राक्षसं संददर्श-
ह । कबन्धं नाम रूपेण विकृतं घोरदर्शनम् ॥५५॥
तं निहत्य महाबाहुर्ददाह स्वर्गतश्च सः । स चास्य
कथयामास शबरीं धर्मचारिणीम् ॥ ५६ ॥ श्रम-
णां धर्मनिपुणामभिगच्छेति राघवम् । सोऽभिग-
च्छन्महातेजाः शबरीं शत्रुसूदनः ॥ ५७ ॥ शब-
र्या पूजितः सम्यग्रामो दशरथात्मजः । पम्पातीरे
हनुमता संगतो वानरेण ह ॥ ५८ ॥ हनुमद्वच-
नाच्चैव सुग्रीवेण समागतः । सुग्रीवाय च तत्सर्वं
शंसद्रामो महाबलः ॥ ५९ ॥ आदितस्तद्यथावृत्तं
सीतायाश्च विशेषतः । सुग्रीवश्चापि तत्सर्वं श्रुत्वा
रामस्य वानरः ॥ ६० ॥ चकार सख्यं रामेण प्री-
तश्चैवाग्निसाक्षिकम् । ततो वानरराजेन वैरानुकथनं

प्रति ॥ ६१ ॥ रामायावेदितं सर्वं प्रणयाद् विने
न च । प्रतिज्ञातं च रामेण तदा वालिवधं प्रति
॥ ६२ ॥ वालिनश्च बलं तत्र कथयामास वानर ।
सुग्रीव शङ्कितश्चासीन्नित्य वीर्येण राघवे ॥ ६३ ॥
राघवप्रत्ययार्थं तु दुन्दुभे कायमुत्तमम् । दर्शया-
मास सुग्रीवो महापर्वतसन्निभम् ॥ ६४ ॥ उत्स्म-
यित्वा महाबाहु प्रेक्ष्य चास्थि महाबल । पदा-
ङ्गुष्ठेन चिक्षेप सपूर्णं दशयोजनम् ॥ ६५ ॥ बिभेद
च पुनस्तालान्सप्तैकेन महेषुणा । गिरिं रसातलं
चैव जनयन्प्रत्ययं तदा ॥ ६६ ॥ तत प्रीतमना
स्तेन विश्वस्त स महाकपि । किष्किन्धां रामस
हितो जगाम च गुहा तदा ॥ ६७ ॥ ततोऽगर्ज
द्धरिवर सुग्रीवो हेमपिङ्गल । तेन नादेन महता
निर्जगाम हरीश्वर ॥ ६८ ॥ अवमन्य तदा तारां सु-
ग्रीवेण समागत । निजघान च तत्रैव शरेणैकेन राघ
व ॥ ६९ ॥ तत सुग्रीववचनाद्धत्वा वालिनमाहवे ।
सुग्रीवमेव तद्राज्ये राघव प्रत्यपादयत् ॥ ७० ॥ स च

[illegible]

[illegible] प्रस[illegible]

[illegible]

[illegible]

[illegible]

त्मान समुद्र सरितांपति । समुद्रवचनाच्चैव नलः सेतुमकारयत् ॥८०॥ तेन गत्वा पुरीं लङ्कां हत्वा रावणमाहवे । राम सीतामनुप्राप्य परां व्रीडामुपागमत्॥८१॥तामुवाच ततो राम परुषं जनसंसदि । अमृष्यमाणा सा सीता विवेश ज्वलनं सती ॥८२॥ ततोऽग्निवचनात्सीतां ज्ञात्वा विगतकल्मषाम् । कर्मणा तेन महता त्रैलोक्यं सचराचरम् ॥ ८३ ॥ सदेवर्षिगणं तुष्टं राघवस्य महात्मनः । बभौ राम सुसंहृष्टः पूजितः सर्वदैवतैः ॥ ८४ ॥ अभिषिच्य च लङ्कायां राक्षसेन्द्रं विभीषणम् । कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह ॥ ८५ ॥ देवताभ्यो वरं प्राप्य समुत्थाप्य च वानरान् । अयोध्यां प्रस्थितो राम पुष्पकेण सुहृद्वृतः ॥ ८६ ॥ भरद्वाजाश्रमं गत्वा राम सत्यपराक्रमः । भरतस्यान्तिके रामो हनुमन्तं व्यसर्जयत् ॥ ८७ ॥ पुनराख्यायिकां जल्पन्सुग्रीवसहितस्तदा । पुष्पकं तत्समारुह्य नन्दिग्रामं ययौ तदा ॥ ८८ ॥ नन्दिग्रामे

[illegible] गम
[illegible] ॥ [illegible] ॥ ग्रह
[illegible] । निगमया
[illegible] ॥ न [illegible]
[illegible] नित्य
[illegible]

मिष्यति ॥ ९७ ॥ इद पवित्र पापघ्नं पुण्यं वेदैश्च संमितम् । य पठेद्रामचरित सर्वपापै. प्रमुच्यते ॥ ९८ ॥ एतदाख्यानमायुष्य पठन् रामायण नर । सपुत्रपौत्र सगण प्रेत्य स्वर्गे महीयते ॥ ९९ ॥ पठन् द्विजो वागृषभत्वमीयात् क्षत्रस्तया भूमिपतित्वमीयात् । वणिग्जन सस्यफलत्वमीयाज्जनश्च शूद्रोऽपि महत्त्वमीयात् ॥ १०० ॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये नारदवाक्ये संक्षिप्त प्रथम सर्ग ॥ १ ॥ ८० ॥

९ रामस्तुतिर्ब्रह्मदेवकृता (अध्यात्म०)।

श्रीगणेशाय नम । ब्रह्मोवाच । वन्दे देव विष्णुमशेषस्थितिहेतुं त्वामध्यात्मज्ञानिभिरन्तर्हृदि भाव्यम् । हेयाहेयद्वन्द्वविहीन परमेकं सत्तामात्र सर्वहृदिस्थ दृशिरूपम् ॥ १ ॥ प्राणापानौ निश्चयबुद्ध्या हृदि रुध्वा छित्त्वा सर्वं संशयबन्धं विषयौघान् । पश्यन्तीश य गतमोहा यतयस्तं वन्दे रामं रत्नकिरीट रविभासम् ॥ २ ॥ मायातीतं माधव

परममपरं परात्मभूतं सततमहं प्रणतोऽस्मि राम-
चन्द्रम् ॥ १ ॥ निरवधिसुखमिन्दिराकटाक्षं क्षपि-
तसुरेन्द्रचतुर्मुखादिदुःखम् । नरवरमनिशं नतो-
ऽस्मि रामं वरदमहं वरचापबाणहस्तम् ॥ २ ॥
त्रिभुवनकमनीयरूपमीड्यं रविशतभासुरमीहितप्र-
दानम् । शरणदमनिशं सुरागमूले कृतनिलयं
रघुनन्दनं प्रपद्ये ॥ ३ ॥ भवविपिनदवाग्निनामधेयं
भवमुखदैवतदैवतं दयालुम् । दनुजपतिसहस्रको-
टिनाशं रवितनयासदृशं हरिं प्रपद्ये ॥ ४ ॥
अविरतभवभावनातिदूरं भवविमुखैर्मुनिभिः सदैव
दृश्यम् । भवजलधिसुतारणाङ्घ्रिपोतं शरणमहं रघु-
नन्दनं प्रपद्ये ॥ ५ ॥ गिरिशगिरिसुतामनोनिवास
गिरिवरधारिणमीहिताभिरामम् । सुरवरदनुजेन्द्रसे-
विताङ्घ्रिं सुरवरदं रघुनायकं प्रपद्ये ॥ ६ ॥ परध-
नपरदारवर्जितानां परगुणभूतिषु तुष्टमानसानाम् ।
परहितनिरतात्मनां सुसेव्यं रघुवरमम्बुजलोचनं प्र-
पद्ये ॥ ७ ॥ स्मितरुचिरविकासिताननाब्जमति-

त्तो रघुनन्दन देहि० ॥४॥ दोषविहिंस्रभुजङ्गसहस्रसु-
रोषमहानलकीलकलापे जन्मजरामरणोर्मिमनोम-
दमन्मथनक्रविचक्रभवाब्धौ । दुःखनिधौ च चिरं
पतितं कृपयाद्य समुद्धर राम ततो मा त्वां भ-
जतो० ॥ ५ ॥ संसृतिघोरमदोत्कटकुञ्जरतृद्‌क्षुद-
नीरदपिण्डिततुण्ड दण्डकरोन्माथित च रजस्तमउन्म-
दमोहपदोज्झितमार्तम् । दीनमनन्यगतिं कृपणं
शरणागतमाशु विमोचय मूढं त्वां भजतो० ॥ ६ ॥
जन्मशतार्जितपापसमन्वितहृत्कमले पतिते पशु-
कल्पे हे रघुवीर महारणधीर दया कुरु मय्यति-
मन्दमनीषे । त्वं जननी भगिनी च पिता मम
तावदसि त्वविताऽपि कृपालो त्वां भजतो० ॥ ७ ॥
त्वां नु दयालुमकिंचनवत्सलमुत्पलहारमपारमुदार
राम विहाय कमन्यमनामयमीश जनं शरणं ननु
यायाम् । त्वत्पदपद्ममतः श्रितमेव मुदा खलु देव
सदाऽव्य ममैतं त्वां भजतो० ॥ ८ ॥ यः करुणा
मृतसिन्धुरनाथजनोत्तमबन्धुरजोत्तमकारी भक्तभयो-

मिभवाब्धितरी शरयूतटिनीतटचारुविहारी । तस्य
रघुप्रवरस्य निरन्तरमष्टकमेतदनिष्टहरं वै यस्तु पठे-
दमरः स नरो लभतेऽच्युतरामपदाम्बुजदास्यम्॥९॥
इति श्रीमन्मधुसूदनाश्रमशिष्याऽच्युतयतिविर-
चितं श्रीमत्सीतारामाष्टकं संपूर्णम् ॥ ४८ ॥

९ रामाष्टकम् (श्रीव्यास ।)

श्रीगणेशाय नमः । भजे विशेषसुन्दरं समस्तपाप-
खण्डनम् । स्वभक्तचित्तरञ्जनं सदैव राममद्वयम् ॥
॥ १ ॥ जटाकलापशोभितं समस्तपापनाशकम् ।
स्वभक्तभीतिभञ्जनं भजे ह राममद्वयम् ॥ २॥ नि-
जस्वरूपबोधकं कृपाकरं भवापहम् । समं शिवं
निरञ्जनं भजे ह राममद्वयम् ॥ ३ ॥ सप्रपञ्चक-
ल्पितं ह्यनामरूपवास्तवम् । निराकृतिं निरामयं
भजे ह राममद्वयम् ॥ ४ ॥ निष्प्रपञ्चनिर्विकल्पनिर्-
मलं निरामयम् । चिदेकरूपसन्ततं भजे ह रामम-
द्वयम् ॥ ५ ॥ भवाब्धिपोतरूपकं

तम् । गुणाकरं कृपाकर भजे ह राममद्वयम्॥६॥महावाक्यबोधकैर्विराजमानवाक्पदैः । परब्रह्मव्यापकं भजे ह राममद्वयम् ॥ ७ ॥ शिवप्रदं सुखप्रद भवच्छिद भ्रमापहम् । विराजमानदैहिकं भजे ह राममद्वयम् ॥८॥ रामाष्टक पठति य सुकर सुपुण्यं व्यासेन भाषितमिद शृणुते मनुष्य । विद्या श्रिय विपुलसौख्यमनन्तकीर्ति संप्राप्य देहविलये लभते च मोक्षम् ॥ ९॥ इति श्रीव्यासविरचित रामाष्टक सपूर्णम् ॥ ८५ ॥

१० रामस्तुति (महादेवकृता)।

श्रीगणेशाय नम । श्रीमहादेव उवाच । नमोऽस्तु रामाय सशक्तिकाय नीलोत्पलश्यामलकोमलाय । किरीटहाराङ्गदभूषणाय सिंहासनस्थाय महाप्रभाय ॥ १ ॥ त्वमादिमध्यान्तविहीन एक सृजस्यवस्यत्सि च लोकजातम् । स्वमायया तेन न लिप्यसे त्वं यत्स्वे सुखेऽजस्ररतोऽनवद्य ॥ २ ॥

स्त्रीत्वा विधत्से गुणसवृतस्त्व प्रसन्नभक्तानुविधानहेतो । नानाऽवतारे सुरमानुषाद्ये प्रतीयसे ज्ञानिभिरेव नित्यम् ॥ ३ ॥ स्वांशेन लोक सकल विधाय त बिभर्षि च त्व त्वदध फणीश्वर । उपर्यधो भान्वनिलोडुपौषधीप्रवर्षरूपोऽवसि नैकधा जगत ॥ ४ ॥ त्वमिह देहभृता शिखिरूपक पचसि भक्तमशेषमजस्रम् । पवनपञ्चकरूपसहायो जगदखण्डमनेन बिभर्षि ॥ ५ ॥ चन्द्रसूर्यशिखिमध्यगत यत्तेज ईश चिदशेषतनूनाम् । प्राभवत्तनुभृतामिह धैर्य शौर्यमायुरखिल तव सत्त्वम् ॥ ६ ॥ त्व विरिञ्चिशिवविष्णुविभेदात्कालकर्मशशिसूर्यविभागात । वादिना पृथगिवेश विभासि ब्रह्म निश्चितमनन्यदिहैकम् ॥ ७ ॥ मत्स्यादिरूपेण यथा त्वमेक श्रुतौ पुराणेषु च लोकसिद्ध । तथैव सर्व सदसद्विभागस्त्वमेव नान्यद्भवतो विभाति ॥ ८ ॥ यद्यत्समुत्पन्नमनन्तसृष्टावुत्पत्स्यते यच्च भवच्च यच्च । न दृश्यते स्थावरजङ्गमादौ त्वया विनाऽत परस्त

परस्त्वम् ॥ ९ ॥ तत्त्वं न जानन्ति परात्मनस्ते जना
समस्तास्तव माययात । त्वद्भक्तसेवामलमानसान
विभाति तत्त्व परमेकमैशम् ॥ १० ॥ ब्रह्मादयस्
न विदु स्वरूप चिदात्मतत्त्व बहिरर्थभावा । तत
बुधस्त्वामिदमेव रूप भक्त्या भजन्मुक्तिमुपैत्य
दु ख ॥ ११ ॥ अह भवन्नामगुणै कृतार्थो वसा
काश्यामनिशं भवान्या । मुमूर्षमाणस्य विमुक्त
येऽह दिशामि मन्त्रं तव रामनाम ॥ १२ ॥ इ
स्तव नित्यमनन्यभक्त्या शृण्वन्ति गायन्ति लिखन्ति
ये वै । ते सर्वसौख्य परम च लब्ध्वा भवत्प
यान्ति भवत्प्रसादात ॥ १३ ॥ इति श्रीमहादेवकृत
रामस्तोत्र सपूर्णम् ॥ ८६ ॥

९१ रामस्तोत्रम् (अहल्याकृतम् ।)

श्रीगणेशाय नम । अहल्योवाच । अहो कृता
र्थाऽस्मि जगन्निवास ते पादाब्जसलग्नरज कणाद
हम् । स्पृशामि यत्पद्मजशङ्करादिभिर्विमृग्यते

रन्धितमानसे सदा ॥ १ ॥ अहो विचित्रं तव राम चेष्टितं मनुष्यभावेन विमोहितं जगत् । चलस्यजस्रं चरणादिवर्जितः संपूर्ण आनन्दमयोऽतिमायिक ॥ २ ॥ यत्पादपङ्कजपरागपवित्रगात्रा भागीरथी भवविरिञ्चिमुखान्पुनाति । साक्षात्स एव मम दृग्विषयो यदास्ते किं वर्ण्यते मम पुराकृतभागधेयम् ॥ ३ ॥ मर्त्यावतारे मनुजाकृतिं हरिं रामाभिधेयं रमणीयदेहिनम् । धनुर्धरं पद्मविशाललोचनं भजामि नित्यं न परान्भजिष्ये ॥ ४ ॥ यत्पादपङ्कजरजः श्रुतिभिर्विमृग्यं यन्नाभिपङ्कजभवः कमलासनश्च । यन्नामसाररसिको भगवान्पुरारिस्तं रामचन्द्रमनिशं हृदि भावयामि ॥ ५ ॥ यस्यावतारचरितानि विरिञ्चिलोके गायन्ति नारदमुखा भवपद्मजाद्याः । आनन्दजाश्रुपरिषिक्तकुचाग्रसीमा वागीश्वरी च तमहं शरणं प्रपद्ये ॥ ६ ॥ सोऽयं परात्मा पुरुषः पुराण एषः स्वयंज्योतिरनन्त आद्यः । मायातनुं लोकविमोहनीयां धत्ते परानुग्र-

नन्यधी ॥ १५ ॥ देव मे यत्र कुत्रापि स्थिताया
अपि सर्वदा । त्वत्पादकमले सक्ता भक्तिरेव सदा-
ऽस्तु मे ॥ १६ ॥ नमस्ते पुरुषाध्यक्ष नमस्ते
भक्तवत्सल । नमस्तेऽस्तु हृषीकेश नारायण नमो-
ऽस्तु ते ॥ १७ ॥ भवभयहरमेकं भानुकोटिप्रकाशं
करधृतशरचापं कालमेघावभासम् । कनकरुचिर
वस्त्रं रत्नवत्कुण्डलाढ्यं कमलविशदनेत्रं सानुजं राम
मीडे ॥ १८ ॥ स्तुत्वैवं पुरुषं साक्षाद्राघवं पुरतः
स्थितम् ॥ परिक्रम्य प्रणम्याथ सानुज्ञाता ययौ
पतिम् ॥ १९ ॥ अहल्यया कृतं स्तोत्रं यः पठेद्भ-
क्तिसंयुतः । स मुच्यतेऽखिलैः पापैः परं ब्रह्माधि
गच्छति ॥ २० ॥ पुत्राद्यर्थं यः पठेद्भक्त्या रामं हृदि
निधाय च । संवत्सरेण लभते वन्ध्या अपि सुपुत्र
कम् ॥ २१ ॥ सर्वान्कामानवाप्नोति रामचन्द्रप्रसा
दतः ॥ २२ ॥ ब्रह्मघ्नो गुरुतल्पगोऽपि पुरुषः
स्तेयी सुरापोऽपि वा मातृभ्रातृविहिंसकोऽपि स
ततं भोगैकबद्धातुरः । नित्यं स्तोत्रमिदं जपन्

॥ ४ ॥ महायोगमायाविशेषानुयुक्तो विभासीश लीलानराकारवृत्ति । त्वदानन्दलीलाकथापूर्णकर्णा: सदानन्दरूपा भवन्तीह लोके ॥ ५ ॥ अहं मानपानाभिमत्तप्रमत्तो न वेदाखिलेशाभिमानाभिमान । इदानीं भवत्पादपद्मप्रसादात्त्रिलोकाधिपत्याभिमानो विनष्ट ॥ ६ ॥ स्फुरद्रत्नकेयूरहाराभिराम धराभारभूतासुरानीकदावम् । शरच्चन्द्रवक्त्र लसत्पद्मनेत्र दुरावारपार भजे राघवेशम् ॥ ७ ॥ सुराधीश नीलाभ्रनीलाङ्गकान्ति विराधादिरक्षोवधाल्लोकशान्तिम् । किरीटादिशोभं पुरारातिलाभं भजे रामचन्द्रं रघूणामधीशम् ॥ ८ ॥ लसच्चन्द्रकोटिप्रकाशादिपीठे समासीनमेकं समाधाय सीताम् । स्फुरद्धेमवर्णां तडित्पुञ्जभासा भजे रामचन्द्र निवृत्तार्तितन्द्रम् ॥ ९ ॥ इति श्रीमदध्यात्मरामायणे युद्धकाण्डे इन्द्रकृत रामस्तोत्रं संपूर्णम् ॥ ८८ ॥

१३ रामचन्द्राष्टकम् (अमरदास) ।

ॐ श्रीगणेशाय नम । ॐ चिदाकारो धाता परम

सुखद पावनतनुर्मुनीन्द्रैर्योगीन्द्रैर्यतिपतिसुरेन्द्रैर्हनुमता। सदा सेव्य पूर्णो जनकतनयाङ्गः सुरगुरू रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ १ ॥ मुकुन्दो गोविन्दो जनकतनयालालितपद पद प्राप्ता यस्याधमकुलभवा चापि शबरी । गिरातीतो गम्यो विमलधिषणैर्वेदवचसा रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ २ ॥ धराधीशोऽधीश सुरनरवराणां रघुपति किरीटी केयूरी कनककपिश शोभितवपु । समासीन पीठे रविशतनिभे शान्तमनसो रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ ३ ॥ वरेण्य शरण्य कपिपतिसखा चान्तविधुरो लल्लाटे काश्मीरो रुचिरगतिभङ्ग शशिमुख । नराकारो रामो यतिपतिनुत संसृतिहरो रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ ४ ॥ विरूपाक्ष काश्यामुपदिशति यन्नाम शिवदं सहस्रं यन्नाम्नां पठति गिरिजा प्रत्युषसि वै । स्वर्गे के गायन्तीशगतिविमुखा यस्य

चरित रमानाथो रामो रमतु मम चित्ते तु सततम्
॥५॥ परो धीरो धीरोऽसुरकुलभवश्चासुरहर प-
रात्मा सर्वज्ञो नरसुरगणैर्गीतसुयशा । अहल्या-
शापघ्न शरकर अज कौशिकसखा रमानाथो रा-
मो रमतु मम चित्ते तु सततम् ॥ ६ ॥ हृषीकेशः
शौरिर्धरणिधरशायी मधुरिपुरुपेन्द्रो वैकुण्ठो गजरि-
पुहरस्तुष्टमनस । बलिध्वंसी वीरो दशरथसुतो
नीतिनिपुणो रमानाथो रामो रमतु मम चित्ते तु
सततम् ॥ ७ ॥ कवि सौमित्रीड्य कपटमृग-
घाती वनचरो रणश्लाघी दान्तो धरणिभरहर्ता सुर-
नुत । अमानी मानज्ञो निखिलजनपूज्यो हृदि-
शयो रमानाथो रामो रमतु मम चित्ते तु सततम्
॥ ८ ॥ इद रामस्तोत्र वरममरदासेन रचित उप काले
भक्त्या यदि पठति यो भावसहितम् । मनुष्य स-
क्षिप्र जनिमृतिभय तापजनक परित्यज्य श्रेष्ठ रघुप-
तिपद याति शिवदम् ॥ ९ ॥ इति श्रीमद्रामदास-
पूज्यपादशिष्यश्रीमद्धमदासशिष्येणामरदासाख्यक
विना विरचित श्रीरामचन्द्राष्टक समाप्तम् ॥ ८९ ॥

देवीस्तोत्राणि।



१ महालक्ष्म्यष्टकम् (इन्द्रकृतम्)।

श्रीगणेशाय नमः । इन्द्र उवाच । नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते । शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते ॥ १ ॥ नमस्ते गरुडारूढे कोलासुरभयङ्करि । सर्वपापहरे देवि महालक्ष्मि नमोऽस्तु० ॥ २ ॥ सर्वज्ञे सर्ववरदे सर्वदुष्टभयंकरि । सर्वदुःखहरे देवि महालक्ष्मि नमोऽस्तु० ॥ ३ ॥

सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनि । मन्त्रमूर्ते सदा देवि महालक्ष्मि० ॥ ४ ॥ आद्यन्तरहिते देवि आद्यशक्तिमहेश्वरि । योगजे योगसंभूते महालक्ष्मि० ॥ ५ ॥ स्थूलसूक्ष्ममहारौद्रे महाशक्ति महोदरे । महापापहरे देवि महालक्ष्मि० ॥ ६ ॥ पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि । परमेशि जगन्मातर्महालक्ष्मि० ॥ ७ ॥ श्वेताम्बरधरे देवि नानालङ्कारभूषिते । जगत्स्थिते जगन्मातर्महालक्ष्मि० ॥ ८ ॥ महालक्ष्म्यष्टकस्तोत्रं यः पठेद्भक्तिमान्नरः । सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा ॥ ९ ॥ एककाले पठेन्नित्यं महापापविनाशनम् । द्विकालं यः पठेन्नित्यं धनधान्यसमन्वितः ॥ १० ॥ त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम् । महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा ॥ ११ ॥ इतीन्द्रकृतं श्रीमहालक्ष्म्यष्टकस्तोत्रं संपूर्णम् ॥ ९० ॥

२ त्रिपुरसुन्दरीस्तोत्रं (शङ्कराचार्य)।

श्रीगणेशाय नम । कदम्बवनचारिणीं मुनिकदम्बकादम्बिनीं नितम्बजितभूधरा सुरनितम्बिनीसेविताम् । नवाम्बुरुहलोचनामभिनवाम्बुदश्यामलां त्रिलोचनकुटुम्बिनीं त्रिपुरसुन्दरीमाश्रये ॥१॥ कदम्बवनवासिनीं कनकवल्लकीधारिणीं महार्हमणिहारिणीं मुखसमुल्लसद्वारुणीम् । दयाविभवकारिणीं विशदलोचनीं चारिणीं त्रिलोचनकुटुम्बिनीं त्रिपुरसुन्दरीमाश्रये ॥ २ ॥ कदम्बवनशालया कुचभरोल्लसन्मालया कुचोपमितशैलया गुरुकृपालसद्वेलया । मदारुणकपोलया मधुरगीतवाचालया कयापि घननीलया कवचिता वय लीलया ॥३॥ कदम्बवनमध्यगा कनकमण्डलोपस्थिना षडम्बुरुहवासिनीं सततसिद्धसौदामिनीम् । विडम्बितजपारुचिं विकचचन्द्रचूडामणिं त्रिलोचनकुटुम्बिनीं त्रिपुरसुन्दरीमाश्रये ॥ ४ ॥ कुचाञ्चितविपञ्चिका कुटिलकुन्तलालंकृतां कुशेशय-

निवासिनीं कुटिलचित्तविद्वेषिणीम् । मदारुण-
विलोचना मनसिजारिसंमोहिनीं मतङ्गमुनिक-
न्यका मधुरभाषिणीमाश्रये ॥ ५॥ स्मरेत्प्रथमपु-
ष्पिणीं रुधिरबिन्दुनीलाम्बरा गृहीतमधुपात्रिका म-
धुविघूर्णनेत्राञ्चलाम् । घनस्तनभरोन्नता गलितचू-
लिका श्यामला त्रिलोचनकुटुम्बिनीं त्रिपुरसुन्दरीमा-
श्रये ॥ ६ ॥ सकुङ्कुमविलेपनामलकचुम्बिकस्तूरिका
समन्दहसितेक्षणा सशरचापपाशाङ्कुशाम् । अशेष-
जनमोहिनीमरुणमाल्यभूषाम्बरा जपाकुसुमभासुरां
जपविधौ स्मराम्यम्बिकाम् ॥ ७ ॥ पुरंदरपुरन्ध्रिका
चिकुरबन्धसैरन्धिका पितामहपतिव्रता पटुपटीरच-
र्चारताम् । मुकुन्दरमणी मणीलसदलंक्रियाका-
रिणीं भजामि भुवनाम्बिका सुरवधूटिका चेटि-
काम् ॥ ८ ॥ इति श्रीमत्परमहंसपरिव्राजका-
चार्यश्रीमच्छंकराचार्यविरचितं त्रिपुरसुन्दरीस्तोत्रं
संपूर्णम् ॥ ९१ ॥

३ देव्यपराधक्षमापणस्तोत्रं (शक०) ।

श्रीगणेशाय नम । न मन्त्र नो यन्त्र तदपि च न जाने स्तुतिमहो न चाह्वान ध्यान तदपि च न जाने स्तुतिकथा । न जाने मुद्रास्ते तदपि च न जाने विलपनं परं जाने मातस्त्वदनुशरण क्लेशहरणम् ॥ १ ॥ विधेरज्ञानेन द्रविणविरहेणालसतया विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत् । तदेतत्क्षन्तव्य जननि सकलोद्धारिणि शिवे कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ २ ॥ पृथिव्या पुत्रास्ते जननि बहव सन्ति सरला पर तेषा मध्ये विरलतरलोऽहं तव सुत । मदीयोऽय त्याग समुचितमिद नो तव शिवे कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ ३ ॥ जगन्मातर्मातस्तव चरणसेवा न रचिता न वा दत्त देवि द्रविणमपि भूयस्तव मया । तथापि त्व स्नेह मयि निरुपमं यत्प्रकुरुषे कुपुत्रो जायेत क्वचिदपि कुमाता न भवति

॥ ४ ॥ परित्यक्ता देवान्विविधविधिसेवाकुलतया मया पञ्चाशीतेरधिकमपनीते तु वयसि । इदानीं चेन्मातस्तव यदि कृपा नापि भविता निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥५॥ श्वपाको जल्पाको भवति मधुपाकोपमगिरा निरातङ्को रङ्को विहरति चिरं कोटिकनकैः । तवापर्णे कर्णे विशति मनुवर्णे फलमिदं जनः को जानीते जननि जपनीयं जपविधौ ॥ ६ ॥ चिताभस्मालेपो गरलमशनं दिक्पटधरो जटाधारी कण्ठे भुजगपतिहारी पशुपतिः । कपाली भूतेशो भजति जगदीशैकपदवीं भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम् ॥ ७ ॥ न मोक्षस्याकाङ्क्षा न च विभववाञ्छापि च न मे न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः । अतस्त्वां संयाचे जननि जननं यातु मम वै मृडानी रुद्राणी शिव शिव भवानीति जपतः ॥ ८ ॥ नाराधितासि विधिना विविधोपचारैः किं रूक्षचिन्तनपरैर्न कृतं वचोभिः । श्यामे त्वमेव यदि

ध्यानास्येयो भवति रसनामात्रविषयः । तथा ते सौन्दर्यं परमशिवदृङ्मात्रविषयः कथंकारं ब्रूमः सकलनिगमागोचरगुणे ॥ २ ॥ मुखे ते ताम्बूलं नयनयुगले कज्जलकला ललाटे काश्मीरं विलसति गले मौक्तिकलता । स्फुरत्काञ्ची शाटी पृथुकटितटे हाटकमयी भजामस्त्वां गौरीं नगपतिकिशोरीमविरतम् ॥ ३ ॥ विराजन्मन्दारद्रुमकुसुमहारस्तनतटी नदद्वीणानादश्रवणविलसत्कुण्डलगुणा । नताङ्गी मातङ्गी रुचिरगतिभङ्गी भगवती सती शम्भोरम्भोरुहचटुलचक्षुर्विजयते ॥ ४ ॥ नवीनार्कभ्राजन्मणिकनकभूषापरिकरैर्वृताङ्गी सारङ्गी रुचिरनयनाङ्गीकृतशिवा । तडित्पीता पीताम्बरललितमञ्जीरसुभगा ममाऽपर्णा पूर्णा निरवधि सुखैरस्तु सुमुखी ॥ ५ ॥ हिमाद्रेः संभूता सुललितकरैः पल्लवयुता सुपुष्पा मुक्ताभिर्भ्रमरकलिता चालकभरैः । कृतस्थाणुस्थाना कुचफलनता सूक्तिसरसा रुजां हन्त्री गन्त्री विलसति चिदानन्दलतिका ॥ ६ ॥

सपर्णामाकीर्णां कतिपयगुणैः सादरमिह श्रयन्त्यन्ये वल्लीं मम तु मतिरेवं विलसति । अपर्णैका सेव्या जगति सकलैर्यत्परिवृतः पुराणोऽपि स्थाणुः फलति किल कैवल्यपदवीम् ॥ ७ ॥ विधात्री धर्माणां त्वमसि सकलाम्नायजननी त्वमर्थानां मूलं धनदनमनीयाङ्घ्रिकमले । त्वमादिः कामानां जननि कृतकन्दर्पविजये सतां मुक्तेर्बीजं त्वमसि परमब्रह्ममहिषी ॥ ८ ॥ प्रभूता भक्तिस्ते यदपि न ममालोलमनसस्त्वया तु श्रीमत्या सदयमवलोक्योऽहमधुना । पयोदः पानीयं दिशति मधुरं चातकमुखे भृशं शङ्के कैर्वा विधिभिरनुनीता मम मतिः ॥ ९ ॥ कृपापाङ्गालोकं वितर तरसा साधुचरिते न ते युक्तोपेक्षा मयि शरणदीक्षामुपगते । नचेदिष्टं दद्यादनुपदमहो कल्पलतिका विशेषः सामान्यैः कथमितरवल्लीपरिकरैः ॥ १० ॥ महान्तं विश्वासं तव चरणपङ्केरुहयुगे निधायान्यन्नैवाश्रितमिह मया देवि उमे । तथापि त्वच्चेतो यदि मयि न जायेत सदय

निरालम्बो लम्बोदरजननि क यामि शरणम् ॥ ११ ॥ अय स्पर्शे लग्नं सपदि लभते हेमपदवीं यथा रथ्यापाथः शुचि भवति गङ्गौघमिलितम् । तथा तत्तत्पापैरतिमलिनमन्तर्मम यदि त्वयि प्रेम्णासक्तं कथमिव न जायेत विमलम् ॥ २१ ॥ त्वदन्यस्मादिच्छाविषयफललाभेन नियमस्त्वमर्थानामिच्छादिकमपि समर्था वितरणे । इति प्राहुः प्राञ्चः कमलभवनाद्यास्त्वयि मनस्त्वदासक्तं नक्तंदिवमुचितमीशानि कुरु तत् ॥ १३ ॥ स्फुरन्नानारत्नस्फटिकमयभित्तिप्रतिफलत्त्वदाकारं चञ्चच्छशधरशिलासौधशिखरम् । मुकुन्दब्रह्मेन्द्रप्रभृतिपरिवारं विजयते तवागारं रम्यं त्रिभुवनमहाराजगृहिणि ॥ १४ ॥ निवासः कैलासे विधिशतमखाद्याः स्तुतिकराः कुटुम्बं त्रैलोक्यं कृतकरपुटः सिद्धिनिकरः । महेशः प्राणेशस्तदवनिधराधीशतनये न ते सौभाग्यस्य क्वचिदपि मनागस्ति तुलना ॥ १५ ॥ वृषो वृद्धो यानं विषमशनमाशानिवसनं श्मशानं क्रीडाभूर्भु



जगन्निवहो भूषणविधिः । समग्रा सामग्री जगति वि-
दितैव स्मररिपोर्यदेतस्यैश्वर्यं तव जननि सौभाग्यम-
हिमा ॥१६॥ अशेषब्रह्माण्डप्रलयविधिनैसर्गिकमतिः
श्मशानेष्वासीनः कृतभसितलेपः पशुपतिः । दधौ
कण्ठे हालाहलमखिलभूगोलकृपया भवत्याः संग-
त्याः फलमिति च कल्याणि कलये ॥ १७ ॥ त्व-
दीयं सौन्दर्यं निरतिशयमालोक्य परया भियैवा-
सीद्गङ्गा जलमयतनुः शैलतनये । तदेतस्यास्तस्मा-
द्वदनकमलं वीक्ष्य कृपया प्रतिष्ठामातेने निजशिरसि
वासेन गिरिशः ॥ १८ ॥ विशालश्रीखण्डद्रवमृग-
मदाकीर्णघुसृणप्रसूनव्यामिश्रं भगवति तवाभ्यङ्ग-
सलिलम् । समादाय स्रष्टा चलितपदपांसून्निजकरैः
समाधत्ते सृष्टिं विबुधपुरपङ्केरुहदृशाम् ॥ १९ ॥
वसन्ते सानन्दे कुसुमितलताभिः परिवृते स्फुरन्नाना-
पद्मे सरसि कलहंसालिसुभगे । सखीभिः खेल-
न्तीं मलयपवनान्दोलितजले स्मरेद्यस्त्वां तस्य ज्व

रजनितर्पीडाऽपसरति ॥ २० ॥ इति श्रीमत्परमहंस-
परिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितानन्दलहरी
सम्पूर्णा ॥ ९२ ॥

लक्ष्मीस्तोत्र (देवकृतम्) ।

श्रीगणेशाय नम । क्षमस्व भगवत्यम्ब क्षमा
शीले परात्परे । शुद्धसत्त्वस्वरूपे च कोपादिपरि-
वर्जिते ॥ १ ॥ उपमे सर्वसाध्वीना देवीना देवपू-
जिते । त्वया विना जगत्सर्वं मृततुल्य च निष्फ
लम् ॥ २ ॥ सर्वसम्पत्स्वरूपा त्व सर्वेषा सर्वरूपि-
णी । रासेश्वर्यधिदेवी त्व त्वत्कला सर्वयोषित
॥ ३ ॥ कैलासे पार्वती त्व च क्षीरोदे सिन्धुकन्यका ।
स्वर्गे च स्वर्गलक्ष्मीस्त्व मर्त्यलक्ष्मीश्च भूतले
॥ ४ ॥ वैकुण्ठे च महालक्ष्मीर्देवदेवी सरस्वती । ग
ङ्गा च तुलसी त्व च सावित्री ब्रह्मलोकत ॥ ५ ॥
कृष्णप्राणाधिदेवी त्व गोलोके राधिका स्वयम् ।
रासे रासेश्वरी त्व च वृन्दावनवने वने ॥ ६ ॥ कृ

ष्णप्रिया त्वं भाण्डीरे चन्द्रा चन्दनकानने । विरजा चम्पकवने शतशृङ्गे च सुन्दरी ॥ ७ ॥ पद्मावती पद्मवने मालती मालतीवने । कुन्ददन्ती कुन्दवने सुशीला केतकीवने ॥ ८ ॥ कदम्बमाला त्वं देवि कदम्बकाननेऽपि च । राजलक्ष्मी राजगेहे गृहल क्ष्मीर्गृहे गृहे ॥ ९ ॥ इत्युक्त्वा देवताः सर्वे मुनयो मनवस्तथा । रुरुदुर्नम्रवदना शुष्ककण्ठोष्ठता लुका ॥ १० ॥ इति लक्ष्मीस्तवं पुण्यं सर्वदेवैः कृतं शुभम् । यः पठेत्प्रातरुत्थाय स वै सर्वं लभे ध्रुवम् ॥ ११ ॥ अभार्यो लभते भार्यां विनी ना च सुतां सतीम् । सुशीलां सुन्दरीं रम्यामति सुप्रियवादिनीम् ॥ १२ ॥ पुत्रपौत्रवतीं शुद्धां कु लजां कोमलाम्बराम् । अपुत्रो लभते पुत्रं वैष्णवं चिरजीविनम् ॥ १३ ॥ परमैश्वर्ययुक्तं च विद्या वन्तं यशस्विनम् । भ्रष्टराज्यो लभेद्राज्यं भ्रष्टश्री र्लभते श्रियम् ॥ १४ ॥ हतबन्धुर्लभेद्बन्धुं धनभ्रष्टो धनं लभेत् । कीर्तिहीनो लभेत्कीर्तिं प्रतिष्ठां च

लभेद्ध्रुवम् ॥ १५ ॥ सर्वमङ्गलदं स्तोत्रं शोकसंतापनाशनम् । हर्षानन्दकरं शश्वद्धर्ममोक्षसुहृत्प्रदम् ॥ १६ ॥ इति श्रीदेवकृतं लक्ष्मीस्तोत्रं संपूर्णम् ॥ ९४ ॥

९ वाराहीनिग्रहाष्टकम् ।

श्रीगणेशाय नमः । देवि क्रोडमुखि त्वदङ्घ्रिकमलद्वन्द्वानुरक्तात्मने मह्यं द्रुह्यति यो महेशि मनसा कायेन वाचा नरः । तस्याशु त्वदयोग्यनिष्ठुरहलाघातप्रभूतव्यथापर्यस्यन्मनसो भवन्तु वपुषः प्राणाः प्रयाणोन्मुखाः ॥ १ ॥ देवि त्वत्पदपद्मभक्तिविभवप्रक्षीणदुष्कर्मणि प्रादुर्भूतनृशंसभावमलिना वृत्तिं विधत्ते मयि । यो देही भुवने तदीयहृदयान्निर्गत्वरैर्लोहितैः सद्यः पूरयसे कराब्जचषकं वाञ्छाफलैर्मामपि ॥ २ ॥ चण्डोत्तुण्डविदीर्णदुष्टहृदयप्रोद्भिन्नरक्तच्छटा—हालापानमदाट्टहासनिनदाटोपप्रतापोत्कटम् । मातर्मत्परिपन्थिनामपहृतैः प्राणैस्त्वद-

[illegible]

[illegible] नामि [illegible]

[illegible] नामा

[illegible]

[illegible]

तिपक्षमाशु पतितं भ्रान्तं लुठन्तं मुहुः ॥ ७ ॥ वा-
राहि त्वमशेषजन्तुषु पुनः प्राणात्मिका स्पन्दसे श-
क्त्याप्तचराचरा खलु यतस्त्वामेतदभ्यर्थये । त्व-
त्पादाम्बुजसङ्गिनो मम सकृत्पापं चिकीर्षन्ति ये
तेषां मा कुरु शङ्करप्रियतमे देहान्तरावस्थितिम्
॥ ८ ॥ इति श्रीवाराहीनिग्रहाष्टकं संपूर्णम् ॥ ९५ ॥

७ वाराह्यनुग्रहाष्टकम् ।

श्रीगणेशाय नमः । ईश्वर उवाच । मातर्जगद्रच
ननाटकसूत्रधार सद्रूपमाकलयितुं परमार्थतो यम्।
ईशोऽप्यनीश्वरपदं समुपैति तादृक्कोऽन्यः स्तवं किमिव
तावकमादधातु ॥ १ ॥ नामानि किं नु गृणतस्तव
लोकतुण्डे नाडम्बरं स्पृशति दण्डधरस्य दण्डः । यल्लेश
लम्बितभवाम्बुनिधिर्यतो यत्त्वन्नामसंभृतिरियं ननु
न स्तुतिस्ते ॥ २ ॥ त्वच्चिन्तनादरसमुल्लसदप्रमेया-
नन्दोदयात्समुदितः स्फुटरोमहर्षः । मातर्नमामि
सुदिनानि सदेत्यमुं त्वामभ्यर्थयेऽर्थमिति पूरयता-

दयालो ॥ ३ ॥ इन्द्रेन्दुमौलिविधिकेशवमौलिरत्नरोचिश्चयोज्ज्वलितपादसरोजयुग्मे । चेतो मतौ मम सदा प्रतिबिम्बिता त्वं भूया भवानि विदधातु सदोरुहारे ॥ ५ ॥ लीलोद्धृतक्षितितलस्य वराहमूर्तेर्वाराहमूर्तिरखिलार्थकरी त्वमेव । प्रालेयरश्मिसुकलोल्लसितावतंसा त्वं देवि वामतनुभागहरा हरस्य ॥ ५ ॥ त्वामम्ब तप्तकनकोज्ज्वलकान्तिमन्तर्ये चिन्तयन्ति युवतीतनुमागलान्ताम् । चक्रायुधत्रिनयनाम्बरपोतृनक्रा तेषां पदाम्बुजयुगं प्रणमन्ति देवा ॥ ६ ॥ त्वत्सेवनस्खलितपापचयस्य मातर्मोक्षोऽपि यत्र न सतां गणनामुपैति । देवासुरोरगनृपालनमस्यपादस्तत्र श्रियः पदगिरः कियदेनमस्तु ॥ ७ ॥ किं दुष्करं त्वयि मनोविषयं गतायां किं दुर्लभं त्वयि विधानवदर्चितायाम् । किं दुष्करं त्वयि सकृत्स्मृतिमागतायां किं दुर्जयं त्वयि कृतस्तुतिवादपुंसाम् ॥ ८ ॥ इति श्रीरागाम्बनुमदाष्टकं समाप्तम् ॥ १६ ॥

८ ताराष्टकं (नीलतन्त्रम्)।

श्रीगेशाय नम । मातर्नीलसरस्वति प्रणमतां सौभाग्यसम्पत्प्रदे प्रत्यालीढपदस्थिते शिवहृदि स्मेराननाम्भोरुहे । फुल्लेन्दीवरलोचनत्रययुते कर्त्री कपालोत्पले खड्ग चादधतीं त्वमेव शरण त्वामीश्वरीमाश्रये ॥१॥ वाचामीश्वरि भक्तकल्पलतिके सर्वार्थसिद्धिप्रदे गद्यप्राकृतपद्यजातरचना सर्वत्र सिद्धिप्रदे । नीलेन्दीवरलोचनत्रययुते कारुण्यवारांनिधे सौभाग्यामृतवर्षणेन कृपया सिञ्च त्वमस्मादृशम् ॥ २ ॥ सर्वे गर्वसमूहपूरिततनो सर्पादिवेषोज्ज्वले व्याघ्रत्वक्परिवीतसुन्दरकटिव्याधूतघण्टाङ्किते । सद्य कृत्तगलद्रज परिमिलन्मुण्डद्वयीमूर्धजग्रन्थिश्रेणिनृमुण्डदामललिते भीमे भय नाशय ॥ ३ ॥ मायानङ्गविकाररूपललनाबिन्द्वर्धचन्द्रात्मिके हुम्फट्कारमयि त्वमेव शरण मन्त्रात्मिके मादृश । मूर्तिस्ते जननि त्रिधामघटिता स्थूलातिसूक्ष्मा परा वेदाना नहि गो-

यस्य भवति सुदोऽपि वाचस्पति ॥ ८ ॥ ताराष्टकमिदं रम्यं भक्तिमान् य पठेन्नर । प्रातर्मध्याह्नकाले च सायाह्ने नियत शुचि ॥ ९ ॥ लभते कविता दिव्या सर्वशास्त्रार्थविद्भवेत । लक्ष्मीमनश्वरां प्राप्य भुक्त्वा भोगान् यथेप्सितान् ॥ १० ॥ कीर्ति कान्ति च नैरुज्यं सर्वेषां प्रियतां व्रजेत् । विख्यातिं चापि लोकेषु प्राप्यान्ते मोक्षमाप्नुयात ॥ ११ ॥ इति नीलतन्त्रे ताराष्टकं संपूर्णम् ॥ ९७ ॥

९ शीतलाष्टकम् (स्कन्दपुराणे) ।

श्रीगणेशाय नम । अस्य श्रीशीतलास्तोत्रस्य महादेव ऋषि । अनुष्टुप छन्द । श्रीशीतला देवता । लक्ष्मीर्बीजम् । भवानी शक्ति । सर्वविस्फोटकनिवृत्तये जपे विनियोग । ईश्वर उवाच । वन्देऽहं शीतला देवीं रासभस्था दिगम्बराम् । मार्जनीकलशोपेता शूर्पालङ्कृतमस्तकाम् ॥ १ ॥ वन्देऽहं शीतला देवीं सर्वरोगभयापहाम् । यामासाद्य

भक्तिसमन्विते । उपसर्गविनाशाय परं स्वस्त्ययनं महत् ॥ ११ ॥ शीतले त्वं जगन्माता शीतले त्वं जगत्पिता। शीतले त्वं जगद्धात्री शीतलायै नमो नमः ॥ १२ ॥ रासभो गर्दभश्चैव खरो वैशाखनन्दनः । शीतलावाहनश्चैव दूर्वाकन्दनिकृन्तनः ॥ १३ ॥ एतानि खरनामानि शीतलाग्रे तु यः पठेत् । तस्य गेहे शिशूनां च शीतलारुङ् न जायते ॥ १४ ॥ शीतलाष्टकमेवेदं न देयं यस्य कस्य चित् । दातव्यं च सदा तस्मै श्रद्धाभक्तियुताय वै ॥ १५ ॥ इति श्रीस्कन्दपुराणे शीतलाष्टकस्तोत्रं संपूर्णम् ॥ ९८ ॥

१० अन्नपूर्णास्तोत्रम् (शंकराचार्य)।

श्रीगणेशाय नमः । नित्यानन्दकरी वराभयकरी सौन्दर्यरत्नाकरी निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी । प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी माताऽन्न-

देहि० ॥६॥ आदिक्षान्तसमस्तवर्णनकरी शम्भोस्त्रिभावाकरी काश्मीरात्रिजलेश्वरी त्रिलहरी नित्याङ्कुरी शर्वरी। कामाकाङ्क्षकरी जनोदयकरी काशीपुराधीश्वरी भिक्षां देहि कृपा० ॥ ७ ॥ देवी सर्वविचित्ररत्नरचिता दाक्षायणी सुन्दरी वाम स्वादु पयोधरप्रियकरी सौभाग्यमाहेश्वरी। भक्ताभीष्टकरी दशाशुभकरी काशीपुराधीश्वरी भिक्षां देहि कृपा० ॥ ८॥ चन्द्रार्कानलकोटिकोटिसदृशा चन्द्रांशुबिम्बाधरी चन्द्रार्काग्निसमानकुन्तलधरी चन्द्रार्कवर्णेश्वरी। मालापुस्तकपाशसाङ्कुशधरी काशीपुराधीश्वरी भिक्षां देहि कृपा० ॥९॥ क्षत्रत्राणकरी महाभयकरी माता कृपासागरी साक्षान्मोक्षकरी सदा शिवकरी विश्वेश्वरी श्रीधरी दक्षाक्रन्दकरी निरामयकरी काशीपुराधीश्वरी भिक्षां देहि कृपा० ॥ १० ॥ अन्नपूर्णे सदापूर्णे शङ्करप्राणवल्लभे। ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि च पार्वति ॥ ११ ॥ माता च पार्वती देवी पिता देवो महेश्वरः। बा-

यकम् ॥ ६ ॥ इदं कवचमज्ञात्वा राधामन्त्रं तु यो जपेत । स नाप्नोति फलं तस्य विघ्नास्तस्य पदे पदे ॥ ७ ॥ ऋषिरस्य महादेवोऽनुष्टुपछन्दश्च कीर्तित । राधाऽस्य देवता प्रोक्ता राम्बीजं कीलकं स्मृतम् ॥ ८ ॥ धर्मार्थकाममोक्षेषु विनियोग प्रकीर्तित । श्रीराधा मे शिर पातु ललाट राधिका तथा ॥ ९ ॥ श्रीमती नेत्रयुगल कर्णौ गोपेन्द्रनन्दिनी । हरिप्रिया नासिका च भ्रूयुग शशिशोभना ॥ १० ॥ ओष्ठ पातु कृपादेवी अधर गोपिका तथा । वृषभानुसुता दन्तांश्चिबुकं गोपनन्दिनी ॥ ११ ॥ चन्द्रावली पातु गण्ड जिह्वा कृष्णप्रिया तथा । कण्ठ पातु हरिप्राणा हृदय विजया तथा ॥ १२ ॥ बाहू द्वौ चन्द्रवदना उदर सुबलस्वसा । कोटियोगान्विता पातु पादौ सौभद्रिका तथा ॥ १३ ॥ नाभिं चन्द्रमुखी पातु गुल्फौ गोपालवल्लभा । जानुदेश जया पातु गोपी पादतल तथा ॥ १४ ॥ शुभप्रदा पातु पृष्ठ कक्षौ श्रीकान्तवल्लभा । जानुदेश च-

नग । तस्य सिद्धिर्भवेद्देवि न भय विद्यते कचित्
॥ २४ ॥ आराधिता राधिका च तेन सत्य न
सशय । गगास्नानाद्धरेर्नामग्रहणाद्यत्फल लभेत
॥ २५ ॥ तत्फल तस्य भवति य पठेत्प्रयत शु-
चि । हरिद्रारोचनाचन्द्रमण्डित हरिचन्दनम् ॥२६॥
कृत्वा लिखित्वा भूर्जे च धारयेन्मस्तके भुजे ।
कण्ठे वा देवदेवेशि स हरिर्नात्र सशय ॥ २७ ॥
कवचस्य प्रसादेन ब्रह्मा सृष्टि स्थितिं हरि । स
हार चाह नियत करोमि कृत्ने तथा ॥ २८ ॥
वैष्णवाय विशुद्धाय विरागगुणशालिने । दद्यात्क
वचमव्यग्रमन्यथा नाशमाप्नुयात् ॥ २९ ॥ इति
श्रीनारदपञ्चरात्रे ज्ञानामृतसारे राधाकवच समा
प्तम् ॥ १०० ॥

१२ लघुस्तोत्रम (लघ्वाचार्य)।

श्रीगणेशाय नम । श्रीत्रिपुरसुन्दर्यै नम । आ
धारे तरुणार्कबिम्बरुचिर सोमप्रभ वाग्भव बीज

देवि तरसा जाते तवानुग्रहे वाच सूक्तिसुधारसद्र-
वमुचो निर्यान्ति वक्त्रोदरात् ॥ ३ ॥ यन्नित्ये तव
कामराजमपरं मन्त्राक्षरं निष्कलं तत्सारस्वतमित्य-
वैति विरलः कश्चिद्बुधश्चेद्भुवि । आख्यानं प्रतिपर्व
सत्यतपसो यत्कीर्तयन्तो द्विजाः प्रारम्भे प्रणवास्पद
प्रणयितं नीत्योच्चरन्ति स्फुटम् ॥ ४ ॥ यत्सद्यो
वचसां प्रवृत्तिकरणे दृष्टप्रभावं बुधैस्तार्तीयं तदहं
नमामि मनसा तद्बीजमिन्दुप्रभम् । अस्त्वौर्वोऽपि
सरस्वतीमनुगतो जाड्याम्बुविच्छित्तये गौः शब्दो
गिरि वर्त्तते सुनियतं योगं विना सिद्धिदः ॥ ५ ॥
एकैकं तव देवि जन्ममनघ मव्यञ्जनान्यञ्जनं कू-
टस्थं यदि वा पृथक्क्रमगतं यद्वा स्थितं व्युत्क्रमात् ।
यं यं काममपेक्ष्य येन विधिना केनापि वा चिन्तितं
जप्तं वा सफलीकरोति तरसा तं तं समस्तं नृणाम्
॥ ६ ॥ वामे पुस्तकधारिणीमभयदां साक्षस्रजं दक्षिणे
भक्तेभ्यो वरदानपेशलकरां कर्पूरकुन्दोज्ज्वलाम् ।
उज्जृम्भाम्बुजपत्रकान्तिनयनां स्निग्धप्रभालोकिनीं ये

जातोऽप्यल्पपरिच्छदे क्षितिभुजां सामान्यमात्रे कुले नि शेषावनिचक्रवर्तिपदवीं लब्ध्वा प्रतापोन्नत । यद्विद्याधरवृन्दवन्दितपद श्रीवत्सराजोऽभवद्देवि त्वच्चरणाम्बुजप्रणतिजः सोऽयं प्रसादोदय ॥१२॥ चण्डि त्वच्चरणाम्बुजार्चनकृते बिल्वीदलोल्लुण्ठनात् त्रुट्यत्कण्टककोटिभि परिचय येषा न जग्मु करा । ते दण्डाङ्कुशचक्रचापकुलिशश्रीवत्सवत्साङ्कितैर्जायन्ते पृथिवीभुजा कथमिवाम्भोजप्रभै पाणिभि ॥ १३ ॥ विप्रा क्षोणिभुजो विशस्तदितरे क्षीराज्यमध्वासवैस्त्वा देवि त्रिपुरे परा परकला सतर्प्य पूजाविधौ । या या प्रार्थयते मन स्थिरधियां येषां त एव ध्रुव ता ता सिद्धिमवाप्नुवन्ति तरसा विघ्नैरविघ्नीकृता ॥ १४ ॥ शब्दाना जननि त्वमत्र भुवने वाग्वादिनीत्युच्यते त्वत्त केशववासवप्रभृतयोऽप्याविर्भवन्ति ध्रुवम् । लीयन्ते खलु यत्र कल्पविरमे ब्रह्मादयस्तेऽप्यमी सा त्व काचिदचिन्त्यरूपगहना शक्ति परा गीयसे ॥ १५ ॥ देवाना

ासद्त्वेभ्य परेभ्यो नम ॥ १९ ॥ बोद्ध०

पुण्यं बुधैः स्तुतिरियं कृत्वा मनस्तद्गतं भारत्याखि-
प्रेत्यनन्यमनसा यत्राद्यवृत्तिस्फुटम् । एकादि-
त्रिपदक्रमेण कथितस्तत्पादसंख्याक्षरैर्मन्त्रोद्धारवि-
धिर्विशेषसहितं सत्सम्प्रदायान्वितम् ॥ २० ॥ सा-
वद्यं निरवद्यमस्तु यदि वा किं वाऽनया चिन्तया
नूनं स्तोत्रमिदं पठिष्यति जनो यस्यास्ति भक्ति-
स्त्वयि । सचिन्त्यापि लघुत्वमात्मनि दृढं संजाय-
मानं हठात् त्वद्भक्त्या मुखरीकृतेन रचितं यस्या-
न्मयापि ध्रुवम् ॥ २१ ॥ आनन्दोद्भवकम्पघूर्णनयनं
निद्रादृहासादिकं वेदव्याकरणावगाहरचितातर्क्यो-
क्तिमुक्तिप्रदम् । वश्याकर्षणपुरप्रवेशनगरक्षोभादिमि-
द्यषट्कं लघ्वाचार्यमिदं करोति सततं सौभाग्य-
मारोग्यताम् ॥ २२ ॥ गौरि त्र्यम्बकपत्नि पार्वति
सति त्रैलोक्यमातः शिवे शर्वाणि त्रिपुरे भवानि
वरदे रुद्राणि कात्यायनि । भीमे भैरवचण्डि सर्व-
वरदे काले क्षये शूलिनि त्वत्पादप्रणतमनन्यम-
नसं पर्याकुलं पाहि माम् ॥ २३ ॥ यदि भजन्ति



त निहिता शुम्भादयो दुर्मदा केनैते तव पालि-
ता इति हि तत्र प्रश्ने किमाचक्ष्महे । ब्रह्माद्या
अपि शङ्किता स्वविषये यस्याः प्रमादावधि
प्रीता सा महिषासुरप्रमथिनी छिन्द्यादवद्यानि मे
॥ ४ ॥ पातु श्रीस्तु चतुर्भुजा किमु चतुर्बाहो-
र्महौजान्भुजान्धत्तेऽष्टादशधा हि कारणगुणान्का
र्ये गुणारम्भका । सत्य दिक्पतिदन्तिसंख्यभुजभृ
च्छम्भुः स्वयम्भूः स्वयं धामैका प्रतिपत्तये किमथवा
पातु दशाष्टौ दिश ॥ ५ ॥ प्रीत्याष्टादशसम्मितेषु
युगपद्द्वीपेषु दातुं वरान् त्रातुं वा भयतो बिभर्षि
भगवत्यष्टादशैतान् भुजान् । यद्वाष्टादशधा भुजा-
स्तु बिभृत काली सरस्वत्युभे मीलित्वैव मिदानयो
प्रथयितुं सा त्वं रमे रक्ष माम् ॥ ६ ॥ छन्द । अयि
गिरिनन्दिनि नन्दितमेदिनि विश्वविनोदिनि नन्दनुते
गिरिवरविन्ध्यशिरोधिनिवासिनि विष्णुविलासिनि
जिष्णुनुते । भगवति हे शितिकण्ठकुटुम्बिनि भूरि-
कुटुम्बिनि भूरिकृते जय जय हे महिषासुरमर्दि-

दुंमिदुमितामरदुन्दुभिनादमहोमुखरीकृतदिग्मकरे ।
जय० ॥ १२ ॥ अयि निजहुंकृतिमात्रनिराकृत
धूम्रविलोचनधूम्रशते समरविशोषितशोणितबीज-
समुद्भवशोणितबीजलते । शिव शिव शुम्भनिशुम्भम
हाहवतर्पितभूतपिशाचरते । जय जय हे० ॥ १३ ॥
धनुरनुसंगरणक्षणसंगपरिस्फुरदङ्गनटत्कटके कन
कपिशङ्गपृषत्कनिषङ्गरसद्भटशृङ्गहताबटुके । कृतच-
तुरङ्गबलक्षितिरङ्गघटद्बहुरङ्गरटद्बटुके जय जय हे०
॥ १४ ॥ सुरललनाततथेयितथेयितथाभिनयोत्तर
नृत्यरते धिधिकटधिकटधिकटधिमिध्वनिधीरमृ
दङ्गनिनादरते जय जय हे० ॥ १५ ॥ जय जय
जप्यजये जयशब्दपरस्तुतितत्परविश्वनुते झणझ-
णझिञ्झिमिझिङ्कृतनूपुरशिञ्जितमोहितभूतपते । न-
टितनटार्धनटीनटनायकनाटितनाट्यसुगानरते ज
य जय० ॥ १६ ॥ अयि सुमन सुमन सुमन सु
मन सुमनोहरकान्तियुते श्रितरजनीरजनीरजनीर
जनीरजनीकरवक्त्रवृते । सुनयनविभ्रमरभ्रमरभ्रम-



कुञ्जरकुम्भकुचे जय० ॥ २२ ॥ विजितसहस्रकरै-
कसहस्रकरैकसहस्रकरैकनुते। कृतसुरतारकसङ्गरतार-
कसङ्गरतारकसूनुसुते। सुरथसमाधिसमानसमाधि-
समाधिसमाधिसुजातरते जय० ज० ॥ २३ ॥ पद-
कमलं करुणानिलये वरिवस्यति योऽनुदिनं सुशिवे।
अयि कमले कमले कमलानिलये कमलानिलयः
स कथं न भवेत। तव पदमेव परम्पदमेमनुशी-
लयतो मम किं न शिवे जय जय० ॥ २४ ॥
कनकलसत्कलसिन्धुजलैरनुसिञ्चिनुते गुणरङ्गभुवं
भजति स किं न शचीकुचकुम्भतटीपरिरम्भसुखानु-
भवम्। तव चरणं शरणं करवाणि नतामरवाणि-
निवासि शिवं जय जय हे महिषासुरमर्दिनि
रम्यकपर्दिनि शैलसुते ॥ २५ ॥ तव विमलेन्दु-
मिवेन्दुकलं वदनेन्दुमलं ननु कूलयते किमु पुरुहूत
पुरीन्दुमुखी सुमुखीभिरसौ विमुखी क्रियते। मम
तु मतं शिवनामधने भवतीकृपया किमुत क्रियते
जय० ॥ २६ ॥ अयि मयि दीनदयालु मय

कृपयैव तया भवितव्यमुमे अयि जगतो जननी कृपयासियथासि तथा नु मितासि रते । यदुचितमत्र भवत्युररीकुरुतादुरुतापमपाकुरुते जय० ॥ २७ ॥ स्तुतिमितस्तिमित सुसमाधिना नियमतोयमतोऽनुदिन पठेत् । परमया रमयासि निषेव्यते परिजनो रजना पि च त भजेत् ॥ २८ ॥ रमयति किल कर्ष तेषु चित्त नराणाममरजनरयस्माद्राममहृण कनीनाम् । अकृतसुकृतगम्य रम्यपद्यैकहर्म्यं स्तवनमवनहेतु प्रीतये विश्वमातु ॥ २९ ॥ इन्दुरम्यो मुहुर्निन्दुरम्यो मुहुर्निन्दुरम्यो यत मानसत्य म्मृत । श्रीपते सूनुना कारितो योऽधुना विश्वमातु पदे पद्यपुष्पाञ्जलि ॥ ३० ॥

इति श्रीभगवतीपद्यपुष्पाञ्जलिस्तोत्रम् ॥ १०१ ॥

१४ भगवत्यष्टकम् (अमरदास)।

श्रीगणेशाय नम । नमोऽस्तु ते सरस्वति त्रिशूलचक्रधारिणि सिताम्बरावृते शुभे मृगेन्द्रपीठसंस्थिते। सुवर्णबन्धुराधरे सुमौक्तिकोरुहे सुवर्णपद्मभूषिते

नमोऽस्तु ते महेश्वरि ॥ १ ॥ पितामहादिभिर्नुते
स्वकान्तिलुप्तचन्द्रभे सुरत्नमाल्यावृते भवाब्धिकष्ट-
हारिणि । तमालहस्तमण्डिते तमालभालशोभिते
गिरामगोचरे इले नमोस्तु ते महेश्वरि ॥ २ ॥ स्व-
भक्तवत्सलेऽनघे सदाऽपवर्गभोगदे दरिद्रदुःखहा-
रिणि त्रिलोकशङ्करीश्वरि । भवानि भीम अम्बिके
प्रचण्डतेज उज्ज्वले भुजाकलापमण्डिते नमोऽस्तु ते
महेश्वरि ॥ ३ ॥ प्रपन्नभीतिनाशिके प्रसूनमाल्य-
कन्धरे धियस्तमोनिवारिके विशुद्धबुद्धिकारिके ।
सुरार्चिताङ्घ्रिपङ्कजे प्रचण्डविक्रमेऽक्षरे विशालपद्म-
लोचने नमोऽस्तु ते महेश्वरि ॥ ४ ॥ हतस्त्वया
सदैत्यधूम्रलोचनो यदा रणे तदा प्रसूनवृष्टयस्त्रि
विष्टपे सुरैः कृता । निरीक्ष्य तत्र ते प्रभामलज्जत
प्रभाकरस्त्वये दयाकरे ध्रुवे नमोऽस्तु ते महेश्वरि ॥
॥ ५ ॥ ननाद केसरी यदा चचाल मेदिनी तदा
जगाम दैत्यनायकः स्वसेनया द्रुतं भिया । सको
पकम्पदच्छदे प्रचण्डमुण्डघातिके मृगेन्द्रनादनादिते

नमोऽस्तु ते महेश्वरि ॥ ६ ॥ कुचन्दनार्चितालके सितोष्णवारणाधरे सवर्करानने वरे निशुम्भशुम्भमर्दिके । प्रसीद चण्डिके अजे समस्तदोषघातिके शुभामतिप्रदे चले नमोऽस्तु ते महेश्वरि ॥७॥ त्वमेव विश्वधारिणी त्वमेव विश्वकारिणी त्वमेव सर्वहारिणी न गम्यतेऽजितात्मभि । दिवौकसां हिते रता करोषि दैत्यनाशनं शताक्षि रक्तदन्तिके नमोऽस्तु ते महेश्वरि ॥ ८ ॥ पठन्ति ये समाहिता इमं स्तवं सदा नरा अनन्यभक्तिसंयुता अहर्मुखेऽनुवासरम् । भवन्ति ते तु पण्डिता सुपुत्रधान्यसंयुता कलत्रभूतिसंयुता व्रजन्ति चामृतं सुखम् ॥ ९ ॥ इति श्रीमद्रामदासपूज्यपादशिष्यश्रीमद्धंसदासशिष्येणास्वदासाख्यकविना विरचितं भगवत्यष्टकं समाप्तम् ॥ १०३ ॥


१९ मङ्कटानामाष्टकम् ।

श्रीगणेशाय नमः । नारद उवाच । जैगीषव्य मुनिश्रेष्ठ सर्वज्ञ सुखदायक । आख्यातानि सुपुण्यानि

श्रुतानि त्वत्प्रसादत ॥ १ ॥ न तृप्तिमधिगच्छामि तव वागमृतेन च। वदस्वैक महाभाग सङ्कष्टाख्यानमुत्तमम् ॥ २ ॥ इति तस्य वच श्रुत्वा जैगीषव्योऽब्रवीत्तत । सङ्कष्टनाशन स्तोत्र शृणु देवर्षिसत्तम ॥ ३ ॥ द्वापरे तु परावृत्ते भ्रष्टराज्यो युधिष्ठिर । भ्रातृभि सहितो राजा निर्वेद परम गत ॥ ४ ॥ तदानीं तु तत काशीं पुरीं यातो महामुनि । मार्कण्डेय इति ख्यात सहाशिष्यैर्महायशा ॥ ५ ॥ तं दृष्ट्वा स तमुत्थाय प्रणिपत्य सुपूजित । किमर्थं म्लानवदन एतत्त्व मा निवेदय ॥ ६ ॥ युधिष्ठिर उवाच । सङ्कष्ट मे महत्प्राप्तमेतादृग्वदन तत । एतन्निवारणोपाय किंचिद्ब्रूहि मुने मम ॥ ७ ॥ मार्कण्डेय उवाच । आनन्दकानने देवी सङ्कटा नाम विश्रुता । वीरेश्वरोत्तरे भागे पूर्वं चन्द्रेश्वरस्य च ॥ ८ ॥ शृणु नामाष्टक तस्या सर्वसिद्धिकर नृणाम् । सङ्कटा प्रथम नाम द्वितीय विजया तथा ॥ ९ ॥ तृतीय का-



श्रीसूर्यस्तोत्राणि।



१ सूर्यकवचं (ब्रह्मयामले)।

श्रीगणेशाय नमः । श्रीसूर्य उवाच । साम्ब साम्ब महाबाहो शृणु मे कवचं शुभम् । त्रैलोक्यमङ्गलं नाम कवचं परमाद्भुतम् ॥ १ ॥ यज्ज्ञात्वा मन्त्रवित्सम्यक् फलं प्राप्नोति निश्चितम् । यज्ज्ञात्वा च महादेवो गणानामधिपोऽभवत् ॥ २ ॥ पठ-

आदित्यहृदयम् (भविष्योत्तरपु०)।

श्रीगणेशाय नमः । शतानीक उवाच । कथमा दित्यमुद्यन्तमुपतिष्ठेद्द्विजोत्तम । एतन्मे ब्रूहि विप्रेन्द्र प्रपद्ये शरणं तव ॥ १॥ सुमन्तुरुवाच । इदमेव पुरा पृष्टः शङ्खचक्रगदाधरः । प्रणम्य शिरसा देवमर्जुनेन महात्मना ॥ २ ॥ कुरुक्षेत्रे महाराज प्रवृत्ते भारते रणे । कृष्णनाथं समासाद्य प्रार्थयित्वाऽब्रवीदिदम् ॥ ३ ॥ अर्जुन उवाच । ज्ञानं च धर्मशास्त्राणां गुह्याद्गुह्यतरं तथा । मया कृष्ण परिज्ञातं वाङ्मयं सचराचरम् ॥ ४ ॥ सूर्यस्तुतिमयं न्यासं वक्तुमर्हसि माधव । भक्त्या पृच्छामि देवेश कथयस्व प्रसादतः ॥ ५ ॥ सूर्यभक्तिं करिष्यामि कथं सूर्यं प्रपूजयेत् । तदहं श्रोतुमिच्छामि त्वत्प्रसादेन यादव ॥ ६ ॥ श्रीभगवानुवाच । रुद्रादिदैवतैः सर्वैः पृष्टेन कथितं मया । वक्ष्येऽहं सूर्यविन्यासं शृणु पाण्डव यत्नतः ॥ ७ ॥ अस्माकं यत्त्वया पृष्टमे

चितो भवार्जुन। तदहं सम्प्रवक्ष्यामि आदिमध्यावसानकम् ॥ ८ ॥ अर्जुन उवाच । नारायण सुरश्रेष्ठ पृच्छामि त्वां महायशाः । कथमादित्यमुद्यन्तमुपतिष्ठेत्सनातनम् ॥ ९ ॥ श्रीभगवानुवाच। साधु पार्थ महाबाहो बुद्धिमानसि पाण्डव । यन्मां पृच्छस्युपस्थानं तत्पवित्रं विभावसोः ॥ १० ॥ सर्वमङ्गलमङ्गल्यं सर्वपापप्रणाशनम् । सर्वरोगप्रशमनमायुर्वर्धनमुत्तमम् ॥ ११ ॥ अमित्रदमनं पार्थ संग्रामे जयवर्धनम् । वर्धनं धनपुत्राणामादित्यहृदयं शृणु ॥ १२ ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः । त्रिषु लोकेषु विख्यातं निःश्रेयसकरं परम् ॥ १३ ॥ देवदेवं नमस्कृत्य प्रातरुत्थाय चार्जुन । विघ्नान्यनेकरूपाणि नश्यन्ति स्मरणादपि ॥ १४ ॥ तस्मात्सर्वप्रयत्नेन सूर्यमावाहयेत्सदा । आदित्यहृदयं नित्यं जाप्यं तच्छृणु पाण्डव ॥ १५ ॥ यज्जपान्मुच्यते जन्तुर्दारिद्र्याद्दाशु दुस्तरात्। लभते च महासिद्धिं कुष्ठव्याधिविनाशिनीम् ॥ १६ ॥ अस्मि-



शिखायै वषट्। ॐ ह्रैं कवचाय हुम्। ॐ ह्रौं नेत्रत्रयाय वौषट्। ॐ ह्रः अस्त्राय फट्। ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः इति दिग्बन्धः। अथ ध्यानम्। भास्वद्रत्नाढ्यमौलिः स्फुरदधररुचा रञ्जितश्चारुकेशो भास्वान्यो दिव्यतेजाः करकमलयुतः स्वर्णवर्णप्रभाभिः। विश्वाकाशावकाशग्रहपतिशिखरे भाति यश्चोदयाद्रौ सर्वानन्दप्रदाता हरिहरनमितः पातु मां विश्वचक्षुः ॥ १ ॥ पूर्वमष्टदलं पद्मं प्रणवादिप्रतिष्ठितम्। मायाबीजं दलाष्टाग्रे यन्त्रमुद्धारयेदिति ॥ २ ॥ आदित्यं भास्करं भानुं रविं सूर्यं दिवाकरम्। मार्तण्डं तपनं चेति दलेष्वष्टसु योजयेत् ॥ ३ ॥ दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला तथा। अमोघा विद्युता चेति मध्ये श्रीः सर्वतोमुखी ॥ ४ ॥ सर्वज्ञः सर्वगश्चैव सर्वकारणदेवता। सर्वेशं सर्वहृदयं नमामि सर्वसाक्षिणम् ॥ ५ ॥ सर्वात्मा सर्वकर्ता च सृष्टिजीवनपालकः। हितः स्वर्गापवर्गश्च भास्करेश नमोऽस्तु ते ॥ ६ ॥ इति

पि दुर्लभ । इम भक्त्या न्यसेत्पार्थ स याति परमा गतिम् ॥ १५ ॥ कामक्रोधकृतात्पापान्मुच्यते नात्र संशय । सर्पादपि भय नैव संग्रामेषु पथिष्वपि ॥ १६ ॥ रिपुसंघट्टकालेषु तथा चोर समागमे । त्रिसन्ध्य जपतो न्यास महापातकनाशनम् ॥ १७ ॥ विस्फोटकसमुत्पन्न तीव्रज्वरसमुद्भवम् । शिरोरोग नेत्ररोग सर्वव्याधिविनाशनम् ॥ १८ ॥ कुष्ठव्याधिस्तथा दद्रुरोगाश्च विविधाश्च ये । जपमानस्य नश्यन्ति शृणु भक्त्या तदर्जुन ॥ १९ ॥ आदित्यो मन्त्रसयुक्त आदित्यो भुवनेश्वर । आदित्यान्नापरो देवो ह्यादित्य परमेश्वर ॥ २० ॥ आदित्यमर्चयेद्ब्रह्मा शिव आदित्यमर्चयेत । यदादित्यगत तेजो मम तेजस्तदर्जुन ॥ २१ ॥ आदित्य मन्त्रसयुक्तमादित्य भुवनेश्वरम्। आदित्य ये प्रपश्यन्ति मा पश्यन्ति न संशय ॥२२॥ त्रिसन्ध्यमर्चयेत्सूर्यं स्मरेद्भक्त्या तु यो नर । न स पश्यति दारिद्र्य जन्मजन्मनि चार्जुन ॥ २३

न्भरो मित्र सुवर्ण सुप्रतापवान् ॥ ३२ ॥ आतपी
मण्डली भास्वास्तपन सर्वतापन । कृतविश्वो म-
हातेजा सर्वरत्नमयोद्भव ॥ ३३ ॥ अक्षरश्च क्षर-
श्चैव प्रभाकरविभाकरौ । चन्द्रश्चन्द्राङ्गद सौम्यो ह-
व्यकव्यप्रदायक ॥ ३४ ॥ अङ्गारको गदोऽगस्ती
रक्ताङ्गश्चाङ्गवर्धन । बुधो बुद्धासनो बुद्धिर्बुद्धात्मा
बुद्धिवर्धन ॥ ३५ ॥ बृहद्भानुर्बृहद्भासो बृहद्धामा
बृहस्पति । शुक्रस्त्व शुक्ररेतास्त्व शुक्राङ्ग शुक्रभू-
षण ॥ ३६ ॥ शनिमान् शनिरूपस्त्व शनैर्गच्छ-
सि सर्वदा । अनादिरादिरादित्यस्तेजोराशिर्महात-
पा ॥ ३७ ॥ अनादिरादिरूपस्त्वमादित्यो दि-
ग्पतिर्यम । भानुमान् भानुरूपस्त्व स्वर्भानुर्भा-
नुदीप्तिमान् ॥ ३८ ॥ धूमकेतुर्महाकेतु सर्वकेतु-
रनुत्तम । तिमिरावरण शम्भु स्रष्टा मार्तण्ड एव
च ॥ ३९ ॥ नम पूर्वाय गिरये पश्चिमाय नमो
नम । नमोत्तराय गिरये दक्षिणाय नमो नम
॥ ४० ॥ नमो नम सहस्रांशो ह्यादित्याय नमो

नम । [illegible]

|| [illegible]

[illegible]

नम || [illegible]

[illegible]

जनलक्षाणि सहस्रद्विशतानि च । यावद्वटीप्रमा
णेन क्रममाण नमोऽस्तु ते ॥ ५० ॥ अग्रतश्च नम-
स्तुभ्य पृष्ठतश्च सदा नम । पार्श्वतश्च नमस्तुभ्य
नमस्ते चास्तु सर्वदा ॥ ५१ ॥ नम सुरारिहन्त्रे
च सोमसूर्याग्निचक्षुषे । नमो दिव्याय व्योमाय
सर्वतन्त्रमयाय च ॥ ५२ ॥ नमो वेदान्तवेद्याय स
र्वकर्मादिसाक्षिणे । नमो हरितवर्णाय सुवर्णाय नमो
नम ॥ ५३ ॥ अरुणो माघमासे तु सूर्यो वै फाल्गुने
तथा । चैत्रमासे तु वेदाङ्गो भानुर्वैशाखतापन ॥
॥ ५४ ॥ ज्येष्ठमासे तपेदिन्द्र आषाढे तपते रवि ।
गभस्ति श्रावणे मासि यमो भाद्रपदे तथा
॥ ५५ ॥ इषे सुवर्णरेताश्च कार्तिके च दिवाकर ॥
मार्गशीर्षे तपेन्मित्र पौषे विष्णु सनातन ॥
॥ ५६ ॥ पुरुषस्त्वधिके मासे मासाधिक्ये तु
कल्पयेत् । इत्येते द्वादशादित्या काश्यपेया प्र
कीर्तिता ॥ ५७ ॥ उग्ररूपा महात्मानस्तपन्ते वि
श्वरूपिण । धर्मार्थकाममोक्षाणा प्रस्फुटा हेतवो

॥ ६७ ॥ दारिद्यव्यसनध्वंसी श्रीमान्देवो दिवाकर । विकर्तनो विवस्वांश्च मार्तण्डो भास्करो रविः ॥ ६८ ॥ लोकप्रकाशक श्रीमॉल्लोकचक्षुर्ग्रहेश्वर । लोकसाक्षी त्रिलोकेश कर्ता हर्ता तमिस्त्रहा ॥ ६९ ॥ तपनस्तापनश्चैव शुचि सप्ताश्ववाहन । गभस्तिहस्तो ब्रह्मण्य सर्वदेवनमस्कृत ॥ ७० ॥ आयुरारोग्यमैश्वर्यं नरा नार्यश्च मन्दिरे । यस्य प्रसादात्सतुष्टिरादित्यहृदय जपेत ॥ ७१ ॥ इत्येतैर्नामभि पार्थ आदित्य स्तौति नित्यश । प्रातरुत्थाय कौन्तेय तस्य रोगभय न हि ॥ ७२ ॥ पातकान्मुच्यते पार्थ व्याधिभ्यश्च न सशय । एकसन्ध्य द्विसन्ध्य वा सर्वपापै प्रमुच्यते॥७३॥त्रिसन्ध्यं जपमानस्तु पश्येच्च परम पदम् । यदह्ना कुरुते पाप तदह्ना प्रतिमुच्यते ॥ ७४ ॥ यद्रात्र्या कुरुते पाप तद्रात्र्या प्रतिमुच्यते । दद्रुस्फोटककुष्ठानि मण्डलानि विषूचिका ॥ ७५ ॥ सर्वव्याधिमहारोगभूत बाधास्तथैव च । डाकिनी शाकिनी चैव महारोग-

ईशान्यां मित्रमेव च। मध्ये तु भास्करं विद्यात्क्रमेणैव समर्चयेत् ॥ २ ॥ अतः परतरं नास्ति सिद्धिकामस्य पाण्डव। महातेजससमुद्यन्तं प्रणमेत्स कृताञ्जलिः ॥३॥ सकेसराणि पद्मानि करवीराणि चार्जुन। तिलतण्डुलयुक्तानि कुशगन्धोदकानि च॥४॥ रक्तचन्दनमिश्राणि कृत्वा वै ताम्रभाजने। धृत्वा शिरसि तत्पात्रं जानुभ्यां धरणीं स्पृशेत् ॥ ५ ॥ मन्त्रपूतं गुडाकेशस्यार्घ्यं दद्याद्भस्तये। सायुधं सरथं चैव सूर्यमावाहयाम्यहम्॥६॥ स्वागतो भव। सुप्रतिष्ठितो भव। सन्निधो भव। सन्निहितो भव। सम्मुखो भव। इति पञ्चमुद्रा। स्फुटयित्वाऽर्हयेत्सूर्यं भुक्तिमुक्तिं लभेन्नरः ॥ ७॥ ॐ श्रीं सिद्धाकिलिकिलिस्टकष्ट सर्वार्थसाधनाय स्वाहा। ॐ श्रीं ह्रीं ह्रूं हंस सूर्याय नमः स्वाहा। ॐ श्रीं ह्रां ह्रीं ह्रूं ह्रः सूर्यमूर्तये स्वाहा। ॐ श्रीं ह्रीं खः खः लोकाय सर्वमूर्तये स्वाहा। ॐ ह्रूं मार्तण्डाय स्वाहा। नमोऽस्तु सूर्याय सहस्रभानवे नमोऽस्तु वैश्वानर जातवेदसे।

नमो नम । ॐ अक्षय्यतेजसे नम । ॐ सूर्याय नम ।
ॐ विश्वमूर्तये नम । आदित्य च शिव विद्याच्छिव-
मादित्यरूपिणम् । उभयोरन्तरं नास्ति आदित्यस्य
शिवस्य च ॥ १६ ॥ एतदिच्छाम्यहं श्रोतु पुरुषो
वै दिवाकर । उदये ब्रह्मणो रूपं मध्याह्ने तु महेश्वरः
॥ १७ ॥ अस्तमाने स्वय विष्णुस्त्रिमूर्तिश्च दिवा
कर । नमो भगवते तुभ्य विष्णवे प्रभविष्णवे ॥ १८ ॥
ममेदमर्घ्यं प्रतिगृह्ण देव देवाधिदेवाय नमो नम-
स्ते । श्रीसूर्याय साङ्गाय सपरिवाराय श्रीसूर्यना-
रायणायेदमर्घ्यम् ॥ १९ ॥ हिमघ्नाय तमोघ्नाय रक्षो-
घ्नाय च ते नम । कृतघ्नघ्नाय सत्याय तस्मै सूर्या-
त्मने नम ॥ २० ॥ जयो जयश्च विजयो जितप्राणो
जितश्रम । मनोजवो जितक्रोधो वाजिन सप्त
कीर्तिता ॥ २१ ॥ हरितहयरथ दिवाकर कनक
मयाम्बुजरेणुपिञ्जरम् । प्रतिदिनमुदये नव नवं श-
रणमुपैमि हिरण्यरेतसम् ॥ २२ ॥ न तं व्याला
प्रबाधन्ते न व्याधिभ्यो भय भवेत् । न

लोके ऋषीणां च जायते मानुषोऽपि वा । जाति-
स्मरत्वमाप्नोति शुद्धात्मा नात्र संशयः ॥ ३२ ॥
अजाय लोकत्रयपावनाय भूतात्मने गोपतये वृ-
षाय । सूर्याय सर्वप्रलयान्तकाय नमो महाकारु-
णिकोत्तमाय ॥ ३३ ॥ विवस्वते ज्ञानभृदन्तरात्म
ने जगत्प्रदीपाय जगद्धितैषिणे । स्वयंभुवे दीप्तस-
हस्रचक्षुषे सुरोत्तमायामिततेजसे नमः ॥ ३४ ॥
सुरेरनेकैः परिसेविताय हिरण्यगर्भाय हिरण्मयाय ।
महात्मने मोक्षपदाय नित्यं नमोऽस्तु ते वासरका
रणाय ॥ ३५ ॥ आदित्यश्चार्चितो देव आदित्यः
परमं पदम् । आदित्यो मातृको भूत्वा आदित्यो
वाङ्मयं जगत् ॥ ३६ ॥ आदित्यं पश्यते भक्त्या
मां पश्यति ध्रुवं नरः । नादित्यं पश्यते भक्त्या
न मां पश्यति मां नरः ॥ ३७ ॥ त्रिगुणं च त्रितत्त्वं
च त्रयो देवास्त्रयोऽग्नयः । त्रयाणां च त्रिमूर्तिस्त्वं
तुरीयस्त्वं नमोऽस्तु ते ॥ ३८ ॥ नमः सवित्रे जग-
देकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे । त्रयीम-

सामसु सप्रगीतम् । प्रकाशितं येन च भूर्भुवः स्वः पुनातु मां तत्सवि० ॥ ४६ ॥ यन्मण्डलं वेदविदो वदन्ति गायन्ति यच्चारणसिद्धसङ्घाः । यद्योगिनो योगजुषां च सङ्घाः पुनातु मां त० ॥ ४७ ॥ यन्मण्डलं सर्वजनेषु पूजितं ज्योतिश्च कुर्यादिह मर्त्यलोके । यत्कालकालादिमनादिरूपं पुनातु मां त० ॥ ४८ ॥ यन्मण्डलं विष्णुचतुर्मुखाख्यं यदक्षरं पापहरं जनानाम् । यत्कालकल्पक्षयकारणं च पुनातु मां त० ॥ ४९ ॥ यन्मण्डलं विश्वसृजां प्रसिद्धमुत्पत्तिरक्षाप्रलयप्रगल्भम् । यस्मिञ्जगत्संहरतेऽखिलं च पुनातु मां त० ॥ ५० ॥ यन्मण्डलं सर्वगत विष्णोरात्मा परं धाम विशुद्धतत्त्वम् । सूक्ष्मान् योगपथानुगम्यं पुनातु मां तत्स० ॥ ५१ ॥ यन्मण्डलं ब्रह्मविदो वदन्ति गायन्ति यच्चारणसिद्धसङ्घाः यन्मण्डलं वेदविदः स्मरन्ति पुनातु मां त० ॥ ५ यन्मण्डलं वेदविदोपगीतं यद्योगिनां योगपथानु म्यम् । तत्सर्ववेदं प्रणमामि सूर्यं पुनातु मां

त्मोक्त दशम द्वादशात्मक । एकादशं त्रयीमूर्तिद्वा-
दश सूर्य एव च ॥ ६२ ॥ द्वादशादित्यनामानि प्रा-
त काले पठेन्नर । दु स्वप्ननाशन चैव सर्वदु ख च
नश्यति ॥६३॥ दद्रुकुष्ठहर चैव दारिद्र्य हरते ध्रुवम् ।
सर्वतीर्थप्रद चैव सर्वकामप्रवर्धनम् ॥ ६४ ॥ य प
ठेत्प्रातरुत्थाय भक्त्या नित्यमिदं नर । सौख्यमायु
स्तथाऽऽरोग्यं लभते मोक्षमेव च ॥ ६५ ॥ अग्नि
मीळे नमस्तुभ्यमिषेत्वोर्जे स्वरूपिणे । अग्नआया-
हि वीतस्त्व नमस्ते ज्योतिषा पते ॥ ६६ ॥ शन्नो
देवीर्नमस्तुभ्य जगच्चक्षुर्नमोऽस्तु ते । पञ्चमायो
पवेदाय नमस्तुभ्य नमो नम ॥ ६७ ॥ पद्मासन
पद्मकर पद्मगर्भसमद्युति । सप्ताश्वरथसयुक्तो द्वि
भुज स्यात्सदा रवि ॥ ६८ ॥ आदित्यस्य नम-
स्कार ये कुर्वन्ति दिने दिने । जन्मान्तरसहस्रेषु
दारिद्र्य नोपजायते ॥ ६९ ॥ उदयगिरिमुपेत
भास्कर पद्महस्त निखिलभुवननेत्र रत्नरत्नोपमेयम् ।
तिमिरकरिमृगेन्द्र बोधक पद्मिनीना सुरवरमभिवन्दे-

सुन्दर विश्ववन्द्यम् ॥ १७० ॥ इति
राणे श्रीकृष्णार्जुनसवादे आदित्यहृदयस्तोत्र स
र्णम् ॥ १०६ ॥

३ सूर्याष्टकं (शकरकृतम्) ।

श्रीगणेशाय नम । साम्ब उवाच । आदिदेव नम-
स्तुभ्य प्रसीद मम भास्कर । दिवाकर नमस्तुभ्य
प्रभाकर नमोऽस्तु ते ॥ १ ॥ सप्ताश्वरथमारूढ प्रच
ण्ड कश्यपात्मजम् । श्वेतपद्मधर देव त सूर्य प्रण
माम्यहम् ॥ २ ॥ लोहित रथमारूढ सर्वलोक
पितामहम् । महापापहर देव त सूर्य
॥ ३ ॥ त्रैगुण्य च महाशूर ब्रह्मविष्णुमहेश्वरम्
महापापहर देव त सूर्य प्रणमाम्यहम् ॥ ४
बृंहित तेज पुञ्ज च वायुराकाशमेव च । प्रभुस्त्व
सर्वलोकाना त सूर्य प्रणमाम्यहम् ॥ ५ ॥
बन्धूकपुष्पसकाश हारकुण्डलभूषितम् । एकचक्रधर देव त
सूर्य प्रणमाम्यहम् ॥ ६ ॥ त सूर्य जगत्कर्तार महाते

[cut]ा प्रदीपनम् । महापापहरं देवं तं सूर्यं प्रणमाम्यहम्
॥ ७ ॥ तं सूर्यं जगतां नाथं ज्ञानविज्ञानमोक्षदम् ।
[cut]हापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥ ८ ॥ सूर्या-
[cut]कं पठेन्नित्यं ग्रहपीडाप्रणाशनम् । अपुत्रो लभते
[cut]त्रं दरिद्रो धनवान्भवेत् ॥ ९ ॥ आमिषं मधुपानं
[cut] यः करोति रवेर्दिने । सप्तजन्म भवेद्रोगी जन्म-
[cut]न्म दरिद्रता ॥ १० ॥ स्त्रीतैलमधुमांसानि यस्त्य-
[cut]षु रवेर्दिने । न व्याधी शोकदारिद्र्यं सूर्यलोकं
[cut] गच्छति ॥ ११ ॥ इति श्रीशिवप्रोक्तं सूर्याष्टकं
[cut]माप्तम् ॥ १० ॥

४ सूर्यस्तोत्रं (याज्ञवल्क्य)।


[cut]श्रीगणेशाय नमः । शुकतुण्डच्छवि सवितुश्चण्डरु-
[cut] पुण्डरीकवनबन्धो । मण्डलमुदितं वन्दे कुण्डल-
[cut]ाखण्डलाशाया ॥ १ ॥ यस्योदयास्तसमये सुर
[cut]कुट्यनिघृष्टचरणकमलोऽपि । कुरुतेऽञ्जलिं त्रिनेत्र

वापि न स लक्ष्म्या वियुज्यते ॥ १० ॥ आर्याः सप्त सदा यस्तु सप्तम्यां सप्तधा जपेत् । तस्य गेहं च देहं च पद्मा सत्यं न मुञ्चति ॥ ११ ॥ निधिरेष दरिद्राणां रोगिणां परमौषधम् । सिद्धिः सकलकार्याणां गाथेयं संस्मृता रवेः ॥ १२ ॥ इति श्रीयाज्ञवल्क्यप्रणीतमार्यास्तोत्रं संपूर्णम् ॥ १०८ ॥

९ सूर्यकवचम् (याज्ञवल्क्य) ।

श्रीगणेशाय नमः । शृणुष्व मुनिशार्दूल सूर्यस्य कवचं शुभम् । शरीरारोग्यदं दिव्यं सर्वसौभाग्यदायकम् ॥ १ ॥ देदीप्यमानमुकुटं स्फुरन्मकरकुण्डलम् । ध्यात्वा सहस्रकिरणं स्तोत्रमेतदुदीरयेत् ॥ २ ॥ शिरो मे भास्करः पातु ललाटं मेऽमितद्युतिः । नेत्रे दिनमणिः पातु श्रवणे वासरेश्वरः ॥३ ॥ घ्राणं घर्मघृणिः पातु वदनं वेदवाहनः । जिह्वां मे मानदः पातु कण्ठं मे सुरवन्दितः ॥ ४ ॥ स्कन्धौ प्रभाकरः पातु वक्षः पातु जनप्रियः । पातु पादौ

द्वादशात्मा सर्वाङ्ग सकलेश्वर ॥ ५ ॥ सूर्यस
स्मक स्तोत्र लिखित्वा भूर्जपत्रके । दधाति
करे तस्य वशगा सर्वसिद्धय ॥ ६ ॥ सुस्ना
यो जपेत्सम्यग्योऽधीते स्वस्थमानस । स रोग
मुक्तो दीर्घायु सुख पुष्टिं च विन्दति ॥ ७ ॥ आ
दित्यस्य नमस्कारं ये कुर्वन्ति दिने दिने । जन्मा
न्तरसहस्रेषु दारिद्र्य नोपजायते ॥ ८ ॥ इति श्री
याज्ञवल्क्यप्रणीत सूर्यकवचस्तोत्र सपूर्णम् ॥१०१॥



श्रीगङ्गादिनदीस्तोत्राणि ।



१ गङ्गाष्टकम् (शंकराचार्य) ।

ीगणेशाय नम । भगवति तव तीरे नीरमा-
ाशनोऽह विगतविषयतृष्ण कृष्णमाराधयामि ।
कलकलुपभङ्गे स्वर्गसोपानसङ्गे तरलतरतङ्गे देवि
ङ्गे प्रसीद ॥ १ ॥ भगवति भवलीलामौलिमाले
वाम्भ कणमणुपरिमाण प्राणिनो ये स्पृशन्ति । अ
रनगरनारीचामरग्राहिणीना विगतकलिकलङ्का
ङ्कमङ्के लुठन्ति ॥२॥ ब्रह्माण्ड खण्डयन्ती हरशिरसि

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

ज्ज्वलम् । गन्धर्वामरसिद्धकिन्नरवधूतुङ्गस्तनास्फालित स्नानाय प्रतिवासर भवतु मे गाङ्ग जल निर्मलम् ॥ ६ ॥ गाङ्ग वारि मनोहारि मुरारिचरणच्युतम् । त्रिपुरारिशिरश्चारि पापहारि पुनातु माम् ॥ ७ ॥ पापापहारि दुरितारि तरङ्गधारि शैलप्रचारि गिरिराजगुहाविदारि । झङ्कारकारि हरिपादरजोपहारि गाङ्ग पुनातु सतत शुभकारि वारि ॥ ८ ॥ गङ्गाष्टक पठति य प्रयत प्रभाते वाल्मीकिना विरचित शुभद मनुष्य । प्रक्षाल्य गात्रकलिकल्मषपङ्कमाशु मोक्ष लभेत्पतति नैव पुनर्भवाब्धौ ॥ ९ ॥ इति श्रीवाल्मीकिना विरचित गङ्गाष्टक स्तोत्र सपूर्णम् ॥ १११ ॥

३ गङ्गाष्टकम् (कालिदास) ।

श्रीगणेशाय नम । वत्यक्षीणि करोटय कति कति द्वीपिद्विपाना त्वच काकोला कति पन्नगा कति सुधाधाम्नश्च खण्डा कति । किं च त्व च कति

णिका विमुक्तिगणिकामङ्गाय सभाज्यते ॥ ५ ॥
विष्णो सङ्गतिकारिणी हरजटाजूटाटवीचारिणी
प्रायश्चित्तनिवारिणी निजजले मज्जज्जनोत्तारिणी
श्रेयःस्वर्गविहारिणी विजयते गङ्गा मनोहारि
णी ॥ ६ ॥ वाचाल विकल खल श्रितमल का-
माकुल व्याकुल चाण्डाल तरल निपीतगरल दो
षाविल चाखिलम् । कुम्भीपाकगत यमन्तककरादा
कृष्य कस्तारयेन्मातर्जन्हुनरेन्द्रनन्दिनि तव स्वल्पो-
दबिन्दु विना ॥ ७ ॥ श्लेष्मश्लेषणया नलेऽमृत-
निले कण्ठाकुले व्याकुले कण्ठे घर्घरघोषनादम-
लिने काये च ममीलति । या ध्यायन्नपि भार-
भङ्गुरतरा प्राप्नोति मुक्तिं नर स्नातुश्चेतसि जा-
ह्नवी निवमता ममाग्सन्तापहृत ॥ ८ ॥ इति श्री-
मत्कालिदासविरचित गङ्गाष्टकस्तोत्र सम्पूर्णम् ११२॥

४ गङ्गाष्टकम् (कालिदास)।

श्रीगणेशाय नमः । नमस्तेऽस्तु गङ्गे त्वदङ्ग—

जगत्पावने त्वत्प्रसादात्पदे पौरुहूतेऽपि धत्तेऽवहेलाम् ॥ ७ ॥ त्रिसंध्यानमल्लेखकोटीरनानाविधानेकरत्नांशुबिम्बप्रभाभि । स्फुरत्पादपीठे हठेनाष्टमूर्तेर्जटाजूटवासे नता स्म पद ते ॥ ८ ॥ इद य पठेदष्टकं जह्नुपुत्र्यास्त्रिकाल कृत कालिदासेन रम्यम् । समायास्यतीन्द्रादिभिर्गीयमान पदं कैशव शैशव नो लभेत्स ॥ ९ ॥ इति श्रीकालिदासकृत गङ्गाष्टकस्तोत्र सपूर्णम् ॥ ११३ ॥

९ गङ्गास्तव (कल्किपुराणम्)।

श्रीगणेशाय नम । सूत उवाच । शृणुध्व मुनय सर्वे गङ्गास्तवनमुत्तमम् । शोकमोहहर पुसामृषिभि परिकीर्तितम् ॥ १ ॥ ऋषय ऊचु । इय सुरतरङ्गिणी भवनवारिधेस्तारिणी स्तुता हरिपदाम्बुजादुपगता जगत्ससद । सुमेरुशिखरामरप्रियजलामलक्षालिनी प्रसन्नवदना शुभा भवभयस्य विद्राविणी ॥ २ ॥ भगीरथरथानुगा सुरकरीन्द्रदर्पा-

॥ ७ ॥ स एव कुशली जनः प्रणमतीह भागीरथीं स एव तपसा निधिर्जपति जाह्नवीमादरात् । स एव पुरुषोत्तमः स्मरति सा(?)सुमन्दाकिनीं स एव विजयी प्रभुः सुरतरङ्गिणीं सेवते ॥ ८ ॥ तवामलजलाचितं खगसृगालमीनक्षतं चलल्लहरिलोलितं रुचिरतीरजम्बालिनम् । कदा निजवपुर्मुदा सुरनरोरगैः संस्तुतोऽप्यहं त्रिपथगामिनि प्रियमतीव पश्याम्यहो ॥ ९ ॥ त्वत्तीरे वसतिं तवामलजलस्नानं तव प्रेक्षणं त्वन्नामस्मरणं तवोदयकथासलापनं पावनम् । गङ्गे मे तव सेवनैकनिपुणोऽप्यानन्दितश्चादृतः स्तुत्वा त्वद्गतपातको भुवि कदा शान्तश्चरिष्याम्यहम् ॥ १० ॥ इत्येतदृषिभिः प्रोक्तं गङ्गास्तवनमुत्तमम् । स्वर्ग्यं यशस्यमायुष्यं पठनाच्छ्रवणादपि ॥ ११ ॥ सर्वपापहरं पुंसां बलमायुर्विवर्धनम् । प्रातर्मध्याह्नसायाह्ने गङ्गासांनिध्यता भवेत् ॥ १२ ॥ इत्येतद्भार्गवाख्यानं शुकदेवान्मया श्रुतम् । पठितं श्रावितं चात्र पुण्यं

सकामा ॥ ३ ॥ मधुमधुवनपूगे रत्नपूगैर्नृपूगैर्म-
धुमधुवनपूगैर्देवपूरे सपूगे । पुरहरपरमाङ्गे भासि
मायेव गङ्गे शमयसि विषतापं देवदेवस्य वन्द्यम् ॥
॥ ४ ॥ चलितशशिकुलाभैरुत्तरङ्गैस्तरङ्गैरमितन-
दनदीनामङ्गसङ्गैरसङ्गे । विहरसि जगदण्डे खण्ड-
यन्ती गिरीन्द्रान् रमयसि निजकान्तं सागरं कान्त-
कान्ते ॥ ५ ॥ तव परमहिमानं चित्तवाचाममानं
हरिहरविधिशक्रा नापि गङ्गे विदन्ति । श्रुतिकुलम-
भिधत्ते शङ्कितं तं गुणान्तं गुणगणसुविलापैर्नेति ने-
तीति सत्यम् ॥ ६ ॥ तव नुतिनतिनामान्यप्यघं
पावयन्ति ददति परमशान्तिं दिव्यभोगान् जनानाम्।
इति पतितशरण्ये त्वां प्रपन्नोऽस्मि मातर्ललिततरतरङ्गे
चाङ्ग गङ्गे प्रसीद ॥ ७ ॥ शुभतरकृतयोगाद्विश्व-
नाथप्रसादाद्भवहरवरविद्यां प्राप्य काश्यां हि गङ्गे ।
भगवति तव तीरे नीरसारं निपीय मुदितहृदयकञ्जे
नन्दसूनुं भजेऽहम् ॥ ८ ॥ गङ्गाष्टकमिदं कृत्वा
भुक्तिमुक्तिप्रदं नृणाम् । सत्यज्ञानानन्दतीर्थयतिना

सर्वदा। पुनर्भवाब्धिजन्मज भवाब्धिदुःखवर्मदे त्व
दीयपादपङ्कज० ॥४॥ अलक्षलक्षकिन्नरामरासुरादि-
पूजितं सुलक्षनीरतीरधीरपक्षिलक्षकूजितम्। वसि-
ष्ठशिष्टपिप्पलादिकर्दमादिशर्मदे त्वदीयपादपङ्क०
॥ ५ ॥ सनत्कुमारनाचिकेतकश्यपादिषट्पदैर्धृत
स्वकीयमानसेषु नारदादिषट्पदे। रवीन्दुरन्तिदेव-
देवराजकर्मशर्मदे त्वदीय० ॥ ६ ॥ अलक्षलक्षल
क्षपापलक्षसारसायुधं ततस्तु जीवजन्तुतन्तुभुक्ति-
मुक्तिदायकम्। विरिञ्चिविष्णुशङ्करस्वकीयधामवर्मदे
त्वदीयपाद० ॥ ७ ॥ अहो मृतं स्वनं श्रुतं महे
शकेशजातटे किरातसूतवाडवेषु पण्डिते शठे नटे।
दुरन्तपापतापहारि सर्वजन्तुशर्मदे त्वदीयपाद० ॥८॥
इदं तु नर्मदाष्टकं त्रिकालमेव ये सदा पठन्ति ते
निरन्तरं न यान्ति दुर्गतिं कदा। सुलभ्यदेहदुर्लभं
महेशधामगौरवं पुनर्भवा नरा न वै विलोकयन्ति
रौरवम् ॥ ९ ॥ इति श्रीमच्छंकराचार्यविरचितं
नर्मदाष्टकस्तोत्रं संपूर्णम् ॥ ११६ ॥



माङ्गताङ्गताशभागिनी। स्वदत्तसुप्तसप्तसिन्धुभेदिना
न्तिकोविदा धुनोतु० ॥ ६ ॥ जलच्युताच्युताङ्ग-
रागलम्पटालिशालिनी विलोलराधिकाकचान्तचम्प-
कालिमालिनी। सदावगाहनावतीर्णभर्तृभृत्यनारदा
धुनो०॥७॥ सदैव नन्दिनन्दकेलिशालिकुञ्जमञ्जुला
तटोत्थफुल्लमल्लिकाकदम्बरेणुसूज्ज्वला। जलावगा
हिना नृणा भवाब्धिसिन्धुपारदा धुनो० ॥ ८ ॥
इति श्रीमच्छङ्कराचार्यविरचित यमुनाष्टक स
पूर्णम् ॥ ११७ ॥

९ यमुनाष्टकम् (शंकराचार्य)।

श्रीगणेशाय नम । कृपापारावारा तपनतनया
तापशमनी मुरारिप्रेयस्या भवभयदवा भक्तिवरदाम्।
वियज्ज्वालान्मुक्ता श्रियमपि सुखाप्ते परिदिन सदा
धीरो नून भजति यमुना नित्यफलदाम् ॥ १ ॥
मधुवनचारिणि भास्करवाहिनि जाह्नविसङ्गिनि
सिन्धुसुते मधुरिपुभूषिणि माधवतोषिणि गोकुलभी

जय यमुने जय भीति० ॥ ६ ॥ करिवरमौक्तिक-नासिकभूषणवातचमत्कृतचञ्चलके मुखकमलामलसौरभचञ्चलमत्तमधुव्रतलोचनिके । मणिगणकुण्डललोलपरिस्फुरदाकुलगण्डयुगामलके जय यमुने जय भीतिनिवा० ॥ ७ ॥ कलरवनूपुरहेममयाचितपादसरोरुहसारुणिके धिमिधिमिधिमिधिमिधिमितालविनोदितमानसमञ्जुलपादगते । तव पदपङ्कजमाश्रितमानवचित्तसदाखिलतापहरे जय यमुने० ॥८॥ भवोत्तापाम्भोधौ निपतितजनो दुर्गतियुतो यदि स्तौति प्रातः प्रतिदिनमनन्याश्रयतया । हयाह्रेषैः कामं करकुसुमपुञ्जैरविरतां सदा भोक्ता भोगान्मरणसमये याति हरिताम् ॥ ९ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचितं यमुनाष्टकं संपूर्णम् ॥ ११८ ॥

१० सरस्वत्यष्टकम् (पद्मपुराणे)।

श्रीगणेशाय नमः । शतानीक उवाच । महामते

सायुज्यमुक्तिप्रदो वाद तो कुल परस्परशुभौ
जन्तो प्रयाणोत्सवे। मद्रूपो मनुजोऽयमस्तु हरिणा
प्रोक्त शिवस्तत्क्षणात्तन्मध्यात्कृगुलाञ्छनो गरुडग
पीताम्बरो निर्गत ॥ १ ॥ इन्द्राद्यास्त्रिदश पतन्ति
नियत भोगक्षये ते पुनर्जायन्ते मनुजास्ततोऽपि प-
शव कीटा पतङ्गादय । ये मातर्मणिकर्णिके
तव जले मज्जन्ति निष्कल्मषा सायुज्येऽपि किरी
टकौस्तुभधरा नारायणा स्युर्नरा ॥ २ ॥ काशी
धन्यतमा विमुक्तिनगरी सालङ्कृता गङ्गया तत्रेयं
मणिकर्णिका सुखकरी मुक्तिर्हि तत्किङ्करी। स्व-
र्लोकस्तुलित सहैव विबुधै काश्या समं ब्रह्मणा
काशी क्षोणितले स्थिता गुरुतरा स्वर्गो लघु खे
गत ॥ ३ ॥ गङ्गातीरमनुत्तमं हि सकल तत्रापि
काश्युत्तमा तस्या सा मणिकर्णिकोत्तमतमा यत्रे-
श्वरो मुक्तिद । देवानामपि दुर्लभ स्थलमिदं पापौ
घनाशक्षम पूर्वोपार्जितपुण्यपुञ्जगमक पुण्यैर्जनै
प्राप्यते ॥ ४ ॥ दु खाम्भोनिधिममज्जनिवहास्ते-

मणिकर्णिकास्नपनजे पुण्ये प्रविष्ट भवेत । स्नात्वा स्तोत्रमिदं नर पठति चेत्ससारपाथोनिधिं तीर्त्वा पल्वलवत्प्रयाति सदन तेजोमय ब्रह्मण ॥ ९ ॥

इति श्रीमच्छंकराचार्यविरचित मणिकर्णिकाष्टकस्तोत्र सपूर्णम् ॥ १२१ ॥

१३ प्रयागाष्टकम् (मत्स्यपु०)।

श्रीगणेशाय नम । मुनय ऊचु । सुरमुनिदितिजेन्द्रै सेव्यते योऽस्ततन्द्रैर्गुरुतरदुरिताना का कथा मानवानाम् । स भुवि सुकृतकर्तुर्वाञ्छिताबाप्तिहेतुर्जयति विजितयागस्तीर्थराज प्रयाग ॥ १ ॥ श्रुति प्रमाण स्मृतय प्रमाण पुराणमप्यत्र पर प्रमाणम् । यत्रास्ति गङ्गा यमुना प्रमाण स तीर्थराजो जयति प्रयाग ॥ २ ॥ न यत्र योगाचरणप्रतीक्षा न यत्र यज्ञेष्टिविशिष्टदीक्षा । न तारकज्ञानगुरोरपेक्षा स तीर्थराजो जयति प्रयाग ॥ ३ ॥ चिर निवास न समीक्षते यो ह्युदारचित्त प्रददाति च क्रमात । य कल्पितार्थांश्च ददाति

१४ काशीपञ्चकम् (शंकराचार्य)।


श्रीगणेशाय नम । मनोनिवृत्ति परमोपशान्ति सा तीर्थवर्या मणिकर्णिका च । ज्ञानप्रवाहा विमला दिगङ्गा सा काशिकाहं निजबोधरूपा ॥ १ ॥ यस्यामिद कल्पितमिन्द्रजालं चराचर भाति मनोविलासम् । सच्चित्सुखैका परमात्मरूपा सा का० ॥ २ ॥ कोशेषु पञ्चस्वधिराजमाना बुद्धिर्भवानी प्रतिदेहगेहम् । साक्षी शिव सर्वगतोऽन्तरात्मा सा का०॥३॥ काश्या हि काशते काशी काशी सर्वप्रकाशिका । सा काशी विदिता येन तेन प्राप्ता हि काशिका ॥ ४ ॥ काशीक्षेत्र शरीर त्रिभुवनजननी व्यापिनी ज्ञानगङ्गा भक्ति श्रद्धा गयेय निजगुरुचरणध्यानयोग प्रयाग । विश्वेशोऽय तुरीय सकलजनमनसाक्षिभूतोऽन्तरात्मा देहे सर्वं मदीये यदि वसति पुनस्तीर्थमन्यत्किमस्ति ॥ ५ ॥ इति श्रीमच्छंकराचार्यविरचित काशीपञ्चक सपूर्णम् ॥ १२३ ॥

यथा निद्रया । य साक्षी कुरुते प्रबोधसमये स्वा
त्मानमेवाद्वय तस्मै श्रीगुरुमूर्तये मन इद श्रीदक्षि
णामूर्तये ॥ १ ॥ बीजस्यान्तरिवाङ्कुरो जगदिद
प्राङ् निर्विकल्प पुनर्मायाकल्पितदेशकालकलना-
वैचित्र्यचित्रीकृतम् । मायावीव विजृम्भयत्यपि
महायोगीव य स्वेच्छया तस्मै श्रीगुरुमूर्तये मन
इदं श्रीदक्षि० ॥ २ ॥ यस्यैव स्फुरण सदात्मक-
मसत्कल्पार्थक भासते साक्षात्तत्त्वमसीति वेदवच-
सा यो बोधयत्याश्रितान् । यत्साक्षात्करणाद्भवेन्न
पुनरावृत्तिर्भवाम्भोनिधौ तस्मै श्रीगुरुमूर्तये० ॥ ३ ॥
नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वर ज्ञान
यस्य तु चक्षुरादिकरणद्वारा बहि स्पन्दते । जा-
नामीति तमेव भान्तमनुभात्येतत्समस्त जगत्तस्मै
श्रीगुरु० ॥ ४ ॥ देहप्राणमपीन्द्रियाण्यपि चलां
बुद्धिं च शून्यं विदु स्त्रीबालान्धजडोपमास्त्वहमिति
भ्रान्ता भृश वादिन । मायाशक्तिविलासकल्पित-
महाव्यामोहसंहारिणे तस्मै श्रीगुरु० ॥ ५ ॥ रा
हुग्रस्तदिवाकरेन्दुसदृशीमायासमाच्छादनात्सन्मात्र

नाना ज्ञानदातारमाराद । त्रिभुवनगुरुमीश दक्षिणामूर्तिदेव जननमरणदु खच्छेददक्ष नमामि ॥ ॥ ११ ॥ चित्र वटतरोर्मूले वृद्धा शिष्या गुरुर्युवा । गुरोस्तु मौन व्याख्यानं शिष्या उच्छिन्नसशया ॥ १२ ॥ ॐ नम प्रणवार्थाय शुद्धज्ञानैकमूर्तये । निर्मलाय प्रशान्ताय दक्षिणामूर्तये नम ॥ १३ ॥ निधये सर्वविद्याना भिषजे भवरोगिणाम्। गुरवे सर्वलोकाना दक्षिणामूर्तये नम ॥ १४ ॥ मौनव्याख्याप्रकटितपरब्रह्मतत्त्व युवान वर्षिष्ठान्तेवसदृषिगणैरावृत ब्रह्मनिष्ठै आचार्येन्द्र करकलितचिन्मुद्रमानन्दरूप स्वात्मारामं मुदितवदन दक्षिणामूर्तिमीडे ॥ १५ ॥ इति श्रीमत्परमहसपरिव्राजकाचार्यविरचित दक्षिणामूर्तिस्तोत्र सपूर्णम् ॥१२४॥

२ निर्वाणदशकम् (शंकराचार्य)।

श्रीगणेशाय नम । न भूमिर्न तोय न तेजो न वायुर्न ख नेन्द्रिय वा न तेषा समूह । अनेकान्तिकत्वात्सुषुप्त्येकसिद्धस्तदेकोऽवशिष्ट शिव केवलोऽहम् ॥ १ ॥ न वर्णा न वर्णाश्रमाचारधर्मा न मे



अपि व्यापकत्वादितत्त्वात्मयोगात् स्वत सिद्ध-भावादनन्याश्रयत्वात । जगत्तुच्छमेतत्सम स्त तदन्यस्तदेकोऽवशि० ॥ ९ ॥ न चैक तदन्यद्द्वितीय कुत स्यान्न चाकेवलत्व न वा केवलत्वात । न शून्यं न चाशून्यमद्वैतकत्वात्कथ सर्ववेदान्तसिद्ध ब्रवीमि ॥ १० ॥ इति श्रीमच्छंकराचार्यविरचित निर्वाणदशकस्तोत्र सपूर्णम ॥ १२५ ॥

३ निर्वाणषट्कम् (शंकराचार्य)।


श्रीगणेशाय नम । मनोबुद्ध्यहंकारचित्तानि नाह न च श्रोत्रजिह्वे न च घ्राणनेत्रे । न च व्योम भूमिर्न तेजो न वायुश्चिदानन्दरूप शिवोऽह शिवोऽहम् ॥ १ ॥ न च प्राणसञ्ज्ञो न वै पञ्चवायुर्न वा सप्तधातुर्न वा पञ्चकोश । न वाक्पाणिपाद न चोपस्थपायुश्चिदानन्दरूप शिवो० ॥ २ ॥ न मे द्वेषरागौ न मे लोभमोहौ मदो नैव मे नैव मात्सर्यभाव । न धर्मो न चार्थो न कामो न मोक्षश्चि



तज्ज्ञेय यदुपनिषत्सु निश्चितार्थम् । ते धन्या भुवि परमार्थनिश्चितेहा शेषास्तु भ्रमनिलये परिभ्रमन्ति ॥ १ ॥ आदौ विजित्य विषयान्मदमोहरागद्वेषादिशत्रुगणमाहृतयोगराज्या । ज्ञात्वाऽमृत समनुभूय परात्मविद्याकान्तासुखा वत गृहे विचरन्ति धन्या ॥ २ ॥ त्यक्त्वा गृहे रतिमतो गतिहेतुभूतामात्मेच्छयोपनिषदर्थरस पिबन्त । वीतस्पृहा विषयभोगपदे विरक्ता धन्याश्चरति विजनेषु निरक्तसङ्गा ॥ ३ ॥ त्यक्त्वा ममाहमिति बन्धकरे पदे द्वे मानावमानसदृशा समदर्शिनश्च । कर्तारमन्यमवगम्य तदर्पितानि कुर्वन्ति कर्मपरिपाकफलानि धन्या ॥ ४ ॥ त्यक्त्वैषणात्रयमवेक्षितमोक्षमार्गा भैक्ष्यामृतेन परिकल्पितदेहयात्रा । ज्योति परात्परतर परमात्मसज्ञ धन्या द्विजा रहसि हृद्यवलोकयन्ति ॥५॥ नासन्न सन्न सदसन्न महन्न चाणु न स्त्री पुमान्न च नपुसकमेकबीजम् । यैर्ब्रह्म तत्समनुपासितमेकचित्ता धन्या विरेजुरि-

७ विज्ञाननौका (शंकराचार्य)।

श्रीगणेशाय नम । तपोयज्ञदानादिभि शुद्धबुद्धिर्विरक्तो नृपादौ पदे तुच्छबुद्धया । परित्यज्य सर्वं यदाप्नोति तत्त्वं परं ब्रह्म नित्यं तदेवाहमस्मि ॥ १ ॥ दयालुं गुरुं ब्रह्मनिष्ठं प्रशान्तं समाराध्य मत्या विचार्य स्वरूपम् । यदाप्नोति तत्त्वं निदिध्यासविद्वान्परं ब्रह्म० ॥२॥ यदानन्दरूपं प्रकाशस्वरूपं निरस्तप्रपञ्चं परिच्छेदशून्यम् । अहंब्रह्मवृत्त्यैकगम्यं तुरीयं परं ब्रह्म० ॥ ३ ॥ यदज्ञानतो भाति विश्वं समस्तं विनष्टं च सद्यो यदात्मप्रबोधे । मनोवागतीतं विशुद्धं विमुक्तं परं ब्रह्म० ॥ ४ ॥ निषेधे कृते नेति नेतीति वाक्यै समाधिस्थिताना यदाभाति पूर्णम् । अवस्थात्रयातीतमेकं तुरीयं परं ब्रह्म० ॥ ५ ॥ यदानन्दलेशै समानन्दि विश्वं यदा भाति सत्त्वे तदा भाति सर्वम् । यदालोचने रूपमन्यत्समस्तं परं ब्र० ॥ ६ ॥ अनन्तं विभुं सर्वयोनिं निरीहं शिवं संगहीनं यदोंकारगम्यम् ।



नीति ॥ २॥ का ते कान्ता कस्ते पुत्र संसारोऽय
मतीव विचित्र । कस्य त्व क कुत आयातस्तत्त्व
चिन्तय यदिदं भ्रान्त ॥३॥मा कुरु जनधनयौवनगर्वं
हरति निमेषात्काल सर्वम् । मायामयमिदमखिल
हित्वा ब्रह्मपद त्व प्रविश विदित्वा ॥ ४ ॥ काम क्रोध
मोह लोभ त्यक्त्वात्मान भावय कोऽहम् । आत्मज्ञा
नविहीना मूढास्ते पच्यन्ते नरकनिगूढा ॥५॥ सुर-
मन्दिरतरुमूलनिवास शय्या भूतलमजिन वास ।
सर्वपरिग्रहभोगत्याग कस्य सुख न करोति विराग
॥ ६ ॥ शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्न
विग्रहसंधौ । भव समचित्त सर्वत्र त्व वाञ्छस्य
चिराद्यदि विष्णुत्वम् ॥ ७ ॥ त्वयि मयि चान्य
त्रैको विष्णुर्व्यर्थं कुप्यसि सर्वसहिष्णु । सर्वस्मि
न्नपि पश्यात्मान सर्वत्रोत्सृज भेदाज्ञानम् ॥ ८ ॥
प्राणायाम नित्याहार नित्यानित्यविवेकविचारम् ।
जाप्यसमेतसमाधिविधान कुर्ववधान महदवधानम्
॥ ९ ॥ नलिनीदलगतसलिल तरल तद्वज्जीवितम्

चपदम्) अग्रे वह्निः पृष्ठे भानू रात्रौ चिबुकसमर्पित-जानुः। करतलभिक्षा तरुतलवासस्तदपि न मुञ्चत्याशापाशः। भज गो० ॥ २ ॥ यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारो रक्तः। पश्चाद्धावति जर्जरदेहे वार्तां पृच्छति कोऽपि न गेहे। भज गोविन्द भ० ॥ ३ ॥ जटिली मुण्डी लुञ्चितकेशः काषायाम्बरबहुकृतवेषः। पश्यन्नपि च न पश्यति मूढ उदरनिमित्तं बहुकृतवेषः। भज गोविं० ॥ ४ ॥ भगवद्गीता किञ्चिदधीता गङ्गाजललवकणिका पीता। सकृदपि यस्य मुरारिसमर्चा तस्य यमः किं कुरुते चर्चाम्। भज गोविन्द भ० ॥ ५ ॥ अङ्गं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डम्। वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशापिण्डम्। भज गो० ॥ ६ ॥ बालस्तावत्क्रीडासक्तस्तरुणस्तावत्तरुणीरक्तः। वृद्धस्तावच्चिन्तामग्नः पारे ब्रह्मणि कोऽपि न लग्नः। भज० ॥ ७ ॥ पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम्। इह संसारे

भज गोविन्द भज० ॥ १४ ॥ सुखतः क्रियते रामाभोगः पश्चाद्धन्त शरीरे रोगः । यद्यपि लोके मरणं शरणं तदपि न मुञ्चति पापाचरणम् । भज गोविन्दं भज० ॥ १५ ॥ रथ्याकर्पटविरचितकन्था पुण्यापुण्यविवर्जितपन्था । नाहं न त्वं नायं लोकस्तदपि किमर्थं क्रियते शोकः । भज गोविन्दं भज० ॥ १६ ॥ कुरुते गङ्गासागरगमनं व्रतपरिपालनमथवा दानम् । ज्ञानविहीने सर्वमनेन मुक्तिर्न भवति जन्मशतेन । भज गोविन्दं भज० ॥ १७ ॥ इति श्रीमच्छंकराचार्यविरचितं चर्पटपञ्जरिकास्तोत्रं संपूर्णम् ॥ १६२ ॥

१० हस्तामलकस्तोत्रम् (शंकरा०)।

श्रीगणेशाय नमः । कस्त्वं शिशो कस्य कुतोऽसि गन्ता किं नाम ते त्वं कुत आगतोऽसि । एतन्मयोक्तं वद चार्भक त्वं मत्प्रीतये प्रीतिविवर्धनोऽसि ॥१॥ हस्तामलक उवाच । नाहं मनुष्यो न च देवयक्षौ न

न्ववत् ॥ १६ ॥ देहेन्द्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणम् । तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत्सदा ॥ १७ ॥ व्यापृतेष्विन्द्रियेष्वात्मा व्यापारी वाविवेकिनाम् । दृश्यतेऽभ्रेषु धावत्सु धावन्निव यथा शशी ॥ १८ ॥ आत्मचैतन्यमाश्रित्य देहेन्द्रियमनोधियः । स्वकीयार्थेषु वर्तन्ते सूर्यालोकं यथा जनाः ॥ १९ ॥ देहेन्द्रियगुणान्कर्माण्यमले सच्चिदात्मनि । अध्यस्यन्त्यविवेकेन गगने नीलतादिवत् ॥ २० ॥ अज्ञानान्मानसोपाधेः कर्तृत्वादीनि चात्मनि । कल्प्यन्तेऽम्बुगते चन्द्रे चलनादि यथाम्भसः ॥ २१ ॥ रागेच्छासुखदुःखादि बुद्धौ सत्यां प्रवर्तते । सुषुप्तौ नास्ति तन्नाशे तस्माद्बुद्धेस्तु नात्मनः ॥ २२ ॥ प्रकाशोऽर्कस्य तोयस्य शैत्यमग्नेर्यथोष्णता । स्वभावः सच्चिदानन्दनित्यनिर्मलतात्मनः ॥ २३ ॥ आत्मनः सच्चिदंशश्च बुद्धेर्वृत्तिरिति द्वयम् । संयोज्य चाविवेकेन जानामीति प्रवर्तते ॥ २४ ॥ आत्मनो विक्रि-

निर्विकारो निराकारो नित्यमुक्तोऽसि निर्मलः ॥ ३३ ॥ अहमाकाशवत्सर्वं बहिरन्तर्गतोऽच्युत । सदा सर्वसमः शुद्धो निःसङ्गो निर्मलोऽचलः ॥ ३४ ॥ नित्यशुद्धविमुक्तैकमखण्डानन्दमद्वयम् । सत्यं ज्ञानमनन्तं यत्परं ब्रह्माहमेव तत् ॥ ३५ ॥ एवं निरन्तराभ्यस्ता ब्रह्मैवास्मीति वासना । हरत्यविद्याविक्षेपान् रोगानिव रसायनम् ॥ ३६ ॥ विविक्तदेश आसीनो विरागो विजितेन्द्रियः । भावयेदेकमात्मानं तमनन्तमनन्यधीः ॥ ३७ ॥ आत्मन्येवाखिलं दृश्यं प्रविलाप्य धिया सुधीः । भावयेदेकमात्मानं निर्मलाकाशवत्सदा ॥ ३८ ॥ रूपवर्णादिकं सर्वं विहाय परमार्थवित् । परिपूर्णचिदानन्दस्वरूपेणावतिष्ठते ॥ ३९ ॥ ज्ञातृज्ञानज्ञेयभेदः परात्मनि न विद्यते । चिदानन्दैकरूपत्वाद्दीप्यते स्वयमेव हि ॥ ४० ॥ एवमात्मारणौ ध्यानमथने सततं कृते । उदितावगतिर्ज्वाला सर्वाज्ञानेन्धनं दहेत् ॥ ४१ ॥ अरुणेनेव बोधेन पूर्वस-

सुखासक्तिं हित्वाऽऽत्मसुखनिर्वृतः । घटस्थदीपवत् स्वच्छं स्वान्तरेव प्रकाशते ॥ ५१ ॥ उपाधिविलयाद्विष्णौ निर्विशेषं विशेन्मुनिः । जले जलं वियद्व्योम्नि तेजस्तेजसि वा यथा ॥ ५२ ॥ यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखम् । यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत् ॥ ५३ ॥ यद्दृष्ट्वा न परं दृश्यं यद्भूत्वा न पुनर्भवः । यज्ज्ञात्वा न परं ज्ञेयं तद्ब्रह्मेत्यवधारयेत् ॥ ५४ ॥ तिर्यगूर्ध्वमधः पूर्णं सच्चिदानन्दमव्ययम् । अनन्तं नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत् ॥ ५५ ॥ अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यतेऽव्ययम् । अखण्डानन्दमेकं यत्तद्ब्रह्मेत्यवधारयेत् ॥५६॥ अखण्डानन्दरूपस्य तस्यानन्दलवाश्रिताः । ब्रह्माद्यास्तारतम्येन भवन्त्यानन्दिनोऽखिलाः ॥५७॥ तद्युक्तमखिलं वस्तु व्यवहारस्तदन्वितः । तस्मात्सर्वगतं ब्रह्म क्षीरे सर्पिरिवाखिले ॥ ५८ ॥ अनण्वस्थूलमह्रस्वमदीर्घमजमव्ययम् । अरूपगुणवर्णाख्यं तद्ब्रह्मेत्यवधारयेत् ॥ ५९ ॥ यद्भासा भास-

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यकृत आत्मबोध समाप्त ॥ १३५ ॥

१२ साधनपञ्चकप्रारम्भ (शंकरा०)।

श्रीगणेशाय नम । वेदो नित्यमधीयता तदुदित कर्म स्वनुष्ठीयता तेनेशस्य विधीयतामपचिति काम्ये मतिस्त्यज्यताम् । पापौघ परिधूयता भवसुखे दोषोऽनुसन्धीयतामात्मेच्छा व्यवसीयता निजगृहात्तूर्णं विनिर्गम्यताम् ॥ १ ॥ सग सत्सु विधीयता भगवतो भक्तिर्दृढा धीयता शान्त्यादि परिचीयता दृढतर कर्माशु सत्यज्यताम् । सद्विद्वानुपसर्पता प्रतिदिन तत्पादुके सेव्यतां ब्रह्मैकाक्षरमर्थ्यता श्रुतिशिरोवाक्य समाकर्ण्यताम् ॥२॥ वाक्यार्थश्च विचार्यता श्रुतिशिर पक्ष समाश्रीयता दुस्तर्कात्सुविरम्यता श्रुतिमतस्तर्कोऽनुसधीयताम् । ब्रह्मैवास्मि विभाव्यतामहरहर्गर्व परित्यज्यता देहेऽहमतिरुज्झता बुधजनैर्वाद परि-

न्मुक्तिदायकम्। काशीक्षेत्रं प्रति सह गौर्या मार्गे तु शंकरम् ॥ १ ॥ अन्त्यवेषधरं दृष्ट्वा गच्छ गच्छेति चाब्रवीत्। शंकरः सोऽपि चाण्डालस्तं पुनः प्राह शंकरम् ॥ २ ॥ अन्नमयादन्नमयमथवा चैतन्यमेव चैतन्यात्। द्विजवर दूरीकर्तुं वाञ्छसि किं ब्रूहि गच्छ गच्छेति ॥ ३ ॥ किं गङ्गाम्बुनि बिम्बितेऽम्बरमणौ चण्डालवाटीपयःपूरे चान्तरमस्ति काञ्चनघटीमृत्कुम्भयोर्वाम्बरे। प्रत्यग्वस्तुनि निस्तरङ्गसहजानन्दावबोधाम्बुधौ विप्रोऽयं श्वपचोऽयमित्यपि महान् कोऽयं विभेदभ्रमः ॥४॥ जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरा या संविदुज्जृम्भते या ब्रह्मादिपिपीलिकान्ततनुषु प्रोता जगत्साक्षिणी। सैवाहं न च दृश्यवस्त्विति दृढप्रज्ञापि यस्यास्ति चेच्चाण्डालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम ॥ ५ ॥ ब्रह्मैवाहमिदं जगच्च सकलं चिन्मात्रविस्तारितं सर्वं चैतदविद्यया त्रिगुणयाशेषं मया कल्पितम्। इत्थं यस्य दृढा मतिः सुखतरे नित्ये

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

ार्कि विश्वेश्वर विदितविश्वमनन्तमूर्तिम् । निर्मु-
क्तबन्धनमपारसुखाम्बुराशिं श्रीवल्लभ विमलबोध-
घन नमामि ॥ १ ॥ यस्य प्रसादादहमेव विष्णु-
र्मय्येव सर्वं परिकल्पितं च । इत्थ विजानामि
सदात्मरूप तस्याङ्घ्रिपद्म प्रणतोऽस्मि नित्यम्
॥ २ ॥ तापत्रयार्कसतप्त कश्चिदुद्विग्नमानस ।
शमादिसाधनैर्युक्त सद्गुरु परिपृच्छति ॥ ३ ॥
अनायासेन येनास्मान्मुच्येय भवबन्धनात् ।
तन्मे साक्षिप्य भगवन्केवल्य कृपया वद ॥ ४ ॥
साध्वी ते वचनव्यक्ति प्रतिभाति वदामि
ते । इद तदिति विस्पष्ट सावधानमना शृणु
॥ ५ ॥ तत्त्वमस्यादिवाक्योत्थ यज्जीवपरमात्मनो ।
तादात्म्यविषय ज्ञान तदिद मुक्तिसाधनम् ॥ ६ ॥
को जीव क परश्चात्मा तादात्म्य वा कथ तयो ।
तत्त्वमस्यादिवाक्य वा कथं तत्प्रतिपादयेत् ॥ ७ ॥
अत्र ब्रूम समाधान कोऽन्यो जीवस्त्वमेव हि ।
यस्त्व पृच्छसि मा कोऽह ब्रह्मैवास्मि न सशय ॥८॥

न्द्रियादयो भावा हीनादिव्यापृतिक्षमा । यस्य सन्नि
धिमात्रेण सोऽहमित्यवधारय ॥१८॥ अनापन्नविकार
मन्नयस्रान्तवदेव य । बुद्ध्यादींश्चालयेत्प्रत्यक् सोऽ
हमित्यवधारय ॥ १९ ॥ अजडात्मवदाभान्ति यत्सा
न्निध्याज्जडा अपि । देहेन्द्रियमन प्राणा सोऽहमि
मित्यवधारय ॥ २० ॥ अगमन्मे मनोऽन्यत्र साम्प्रत
च स्थिरीकृतम् । एव यो वेत्ति धीवृत्ति सोऽहमि
त्यवधारय ॥ २१ ॥ स्वप्नजागरिते सुप्ति भावा
भावौ धिया तथा । यो वेत्त्यविक्रिय साक्षात्सोऽ
हमित्यवधारय ॥ २२ ॥ घटावभासको दीपो घटा
दन्यो यथेष्यते । देहावभासको देही तथाह बोध
विग्रह ॥ २३ ॥ पुत्रवित्तादयो भावा यस्य
शेषतया प्रिया । द्रष्टा सर्वप्रियतम सोऽहमित्यव
धारय ॥ २४ ॥ परप्रेमास्पदतया मा न भूवमहं
सदा । भूयासमिति यो द्रष्टा सोऽहमित्यवधारय
॥ २५ ॥ य साक्षिलक्षणो बोधस्त्वपदार्थ स उच्य
ते । साक्षित्वमपि बोद्धृत्वमविकारितयाऽऽत्मन

॥ ३५ ॥ कर्मणा फलदातृत्वं यस्यैव श्रूयते श्रुतौ ।
जीवानां हेतुकर्तृत्वं तद्ब्रह्मेत्यवधारय ॥
॥ ३६ ॥ तत्त्वंपदार्थौ निर्णीतौ वाक्यार्थश्चिन्त्य
तेऽधुना । तादात्म्यमत्र वाक्यार्थस्तयोरेव पदार्थयोः
॥ ३७ ॥ संसर्गो वा विशिष्टो वा वाक्यार्थो
नात्र संमतः । अखण्डैकरसत्वेन वाक्यार्थो विदुषां
मतः ॥ ३८ ॥ प्रत्यग्बोधो य आभाति सोऽद्वया-
नन्दलक्षणः । अद्वयानन्दरूपश्च प्रत्यग्बोधैकलक्षणः
॥ ३९ ॥ इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् ।
अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि ॥ ४० ॥
तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु । पूर्णा-
नन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ॥ ४१ ॥ तत्त्व-
मस्यादिवाक्यं च तादात्म्यप्रतिपादने । लक्ष्यौ
तत्त्वंपदार्थौ द्वावुपादाय प्रवर्तते ॥ ४२ ॥ हित्वा
द्वौ शबलौ वाच्यौ वाक्यं वाक्यार्थबोधने । यथा
प्रवर्ततेऽस्माभिस्तथा व्याख्यातमादरात् ॥ ४३ ॥
आलम्बनतया भाति योऽस्मत्प्रत्ययशब्दयोः । अन्तः

परम पदम् । पुनरावृत्तिरहितं कैवल्य प्रतिपद्यते ॥ ५३ ॥ इति श्रीमत्परमहसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचिता वाक्यवृत्ति समाप्ता ॥१३८॥

१६ परापूजास्तोत्रम् (शक०)।

श्रीगणेशाय नम । पूर्णस्यावाहन कुत्र सर्वाधारस्य चासनम् । स्वच्छस्य पाद्यमर्घ्यं च शुद्धस्याचमन कुत ॥ १ ॥ निर्मलस्य कुत स्नान वस्त्र विश्वोदरस्य च । निरालम्बस्योपवीत पुष्प निर्वासनस्य च ॥ २ ॥ निर्लेपस्य कुतो गन्धो रम्यस्याभरण कुत । नित्यतृप्तस्य नैवेद्यस्ताम्बूल च कुतो विभो ॥ ३ ॥ प्रदक्षिणा ह्यनन्तस्य ह्यद्वयस्य कुतो नति । वेदवाक्यैरवेद्यस्य कुत स्तोत्र विधीयते ॥ ४ ॥ स्वय प्रकाशमानस्य कुतो नीराजन विभो । अन्तर्बहिश्च पूर्णस्य कथमुद्वासन भवेत ॥ ५ ॥ एवमेव परा पूजा सर्वावस्थासु सर्वदा । एकबुद्ध्या तु देवेशे विधेया ब्रह्मवित्तमै ॥ ६ ॥ इति परा पूजा समाप्ता ॥ १३९ ॥

[illegible] नामभक्ता श्री

[illegible] भुवन निनले

[illegible] ॥

[illegible] यभाग

[illegible] मानमत

[illegible] मग

श्रीदे० ॥ ६ ॥ त्रैलोक्यराज्यमथवा कमलासनस्य विष्णोः शिवस्य विभवं च तृणाय मत्वा । कौपीनमप्यधिकमित्यहह प्रशेते श्रीदे० ॥ ७ ॥ आत्मानुमन्थिगलिताखिलवासनो यो विस्मृत्य विश्वमखिलं सशरीरमेतत् । खादन् हसन् भ्रमणमाकलयंश्च शेते श्रीदे० ॥ ८ ॥ बाहूपधानविनिषण्णशिरा शिलाया मध्ये तटे द्युसरितो रविचन्द्रदीपे । आलिङ्गितस्वधिषणावनितस्तु शेते श्रीदे० ॥ ९ ॥ चिन्मुद्रयाल्पकरभूचितचित्तवृत्ति स्थित्या स्वया प्रकटयन्नधिकारिवर्गं । ब्राह्मीं स्थितिं बहुलपुण्यचयेन शेते श्रीदे० ॥ १० ॥ द्रोणाचले सकृत्पुण्यमयेन केन भाग्योदयेन गुरुणा निजबोधदाने । सद्घनचिन्मयसुखावचनीयनिद्रं कृष्णो मुनिः स्वपिति देशिकदृष्टिदृष्टः ॥ ११ ॥ इदं हि जनुषः फलं जननमृत्युविच्छेदकृत् स्वकीयसुखचिद्घने यदिह लब्धविश्रान्तिता । ततोऽपि च महत्फलं यदधिकारिवर्गे निजां दधात्यतुलसंविदं तत इदं गुरो-

न्द्रो ह्यरुणाम्बुराशिर्नानास्वरूपैश्चरतीह लोके॥६॥
किंचिच्च किंचित्कृस्ते मनस्वी कश्चिन्न किंचित्
स्ते प्रमत्त । बालो यथा क्रीडति सर्वलोके तथैव
क्रीडति पामरेषु ॥ ७ ॥ स लभ्यते केनचिदेव
सा विज्ञायते केनचिदेव पुमा । प्रस्तूयते केनचि-
न पुसा शृणोति वा य स नर स धन्य ॥ ८ ॥
ति श्रीकृष्णानन्दसरस्वतीविरचित गुरुतत्त्ववि॰
नस्तोत्र सपूर्णम् ॥ १४५ ॥

२३ निगमसारस्तोत्रम् (कृष्णा॰)।

ॐ॥ शब्द स्पर्श च रूप रसमथ सकल गन्धम-
ङ्ग येन त्व जानीषे स शम्भुस्त्रिपुरसुखलवान्
यति स्वप्रदीप्त्या । एकोप्यानन्तमार्गान्निजपरमम
मायेयेक्षोत्थया य स्वातन्त्र्यान्नो जहाति स्वक
गिवता सत्वमेवर्क्षुगीत ॥ १ ॥ अत्र प्राणो
ती धीरहमिति न वपु पञ्चकाशप्रविष्ट माशी
भिरसुखाब्धि मकलनारनिधीगुहाब्ध प्रदीप









अथ भवानीभुजंगस्तोत्रम् ।

॥ श्रीभवान्यै नमः ॥ षडाधारपङ्केरुहान्तर्विराजत्सु
षुम्नान्तरालेतितेजोलसन्तीम् । सुधामण्डलं द्रावयन्तीं
पिबन्तीं सुधामूर्तिमीडेऽहमानन्दरूपाम् ॥ १ ॥
ज्वलत्कोटिबालार्कभासारुणाङ्गीं सुलावण्यशृङ्गारशो
भाभिरामाम् । महापद्मकिञ्जल्कमध्ये विराजत्त्रि
कोणोल्लसन्तीं भजे श्रीभवानीम् ॥ २ ॥ क्वणत्कि
ङ्किणीनूपुरोद्भासिरत्नप्रभालीढलाक्षार्द्रपादारविन्दाम् ।
अजेशाच्युताद्यैः सुरैः सेव्यमानां महादेवि
मन्मूर्ध्नि ते भावयामि ॥ ३ ॥ सुशोणाम्बराबद्ध
नीवीविराजन्महारत्नकाञ्चीकलापं नितम्बम् । स्फुर
द्दक्षिणावर्तनाभिं च तिस्रो वली रम्यते रोमराजीं
भजेऽहम् ॥ ४ ॥ लसद्वृत्तमुत्तुङ्गमाणिक्यकुम्भोपम
श्रीस्तनद्वन्द्वमम्बाम्बुजाक्षीम् । भजे पूर्णदुग्धाभिराम
न्तवेदं महाहारदीप्तं सदाप्रस्नुतास्यम् ॥ ५ ॥ शिरीष
प्रसूनोल्लसद्बाहुदण्डैर्ज्वलद्बाणकोदण्डपाशाङ्कुशैश्च ।